

# Grammatical Analysis of

# Srimad Bagavad Gita

(Padacheda, Padaparichaya, Padartha, Anvaya, Thathparyam and Grammatical portions for all the Shlokas)

**Part 1 - Chapters : 1 To 6**

# GRAMMATICAL ANALYSIS
# OF
# SRIMAD BAGAVAD GITA

## CHAPTERS 1 – 6

Prepared By

Brahmachari Saravanan

(Gurusevak of Pujyasri Omkarananda Mahaswamiji)



**Jagadguru Sri Sri Sri Bharati Tirtha Mahasannidhanam**
**Jagadguru Sri Sri Sri Vidhushekara Bharati Sannidhanam**

भारतीकरुणापात्रं भारती पदभूषणम् ।
भारती पदमारुढं भारतीतीर्थमाश्रये ।।
विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ।।



**Pujyasri Omkarananda Saraswati Mahaswamiji**

वेदवेदान्तशास्त्रज्ञं धर्मरक्षणनायकम् ।
चिद्भवानन्दशिष्यं तं परं सन्मार्गदर्शिनम् ।।
अपारकरुणापात्रम्  वेदपुरीनिवासिनम् ।
आत्मविद्यागुरुं वन्दे ओङ्कारानन्दसद्गुरुम् ।।

# Preface

Ānandam - is the one common goal that every living being in the world pursues. Among all living beings, only humans have the unique ability to choose the source of their Ānandam. For other creatures, which lack this capacity to choose, Ānandam simply means survival without pain. Human pursuits, however, are classified broadly into Dharma, Artha, Kāma, and Mokṣa. Among these, the scriptures declare Mokṣa as the supreme goal, for Mokṣa alone is permanent, while all other goals are inherently transient and temporary.

As Lord Krishna says in the *Bhagavad Gītā* chapter 15:
"यत् गत्वा न निवर्तन्ते ।"—"*having reached that state, there is no return"*.

Our scriptures teach that Mokṣa is "*Owning up to one's own nature as Brahman*":
"अहं ब्रह्मास्मि।" ("*I am Brahman*").

Sureśvarācārya, in his *Mānasollāsa*, beautifully states:

आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरम् ॥

*"Sages say that there is no greater gain than gain of Ātman. With a view to this gain, the sage adores his own Self as Parameśvara."*

To realize our true nature as Brahman, it is necessary first to learn about Brahman. The Veda-s—specifically the end portion called Vedanta (the Upaniṣad-s)—are considered the primary source of this knowledge.

Vyasa Bhagavān states in the *Brahma Sutra*:
शास्त्रयोनित्वात् ।
"*Because Scriptures are the source (of the knowledge of Brahman)."*

Though the Upaniṣad-s speak clearly about Brahman, their subtle teachings can appear difficult to grasp. As Swami Chinmayananda says, "*the Upaniṣad-s are a tough nut to crack*." Out of compassion, the Lord Himself presented this same truth in the form of the Bhagavad Gītā, making it accessible to all.

As one of the Gītā dhyāna śloka-s says:

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

Downloaded from www.omkaravidya.com

*"All the Upaniṣad-s are the cows, the milker is Kṛṣṇa (the son of Nanda), Arjuna is the calf, the people of purified intellect are the drinkers, and the milk is the great nectar of the Gita."*

For a calf, the best food—and the food it can consume—is cow's milk. Though the verse specifies Arjuna as the calf, we too can consider ourselves calves, eager to drink the milk of the Bhagavad Gītā.

A sincere sādhaka does not merely study the Bhagavad Gītā casually, but strives to understand each śloka by carefully examining every word, and discerning how each word is connected. Such an approach enables one to remember the śloka-s along with their meaning more easily. This work undertakes the task of breaking down each śloka into its component words and arranging them in proper sequence to provide clear meaning—an approach termed अन्वयः (anvaya) in Saṃskṛtam.

At the outset, I offer this work at the feet of the Lord, without whose grace none of this would be possible.

My prostrations at the Lotus feet of the Sringeri Ubhaya Jagadgurus **Śrī Śrī Śrī Bharatī Tirtha Mahāsannidhānam** and **Śrī Śrī Śrī Vidhuśekhara Bhāratī Sannidhānam** by whose blessings I had the fortune to complete this work.

My prostrations to **Pujyaśrī Omkārānanda Saraswati Mahāswamīji,** who has been the guiding light for this endeavor. Swāmiji was delighted to see this work completed and blessed that it may reach all sincere seekers.

My prostrations to **Swāmini Brahmaleenānanda Saraswati,** from whom I had the privilege of learning the Bhagavad Gītā.

My prostrations to **Śrīmatī Dr. Umamaheswari,** who taught me Saṃskṛtam.

My sincere thanks to **Śrīmatī. Sudha Srinivaas**, who worked with me to validate and proofread this work to make it error-free.

May this work serve as a humble offering and a small aid for all sincere seekers of truth.

With pranāms,
**Brahmacārī Saravaṇan**

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# अथ प्रथमोऽध्यायः

# अर्जुनविषादयोगः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

धृतराष्ट्र उवाच -
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥1 ॥

पदविभागः
धृतराष्ट्र उवाच-धर्मक्षेत्रे कुरक्षेत्रे समवेताः युयुत्सवः मामकाः पाण्डवाः च एव, किम् अकुर्वत सञ्जय

पदपरिचयः
धर्मक्षेत्रे - अ. न. स. एक
कुरुक्षेत्रे - अ. न. स. एक
समवेताः - अ. पु. प्र. बहु
युयुत्सवः - उ. पु. प्र. बहु
मामकाः - अ. पु. प्र. बहु
पाण्डवाः - अ. पु. प्र. बहु
च - अव्ययम्
एव - अव्ययम्
किम् - सर्व नपु. दवि. एक
अकुर्वत - कृ ल् प्र.पु बहु
संजय - अ. पु. सं प्र

पदार्थः

Downloaded from www.omkaravidya.com

धर्मक्षेत्रे - धर्मप्रधानक्षेत्रे
कुरुक्षेत्रे - सरस्वती नद्याः दक्षिण भागे
समवेताः - संयुक्ताः
युयुत्सवः - योद्धुम् इच्छवः
मामकाः - मदीयाः
पाण्डवाः - पाण्डुपुत्राः
च-च
एव - एव
किम् - किम्
अकुर्वत - कृतवन्तः
संजय - हे संजय !

अन्वयः
(हे) संजय ! धर्मक्षेत्रे कुरुक्षेत्रे युयुत्सवः समवेताः मामकाः पाण्डवाः च किम् एव अकुर्वत?

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये प्रथमः श्लोकः। राजा धृतराष्ट्रः संजयम् अपृच्छत्। "हे संजय ! मम पुत्राः पाण्डुपुत्राश्च युद्धं कर्तुं धर्मक्षेत्रे कुरुक्षेत्रे सम्मिल्य किम् अकुर्वन्।

व्याकरणम्
सन्धिः
समवेताः + युयुत्सवः - विसर्गलोपः
पाण्डवाः + च + एव - विसर्गसकारः श्चुत्वसन्धिः वृद्धिसन्धिः
समासः

Downloaded from www.omkaravidya.com

धर्मक्षेत्रे - धर्म प्रधान क्षेत्रम् - मध्यमपदलोपी-कर्मधारयसमासः तस्मिन्
कुरुक्षेत्रे - कुरुणां क्षेत्रम्- षष्ठितत्पुरुषः तस्मिन्

तद्धितान्तः
मामकाः - अस्मद् (ममकादेशः )+अण् | मम इमे इति मामकाः |
पाण्डवाः - पाण्डु + अण् (अपत्यार्थे) पाण्डोः अपत्यानि पुमांसः इति पाण्डवाः |

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

सञ्जय उवाच
दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ 2 ॥

पदविभागः
सञ्जयः उवाच- दृष्ट्वा तु पाण्डवानीकम् व्यूढम् दुर्योधनः तदा आचार्यम् उपसङ्गम्य राजा वचनम् अब्रवीत्

पदपरिचयः
दृष्ट्वा – क्त्वा प्रत्ययः
तु - अव्ययम्
पाण्डवानीकं - अ. नपु. द्वि एक
व्यूढं - अ. नपु. द्वि एक
दुर्योधनः अ. पु. प्र एक

Downloaded from www.omkaravidya.com

तदा - अव्ययम्
आचार्यम् - अ. पु. द्वि एक
उपसंगम्य - ल्यबन्तम्
राजा - नका. पु. प्र एक
वचनं- अ. नपु. द्वि एक
अब्रवीत् - ब्रूञ् धातुः लङ् प्र.पु एक

प्रतिपदार्थः
दृष्ट्वा - अवलोक्य
तु-तु
पाण्डवानीकं - पाण्डवसैन्यम्
व्यूढं - व्यूहत्वेन स्थापितम्
दुर्योधनः - दुर्योधनः
तदा - तदानीं
आचार्यम् - गुरु द्रोणम्
उपसंगम्य - उपसृत्य
राजा - नृपः
वचनं - वाक्यम्
अब्रवीत् - अवदत्

अन्वयः
तदा राजा दुर्योधनः पाण्डवानीकं व्यूढं दृष्ट्वा तु आचार्यम् (द्रोणम्) उपसङ्गम्य वचनम् अब्रवीत् ।

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये द्वितीयः श्लोकः । युद्धे राजा दुर्योधनः पाण्डवाणां

Downloaded from www.omkaravidya.com

व्यूढं च दृष्ट्वा तस्य आचार्यः द्रोणस्य समीपं गत्वा वचनम् अब्रवीत् ।

व्याकरणम्

सन्धिः

पाण्डवानीकं + व्यूढं = अनुस्वारसन्धिः

व्यूढं + दुर्योधनः = अनुस्वारसन्धिः

दुर्योधनः + तदा = विसर्गसकारः

समासः

पाण्डवानीकम् - पाण्डवानाम् आनीकम् - तत् षष्ठितत्पुरुषः

कृदन्ताः

दृष्ट्वा - दृशिर् + क्त्वा

उपसङ्गम्य - उप + सम् + गम्लृ + ल्यप् ।

वचनम् - वच् + ल्युट् (करणे) उच्यते अनेन इति वचनम् ।

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।

व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३॥

Downloaded from www.omkaravidya.com

पदविभागः

पश्य एताम् पाण्डुपुत्राणाम् आचार्य महतीम् चमूम्  व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता

पदपरिचयः

पश्य - लोट् म. पु एक

एताम् - एतद् स्त्री द्वि एक

पाण्डुपुत्राणाम् - अ.पु.ष.बहु

आचार्य - अ. पु सं प्र एक

महतीं - ई. स्त्री द्वि एक

चमूम् - ऊ. स्त्री द्वि एक

व्यूढां - आ. स्त्री द्वि एक

द्रुपदपुत्रेण - अ. पु. तृ. एक

तव - सर्व ष. एक

शिष्येण - अ. पु. तृ. एक

धीमता - त. पु. तृ. एक

पदार्थः

पश्य - ईक्षस्व

एताम् - एताम्

पाण्डुपुत्राणाम् - पाण्डवानाम्

आचार्य - द्रोणाचार्य

महतीम् - बृहतीम्

चमूम् - सेनाम्

व्यूढां - व्यूहरुपेण स्थापितं

द्रुपदपुत्रेण - धृष्टद्युम्नेन

Downloaded from www.omkaravidya.com

तव - भवतः
शिष्येण - छात्रेण
धीमता -बुद्धिमता

अन्वयः
(हे) आचार्य ! तव धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीं चमूं पश्य ।

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये तृतीयश्लोकः । राजा दुर्योधनः द्रोणाचार्यस्य समीपं गत्वा "आचार्य ! तव धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीं चमूं पश्य ।" इति उक्तवान् ।

व्याकरणम्
सन्धिः
पश्यैतां - पश्य + एताम् - वृद्धिसन्धिः
महतीं चमूम् - महतीम् + चमूम् - अनुस्वारसन्धिः

समासः
पाण्डुपुत्राणाम् - पाण्डोः पुत्राः - षष्ठितत्पुरुषः
द्रुपदपुप्रेण - दृपदस्य पुत्रः - षष्ठितत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अत्र शुरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ 4॥

पदविभागः
अत्र शूराः महेष्वासाः भीमार्जुनसमाः युधि युयुधानः विराटः च द्रुपदः च महारथः

पदपरिचयः
अत्र - अव्ययम्
शूराः - अका पु. प्र बहु
महेष्वासाः - अका पु. प्र बहु
भीमार्जुनसमाः - अका पु. प्र बहु
युधि - धका स्त्री. स. एक
युयुधानः - अका पु. प्र एक
विराटः - अका पु. प्र एक
च - अव्ययम्
द्रुपदः - अका पु. प्र एक
च- अव्ययम्
महारथः - अका पु. प्र एक

पदार्थः
अत्र - अस्मिन् स्थले

Downloaded from www.omkaravidya.com

शुराः - धीराः
महेष्वासाः - महत् धनुः प्राप्तवन्तः
भीमार्जुनसमा - भीमार्जुनाभ्यां समानाः
युधि - युधि
युयुधानः - सात्यकिः (सत्यकस्य पुत्रः)
च-च
विराटः - विराटदेशस्य राजा
च-च
द्रुपदः - द्रुपद राज्यस्य नृपः
महारथः - महाधीरः

अन्वयः
अत्र शुराः महेष्वासाः युधि भीमार्जुनसमाः युयुधानः विराटः च महारथः द्रुपदः च ।

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये चतुर्थः श्लोकः । राजा दुर्योधनः पाण्डवानां मुख्यधीराणां नामानि उक्तवान् । अस्मिन् स्थले पाण्डव सैन्ये अनेक शुराः सन्ति । ते सर्वे भीमार्जुन समान वीरा । ते महत् धनुः प्राप्तवन्तः । अत्र सात्यकिः विराटः द्रुपदः च अनेकमहारथः सन्ति ।

व्याकरणम्
सन्धिः
शूरा महेष्वासा = शूराः + महेष्वासाः - विसर्गलोपः
भीमार्जुनसमा युधि = भीमार्जुनसमाः + युधि - विसर्गलोपः
युयुधानो विराटः - युयुधानः+ विराटः - विसर्गउकारः

Downloaded from www.omkaravidya.com

विराटश्च - विराटः + च - विसर्गसकारः श्चुत्वसन्धिः
द्रुपदश्च - द्रुपदः + च - विसर्गसकारः श्चुत्वसन्धिः

समासः
महेष्वासाः - महान् इष्वासः येषां ते - बहुव्रीहिः
भीमार्जुनसमाः - भीमश्च अर्जुनश्च भीमार्जुनौ - द्वन्द्वसमासः
भीमार्जुनाभ्यां समाः तृतीया तत्पुरुषः
महारथः महान् रथः यस्य सः - बहुव्रीहिः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गव ॥ 5 ॥

पदच्छेदः
धृष्टकेतुः चेकितानः काशिराजः च वीर्यवान् पुरुजित् कुन्तिभोजः च शैब्यः च नरपुङ्गवः

पदपरिचयः
धृष्टकेतुः - उका. पु. प्र एक
चेकितानः - अका. पु. प्र एक
काशिराजः - अका. पु. प्र एक
च - अव्ययम्
वीर्यवान् - तका. पु. प्र एक

Downloaded from www.omkaravidya.com

पुरुजित् - तका. पु. प्र एक
कुन्तिभोजः - अका. पु. प्र एक
च - अव्ययम्
शैब्यः - अका. पु. प्र एक
च - अव्ययम्
नरपुङ्गवः - अका. पु. प्र एक

पदार्थः
धृष्टकेतुः - शिशुपालस्य पुत्रः
चेकितानः - चेकितानः
काशिराजः - काशि देशस्य नृपः
च-च
वीर्यवान् - वीरः
पुरुजित् - पुरुजित्
कुन्तिभोजः - कुन्त्याः धाता / पालकपिता
च -च
शैब्यः - शिबि वंशस्य नृपः / युधिष्ठिरस्य श्वशुरः / शिबेः राजा
च-च
नरपुङ्गवः  - नरेषु श्रेष्ठः

अन्वयः
धृष्टकेतुः चेकितानः वीर्यवान् काशिराजः च पुरुजित् कुन्तिभोजः च नरपुङ्गवः शैब्यः च (सन्ति) ।

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये पञ्चमः श्लोकः । राजा दुर्योधनः पाण्डवाणां सैन्यस्य

Downloaded from www.omkaravidya.com

मुख्यधीराणां नामानि उक्तवान् । पाण्डवसैन्ये धृष्टकेतुः चेकितानः वीर्यवान् काशिराजः पुरुजित् कुन्तिभोजः नरपुङ्गवः शैब्यः च सन्ति ।

व्याकरणम्

सन्धिः

धृष्टकेतुश्चेकितानः= धृष्टकेतुः + चेकितानः - विसर्गसकारः श्चुत्वम्

काशिराजश्च = काशिराजचः + च - विसर्गसकारः श्चुत्वम्

कुन्तिभोजश्च = कुन्तिभोजः + च - विसर्गसकारः श्चुत्वम्

शैब्यश्च = शैब्यः + च - विसर्गसकारः श्चुत्वम्

समासः

नरपुङ्गवः नरेषु पुङ्गवः - सप्तमितत्पुरुषः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ 6 ॥

पदच्छेदः

युधामन्युः च विक्रान्तः उत्तमौजाः च वीर्यवान् सौभद्रः द्रौपदेयाः च सर्वे एव महारथाः

Downloaded from www.omkaravidya.com

पदपरिचयः

युधामन्युः - उका. पु. प्र एक

च - अव्ययम्

विक्रान्तः - अका. पु. प्र एक

उत्तमौजाः - सका. पु. प्र एक

च - अव्ययम्

वीर्यवान् - तका. पु. प्र एक

सौभद्रः - अका. पु. प्र एक

द्रौपदेयाः - अका. पु. प्र बहु

च - अव्ययम्

सर्व- अका. सर्व पु. प्र बहु

एव - अव्ययम्

महारथाः - अका. पु. प्र बहु

पदार्थः

युधामन्युः - युधामन्युः

च -च

विक्रान्तः - महाधीरः

उत्तमौजाः: - उत्तमौजाः

च-च

वीर्यवान् - वीरः

सौभद्रः - अभिमन्युः

द्रौपदेयाः - उपपाण्डवाः

च-च

एव – एव

सर्व - सकलाः

महारथाः - महारथाः

Downloaded from www.omkaravidya.com

अन्वयः

विक्रान्तः युधामन्युः वीर्यवान् उत्तमौजाः सौभद्रः द्रौपदेयाः च सर्वे महारथाः एव (सन्ति)|

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये षष्ठः श्लोकः | राजा दुर्योधनः पाण्डवाणां मुख्यधीराणां नामानि उक्तवान् | पाण्डवसैन्ये विक्रान्तः युधामन्युः वीयर्वान् उत्तमौजा : अभिमन्युः उपपाण्डवाः च सर्वे महारथाः एव सन्ति | उपपाण्डवानां नामानि प्रतिविन्ध्यः सुतसोमः श्रुतकीर्तिः शतानीकः श्रुतसेनः च सन्ति |

व्याकरणम्

सन्धिः

युधामन्युश्च = युधामन्युः + च - विसर्गसकारः श्चुत्वम्

विक्रान्त उत्तमौजाः - विक्रान्तः + उत्तमौजाः - विसर्गलोपः

उत्तमौजाश्च - उत्तमौजाः + च - विसर्गसकारः श्चुत्वम्

सौभद्रो द्रौपदेयाः - सौभद्रः द्रौपदेयाः - विसर्गउकारः

द्रौपदेयाश्च - द्रौपदेयाः + च

सर्व एव - सर्वे + एव - यान्तावान्तसन्धिः यलोपः

समासः

उत्तमौजाः - उत्तमम् ओजः यस्य सः बहुव्रीहिः

तद्धितान्तः

सौभद्रः - सुभद्रायाः अपत्यं पुमान् | दोपद्री - द्रुपदस्य अपत्यं स्त्री |

द्रौपदेयाः - द्रौपद्याः अपत्यानि पुमांसः |

Downloaded from www.omkaravidya.com

मूलश्लोकः

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सेन्यस्य संज़ार्थ तान्ब्रवीमि ते ||7 ||

पदच्छेदः
अस्माकम्, तु, विशिष्टाः, ये, तान्, निबोध, द्विजोत्तम नायकाः, मम, सैन्यस्य, संज्ञार्थम्, तान्, ब्रवीमि, ते

पदपरिचयः
अस्माकं - दकार. अस्मद् ष बहु
तु - अव्ययम्
विशिष्टाः - अ. पु. प्र बहु
ये - दकार. यद् पु प्र. बहु
तान् - दकार. तद् पु द्वि बहु
निबोध - लोट् म.पु एक
द्विजोत्तम - अ. पु सं प्र एक
नायकाः - अ. पु. प्र बहु
मम - दकार. अस्मद् ष्. एक
सैन्यस्य - अकार. न. ष. एक
संज्ञार्थं - अकार. न. दवि. एक
तान् - दकार. तद् पु. द्वि बहु
ब्रवीमि - ब्रूञ् लट् उ.पु एक

Downloaded from www.omkaravidya.com

ते - दकार युस्मद् सर्व च. एक

प्रतिपदार्थः

अस्माकं - कौरवाणाम्

विशिष्टाः - श्रेष्ठाः

ये-ये

तान् - तान्

निबोध - जानीहि

द्विजोत्तम - द्विजेषु उत्तमः

नायकाः - नायकाः

मम - दुर्योधनस्य

सैन्यस्य - सेनायाः

संजार्थं - सम्यक् ज्ञानार्थं

तान् - तान् नायकान्

ब्रवीमि - वदामि

ते - तुभ्यम्

अन्वयः

हे द्विजोत्तम ! अस्माकं तु ये विशिष्टाः तान् निबोध मम सैन्यस्य नायकाः (ये) ते संजार्थं तान् ब्रवीमि ।

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये सप्तमः श्लोकः । राजा दुर्योधनः पाण्डवाणां सैन्यस्य मुख्यधीराणां नामानि उक्तवान् । तदनन्तरं सः इति उक्तवान् । है द्रोणाचार्य ! अस्माकंसैन्ये ये विशिष्टाः सन्ति तान् निबोध । मम सैन्यस्य नायकाः संजार्थं वदामि ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

विशिष्टा ये - विशिष्टाः + ये - विसर्गलोपः

नायका मम - नायकाः + मम -विसर्गलोपः

संज्ञार्थं तान् - संज्ञार्थम् + तान् - अनुस्वारः सन्धिः

समासः

द्विजोत्तमः द्विजेषु उत्तमः सप्तमितत्पुरुषः

संज्ञार्थम् - संज्ञायै इदम् - चतुर्थीतत्पुरुषः(नित्यसमास)

कृदन्तः

विशिष्टः - वि+शिष्+क्त

नायका= नी+ण्वुल् (अक)

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ 8 ॥

पदच्छेदः

भवान्, भीष्मः, च, कर्णः, च, कृपः, च, समितिञ्जयः अश्वत्थामा, विकर्णः, च, सौमदत्तिः, तथा, एव, च

Downloaded from www.omkaravidya.com

पदपरिचयः

भवान् - तकार. भवत् पु. प्र एक

भीष्मः - अ. पु. प्र एक

च - अव्ययम्

कर्णः - अ. पु. प्र एक

च - अव्ययम्

कृपः - अ. पु. प्र एक

च - अव्ययम्

समितिञ्जयः - अ. पु. प्र एक

अश्वत्थामा - नकार. पु. प्र एक

विकर्णः - अ. पु. प्र एक

सौमदत्तिः - इकार. पु. प्र एक

पदार्थः

भवान् - द्रोणः

भीष्मः - गङ्गायाः पुत्रः

च-च

कर्णः - कर्णः

च-च

कृपः - सरत्वान् ऋषेः पुत्रः

च-च

समितिञ्जयः - यः युद्दे जीतवान्

अश्वत्थामा - अश्वत्थामा

विकर्णः - दुर्योधनस्य अनुजः

सौमदत्तिः - भूरि श्रवस्

Downloaded from www.omkaravidya.com

अन्वयः

भवान् भीष्मः च कर्णः च समितिञ्जयः कृपः च अश्वत्थामा विकर्णः च सौमदत्तिः (सन्ति) ।

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये अष्टमः श्लोकः । राजा दुर्योधनः पाण्डवाणां सैन्यस्य मुख्यधीराणां नामानि उक्तवान् । तदनन्तरं सः स्वस्य सैन्यस्य मुख्यधीराणां नामानि च वक्तुम् आरब्धवान् । मम सैन्ये भवान् पितामहः भीष्मः कर्णः समितिञ्जयः कृपः च अश्वत्थामा विकर्णः भूरिश्रवस् च सन्ति ।

व्याकरणम्

सन्धिः

भीष्मश्च - भीष्मः + च - विसर्गसकारः श्चुत्वम्

कर्णश्च - कर्णः + च - विसर्गसकारः श्चुत्वम्

कृपश्च - कृपः + च - विसर्गसकारः श्चुत्वम्

सौमदत्तिस्तथा - सौमदत्तिः + तथा – विसर्गरेफः

तथैव – तथा + एव – वृद्धिसन्धिः

समासः

समितिञ्जयः - समतिं जयति यस्य सः समितञ्जयः - बहुव्रीहिः

अश्वत्थामा - अश्वस्य स्थामा इव स्थामा यस्य सः बहुव्रीहिः

विकर्णः - विशिष्टौ कर्णौ यस्य सः बहुव्रीहिः।

तद्धितान्तः

सौमदत्तिः - सोमदत्तस्य अपत्यं पुमान् ।

Downloaded from www.omkaravidya.com

मूलश्लोकः

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः: सर्वे युद्धविशारदाः ॥ 9 ॥

पदच्छेदः
अन्ये, च, बहवः, शूराः, मदर्थे, त्यक्तजीविताः नानाशस्त्रप्रहरणाः, सर्वे, युद्धविशारदाः

पदपरिचयः
अन्ये - अ. सर्व पु. प्र बहु
च - अव्ययम्
बहवः - उकार पु. प्र बहु
शूराः - अ. पुः प्र बहु
मदर्थे - अव्ययम्
त्यक्तजीविताः - अ. पु. प्र बहु
नानाशस्त्रप्रहरणाः - अ. पु. प्र बहु
सर्वे - अ. सर्व पु. प्र बहु
युद्धविशारदाः - अ. पु. प्र बहु

प्रतिपदार्थः
अन्ये - इतरे
च-च
बहवः - अनेक

Downloaded from www.omkaravidya.com

शूराः - विक्रान्ताः
मदर्थे - मम कृते
त्यक्तजीविताः - अर्पितप्राणाः
नानाशस्त्रप्रहरणाः – बहुशस्त्राः
सर्वे - सकलाः
युद्धविशारदाः - युद्धनिपुणाः

अन्वयः
अन्ये च बहवः नानाशस्त्रप्रहरणाः युद्धविशारदाः शूराः सर्वे मदर्थे त्यक्तजीविताः (सन्ति) ।

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये नवमः श्लोकः | राजा दुर्योधनः पाण्डवाणां सैन्यस्य मुख्यधीराणां नामानि उक्तवान् | तदनन्तरं सः स्वस्य सैन्यस्य मुख्यधीराणां नामानि च उक्तवान् | मम सैन्ये बहवः शूरा सन्ति | सर्वे मदर्थे स्वस्य प्राणन् अर्पणम् अपि करिष्यन्ति | ते बहवः शास्त्रप्रहरणाः युद्धविशारदाः च अपि |

व्याकरणम्
सन्धिः
शूरा मदर्थे - शूराः + मदर्थे - विसर्ग लोपः

समासः
त्यक्तजीविताः त्यक्तं जीवितं यैः बहुव्रीहिः।
नानाशस्त्रप्रहरणाः - नानाशस्त्राणि प्रहरणानि येषां ते - बहुव्रीहि
युद्धविशारदाः युद्धे विशारदाः - सप्तमि तत्पुरुषः
मदर्थे - मम अर्थे - षष्ठी तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ **10** ॥

पदच्छेदः
अपर्याप्तं ,तत्, अस्माकम्, बलम्, भीष्माभिरक्षितम् पर्याप्तम्, तु, इदम् ,एतेषाम्,बलम्,भीमाभिरक्षितम्

पदपरिचयः
अपर्याप्तम् - अ. नपु. प्र एक
तत् - दकार तद्न प्र एक
अस्माकं - दकार अस्मद् ष. बहु
बलम् - अ. नपु. प्र एक
भीष्माभिरक्षितम् - अ नपु प्र एक
पर्याप्तम् - अ. नपु. प्र एक
तु - अव्ययम्
इदम् - मकार. सर्व नपु प्र एक
एतेषाम् - दकार एतद् ष बहु
बलम् - अ नपु प्र एक
भीमाभिरक्षितम् अ नपु प्र एक

पदार्थः
अपर्याप्तम् - असमर्थम्

Downloaded from www.omkaravidya.com

तत्- तत्
अस्माकम्- कौरवाणाम्
बलम् - सैन्यम्
भीष्माभिरक्षितम्- भीष्मेण संरक्षितम्
पर्याप्तम् - समर्थम्
इदम् - इदम्
बलम् - सैन्यम्
एतेषाम् - पाण्डवानाम्
भीमाभिरक्षितम् - भीमेन संरक्षितम्

अन्वयः
भीष्माभिरक्षितम् तत् अस्माकं बलम् अपर्याप्तम् (अस्ति) । भिमाभिरक्षितं एतेषाम् इदं बलम् पर्याप्तम् (अस्ति) ।

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये दशमः श्लोकः । राजा दुर्योधनः पाण्डवाणां सैन्यस्य मुख्यधीराणां नामानि उक्तवान् । तदनन्तरं सः स्वस्य सैन्यस्य मुख्यधीराणां नामानि च उक्तवान् । अस्माकं सैन्यं भीष्मेण सरक्षितम् । तत् असमर्थम् । पाण्डवानां सैन्यं भीमेन रक्षितम् । तत् समर्थमेव ।

व्याकरणम्
सन्धिः
तत् + अस्माकं - जश्त्वसन्धिः
अपर्याप्तम् + तदस्माकं - अनुस्वारसन्धिः
बलम् + भीष्माभिरक्षितम् - अनुस्वारसन्धिः
तु + इदम् - यण् सन्धिः

Downloaded from www.omkaravidya.com

बलम् + भीमाभिरक्षितम् - अनुस्वार सन्धिः

समासः
अपर्याप्तम् - न पर्याप्तम् - नञ् तत्पुरुषः
भीष्मभिरक्षितम् भीष्मेण रक्षितम् तृतीया तत्पुरुषः
भीमाभिरक्षितम् - भीमेन रक्षितम् - तृतीया तत्पुरुषः

कृदन्तः
पर्याप्तम् - परि + आप् + क्त (कर्तरि)

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ **11** ॥

पदच्छेदः
अयनेषु च सर्वेषु यथाभागम् अवस्थिताः भीष्मम् एव अभिरक्षन्तु भवन्तः सर्वे एव हि

पदपरिचयः
अयनेषु - अ. नपु. स. बहु
च - अव्ययम्

Downloaded from www.omkaravidya.com

सर्वेषु - सर्व नपु स बहु

यथाभागम् - अव्ययम्

अवस्थिताः - अ. पु प्र बहु

भीष्मम् - अ. पु. द्वि एक

एव - अव्ययम्

अभिरक्षन्तु - लोट् प्र बहु

भवन्तः - तकार् पु प्र बहु

सर्वे - सर्व शब्दः प्र बहु

एव -अव्ययम्

हि - अव्ययम्

पदार्थः

अयनेषु - व्यूहेषु

च-च

सर्वेषु - सकलजनेषु

यथाभागम् - तेषाम् स्थले

अवस्थिताः - अवस्थिताः

भीष्मं - गङ्गापुत्रं

एव - एव

अभिरक्षन्तु - संरक्षन्तु

सर्वे -सकलाः

एव - एव

अन्वयः

सर्वेषु अयनेषु च यथाभागम् अवस्थिताः भवन्तः सर्वे एव हि भीष्मम् एव अभिरक्षन्तु ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः प्रथमे अध्याये एकादशः श्लोकः। राजा दुर्योधनः पाण्डवाणां मुख्यधीराणां नामानि उक्तवान्। तदनन्तरं सः स्वस्य सैन्यस्य मुख्यधीराणां नामानि च उक्तवान्। यथाभागम् अवस्थिताः भवन्तः सर्वे अस्माकं पितामहं भीष्मम् एव संरक्षन्तु।

व्याकरणम्
सन्धिः
एवाभिरक्षन्तु - एव + अभिरक्षन्तु - सवर्णदीर्घसन्धिः
सर्व एव -सर्वे + एव - यान्तवान्तदेशसन्धिः य लोपः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

तस्य सञ्जनयन् हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ 12॥

पदच्छेदः
तस्य, सञ्जनयन्, हर्षम्, कुरुवृद्धः, पितामहः सिंहनादम्, विनद्य, उच्चैः, शङ्खम्, दध्मौ, प्रतापवान्

पदपरिचयः
तस्य - दका.-सर्व.पु.ष.एक.
सञ्जनयन् - त.पु.प्र.एक.
हर्षम् - अ.पु.द्वि.एक.

Downloaded from www.omkaravidya.com

कुरुवृद्धः - अ.पु.प्र.एक.

पितामहः- अ.पु.प्र.एक.

सिंहनादम् - अव्ययम्

विनद्य - अव्ययम्

उच्चैः- अव्ययम्

शङ्खम् - अ.पुःद्वि.एक.

दध्मौ - लिट् प्रपु.एक.

प्रतापवान् - तका.पु.प्र.एक.

पदार्थः

प्रतापवान् - तेजस्वी

कुरुवृद्धः - कुरुषु ज्येष्ठः

पितामहः - भीष्मः

तस्य - दुर्योधनस्य

हर्षम् - मोदम्

सञ्जनयन् - उत्पादयन्

सिंहनादं विनद्य - सिंहः इव गर्जित्वा

शङ्खम् - शङ्खम्

उच्चैः - गाढम्

दध्मौ - आध्मातवान्

अन्वयः

प्रतापवान् कुरुवृद्धः पितामहः तस्य हर्ष सञ्जनयन् सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोकः प्रथमे अध्याये द्वादशः श्लोकः । राजा दुर्योधनः पाण्डवाणां मुख्यधीराणां नामानि उक्तवान् । तदनन्तरं सः स्वस्य सैन्यस्य मुख्यधीराणां नामानि च उक्तवान् । पश्चात् प्रतापवान् कुरुवृद्धः पितामहः भीष्मः सिंहः इव उच्चैः गर्जनम् अकरोत् । ततः शङ्खमपि उच्चैः अधमत् तेन दुर्योधनस्य महान् सन्तोषः जातः ।

व्याकरणम्

सन्धिः

हर्षं कुरुवृद्धः - हर्षम् + कुरुवृद्धः- अनुस्वारसन्धिः

विनद्योच्चैः - विनद्य + उच्चैः - गुणसन्धिः

सिंहनादं विनद्योच्चैः - सिंहनादम् + विनद्योच्चैः - अनुस्वारसन्धिः

शङ्खं दध्मौ - शङ्खम् + दध्मौ - अनुस्वारसन्धिः

समासः

कुरुवृद्धः  - कुरुषु वृद्धः - सप्तमीतत्पुरुषः

कृदन्तः

सञ्जनयन् - सम् + जन् + णिच् + शतृ

विनद्य - वि + नद् + ल्यप्

तद्धितान्तः

पितामहः - पितुः पिता

Downloaded from www.omkaravidya.com

मूलश्लोकः

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥13 ॥

पदच्छेदः
ततः, शङ्खाः, च, भेर्यः, च, पणवानकगोमुखाः सहसा, एव, अभ्यहन्यन्त, सः, शब्दः, तुमुलः,अभवत्

पदपरिचयः
ततः - अव्ययम्
शङ्खाः -अ. पुं. प्र. बहु.
च - अव्ययम्
भेर्यः इ. स्त्री. प्र. बहु.
पणवानकगोमुखाः- अ. पुं. प्र. बहु.
सहसा - अव्ययम्
एव - अव्ययम्
अभ्यहन्यन्त - लङ् प्रपु. बहु.
सः- द. सर्व. पुं. प्र. एक.
शब्दः -अ. पुं. प्र. एक.
तुमलः-अ. पुं. प्र. एक.
अभवत् - लङ् प्रपु एक.

पदार्थः

Downloaded from www.omkaravidya.com

ततः - तस्मिन् समये

शङ्खाः - शङ्खाः

च-च

भेर्यः - भेर्यः

पणवानकगोमुखाः- पणवाः आनकाः गोमुखाश्च

सहसा - शीघ्रम्

एव - एव

अभ्यहन्यन्त - नादिताः अभवन्

सः-सः

शब्दः - नादः

तुमुलः - घोरः

अभवत् - सञ्जातः

अन्वयः

ततः शङ्खाः च भेर्यः पणवानकगोमुखाः च सहसा एव अभ्यहन्यन्त। सः शब्दः तुमुलः अभवत्।

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये त्र्योदशः श्लोकः | राजा दुर्योधनः पाण्डवाणां मुख्यधीराणां नामानि उक्तवान् | तदनन्तरं सः स्वस्य सैन्यस्य मुख्यधीराणां नामानि च उक्तवान् | पश्चात् प्रतापवान् एतस्मिन् एव काले शङ्खानां धमनम् भेरीणां ताडनम् पणवानाम् आनकानां गोमुखानां च वादनमं सम्पन्नम्, येन सर्वत्र महान् शब्दः संजातः।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

शङ्खाश्च =शङ्खाः + च - विसर्गसकारः श्चुत्वम्

भेर्यश्च =भेर्यः + च - विसर्गसकारः श्चुत्वम्

सहसैवाभ्यहन्यन्त =सहसा + एव - वृद्धिसन्धिः

सहसैव + अभ्यहन्यन्त - सवर्णदीर्धसन्धिः

शब्दस्तुमुलोऽभवत् =शब्दः + तुमुलः - विसर्ग सकारः

तुमुलः + अभवत् - विसर्गउकारः पूर्वरूपम्

समासः

गोमुखः =गोः मुखम् इव मुखं यस्य सः बहुव्रीहिः।

पणवानकगोमुखाः= पणवाश्च आनकाश्च गोमुखाश्च - इतरेतर द्वन्द्वसमासः।

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ 14॥

पदच्छेदः

ततः, श्वेतैः, हयैः, युक्ते, महति, स्यन्दने, स्थितौ, माधवः, पाण्डवः, च, एव, दिव्यौ, शङ्खौ, प्रदध्मतुः

Downloaded from www.omkaravidya.com

पदपरिचयः

ततः - अव्ययम्

श्वेतैः - अ पु तृ बहु

हयैः - अपु तृ बहु

युक्तेः - अ पु स एक

महति - तकार पु. स एक

स्यन्दने - अ पु स एक

स्थितौ - अ. पु प्र द्वि

माधवः - अ पु प्र एक

पाण्डवः अ पु प्र एक

च - अव्ययम्

एव - अव्ययम्

दिव्यौ- अ पु द्वि द्वि

शङ्खौ - अ पु दवि दवि

प्रदध्मतुः - लिट् प्रपु दवि

पदार्थः

ततः - तस्मात्परम्

श्वेतैः – धवलैः

हयैः - अश्वैः

युक्तेः - संयुक्ते

महति - विशाले

स्यन्दने - रथे

स्थितौ - उपविष्टौ

माधवः - कृष्णः

पाण्डवः - अर्जुनः

Downloaded from www.omkaravidya.com

च-च

एव - एव

दिव्यौ- दिव्यौ

शङ्खौ - शङ्खौ

प्रदध्मतुः - ध्मातवन्तौ

अन्वयः

ततः श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ माधवः पाण्डवः च एव दिव्यौ शङ्खौ प्रदध्मतुः ।

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये चतुर्दशः श्लोकः | प्रतापवान् कुरुवृद्धःभीष्मः सन्तोषेण स्वस्य शङ्खं उच्चैः दध्मौ | अतः शङ्खाश्च भेर्यश्च पणवाः अनेकाः गोमुखाः च युगपत् अभ्यहन्यन्त | सः घोरः शब्दः सर्वत्र अभवत् ।पश्चात् श्वेतैः अश्वैः युक्ते महति रथे उपविष्टा श्री कृष्णः अर्जुनः च तयोः शङ्खौ प्रदध्मतुः |

व्याकरणम्

सन्धिः

श्वेतैः + हयैः – विसर्गरेफः

पाण्डवः + च - विसर्गसकारः

च + एव - वृद्धिसन्धिः

हयैः + युक्ते- विसर्गरेफः

तद्धितान्ताः

पाण्डवः - पाण्डोः अपत्यं पुमान् पाण्डवः

Downloaded from www.omkaravidya.com

मूलश्लोकः

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः॥15॥

पदच्छेदः
पाञ्चजन्यम्, हृषीकेशः, देवदत्तम्, धनञ्जयः पोण्ड्रम्, दध्मौ, महाशङ्खम्, भीमकर्मा, वृकोदरः

पदपरिचयः
पाञ्चजन्यम् - अ पु द्वि एक
हृषीकेशः - अ पु प्र एक
देवदत्तम् - अ पु द्वि एक
धनञ्जयः - अ पु प्र एक
पौण्ड्रम् - अ पु. द्वि एक
दध्मौ - धम् लिट् प्र एक
महाशङ्खम् - अ पु द्वि एक
भीमाकर्मा - न पु प्र एक
वृकोदरः - अ पु प्र एक

प्रतिपदार्थः
पाञ्चजन्यम् - कृष्णस्य शङ्खः
हृषीकेशः - कृष्णः
देवदत्तम् - अर्जुनस्य शङ्खः

Downloaded from www.omkaravidya.com

धनञ्जयः - अर्जुनः

पौण्ड्रम् - भीमस्य शङ्खः

दध्मौ - अधमत्

महाशङ्खम् - महाशङ्खम्

भीमाकर्मा – भयङ्करकार्यकारः

वृकोदरः - भीमः

अन्वयः

हृषीकेशः पाञ्चजन्यं धनञ्जयः देवदत्तं भीमकर्मा वृकोदरः महाशङ्खं पौण्ड्रं दध्मौ ।

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये पञ्चादशः श्लोकः | अतः हृषीकेशः पाञ्चजन्यं धनञ्जयः देवदत्तं भीमकर्मा वृकोदरः महाशङ्खं पौण्ड्रम् च दध्मौ |

व्याकरणम्

सन्धिः

पाञ्चजन्यम् + हृषीकेशः - अनुस्वारसन्धिः

देवदत्तम् + धनञ्जयः - अनुस्वारसन्धिः

हषीकशः + देवदत्तं - विसर्गउकारः

महाशङ्खम् + भीमकर्मा - अनुस्वारसन्धिः

पौण्ड्रं + दध्मौ -अनुस्वारसन्धिः

समासः

हृषीकेशः हषीकाणाम् ईशः - षष्ठीतत्पुरुषः

महासङ्खम् - महान् सङ्खः कर्मधारयसमासः तम्

वृकोदरः - वृकस्य उदरम् इव उदरम् यस्य सः - बहुव्रीहि

देवदत्तम् - देवेन दत्तम् - तृतीयातत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥16॥

पदच्छेदः
अनन्तविजयं राजा कुन्तीपुत्रः युधिष्ठिरः नकुलः सहदेवः च सुघोषमणिपुष्पकौ

पदपरिचयः
अनन्तविजयं - अ. पु द्वि एक
राजा - न पु प्र एक
कुन्तीपुत्रः - अ. पु. प्र. एक
युधिष्ठिरः - अ. पु. प्र. एक
नकुलः - अ. पु. प्र. एक
सहदेवः - अ. पु. प्र. एक
च - अव्ययम्
सुघोषमणिपुष्पकौ - अ. पु. द्वि द्विवच

पदार्थः
अनन्तविजयं - युधिष्ठिरस्य शङ्खम्
राजा- नृपः
कुन्तीपुत्रः - कुन्तीसुतः
युधिष्ठिरः - धर्मपुत्रः
नकुलः - नकुलः
सहदेवः - सहदेवः

Downloaded from www.omkaravidya.com

च-च
सुघोषमणिपुष्पकौ - नकुलसहदेवयोः शङ्खयोः नाम्नी

अन्वयः
कुन्तीपुत्रः राजा युधिष्ठिरः अनन्तविजयं (दध्मौ) नकुलः सहदेवः च सुघोषमणिपुष्पकौ (दध्मतुः)

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये षोडषः श्लोकः। हृषीकेशः अर्जुनः भीमः च दध्मौ। कुन्तीपुत्रः राजा युधिष्ठिरः अनन्तविजयं दध्मौ। नकुलः सहदेवः च दध्मुः सुघोषमणिपुष्पकौ दध्मतुः।

व्याकरणम्
सन्धिः
अनन्तविजयं राजा - अनन्तविजयम् राजा - अनुस्वारसन्धिः
कुन्तीपुत्रो युधिष्ठिरः- कुन्तीपुत्रः युधिष्ठिरः- विसर्गउकारः
सहदेवश्च - सहदेवः + च - विसर्गसकारः

समासः
युधिष्ठिरः - युधिः स्थिरः - सप्तमीतत्पुरुषः
कुन्तीपुत्रः कुन्त्या पुत्रः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥17॥

पदच्छेदः
काश्यः च परमेष्वासः शिखण्डी च महारथः धृष्टद्युम्नः विराटः च सात्यकिः च अपराजितः

पदपरिचयः
काश्यः - अकार. पु. प्र. एक
च - अव्ययम्
परमेष्वासः - अकार. पु. प्र. एक
शिखण्डी - नकार. पु. प्र. एक
च - अव्ययम्
महारथः - अकार. पु. प्र. एक
धृष्टद्युम्नः - अकार. पु. प्र. एक
विराटः - अकार. पु. प्र. एक
च - अव्ययम्
सात्यकिः - इकार. पु प्र. एक
च - अव्ययम्
अपराजितः - अकार. पु. प्र. एक

पदार्थः

Downloaded from www.omkaravidya.com

काश्यः - काशीराजा

च -च

परमेष्वासः - श्रेष्टधनुर्धरः

शिखण्डी - शिखण्डी

च-च

महारथः - महारथः

धृष्टद्युम्नः – धृष्टद्युम्नः

विराटः - विराट राजा

च-च

सात्यकिः - सत्यकस्य पुत्रः

च-च

अपराजितः - अजयं न प्राप्तवान्

अन्वयः

परमेष्वासः काश्यः महारथः शिखण्डी धृष्टद्युम्नः विराटः च अपराजितः सात्यकिः च (दध्मुः) ।

तात्पर्यम्

अयं श्लोकः प्रथम अध्याये सप्तदशः श्लोकः । हृषीकेशः अर्जुनः भीमः नकुल सहदेवः च दध्मः । ततः परमेष्वासः काशीराजा महारथः शिखण्डी धृष्टद्युम्नः विराटः च अपराजितः सात्यकिः च दध्मुः ।

व्याकरणम्

सन्धिः

काश्यश्च - काश्यः+ च - विसर्गसकारः

धृष्टद्युम्नो विराटः - धृष्टद्युम्नः + विराटः - विसर्गउकारः

विराटश्च - विराटः + च - विसर्गसकारः

सात्यकिश्च - सात्यकिः + च - विसर्गसकारः

चापराजितःः - च + अपराजितः - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

समासः
परमेष्वासः परम इष्वासः यस्य सः बहुव्रीहिः
अपराजितः - न पराजितः - नञ् समासः

तद्धितान्तः
सत्यकस्य अपत्यम् पुमान - सात्यकिः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक् पृथक् ॥18॥

पदच्छेदः

द्रुपदः द्रौपदेयाः च सर्वशः पृथिवीपते सौभद्रः च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक्

पदपरिचयः
द्रुपदः - अकार. पु. प्र एक
द्रौपदेयाः - अकार. पु. प्र बहु
च- अव्ययम्
सर्वशः - अव्ययम्
पृथिवीपते - इकार. पु. सम् प्र

Downloaded from www.omkaravidya.com

सौभद्रः - अकार. पु. प्र एक

च - अव्ययम्

महाबाहुः - उकार. पु. प्र एक

शङ्खान् - अकार. पु. दवि बहु

दध्मुः - ध्मा लिट् प्रपु बहु

पृथक् - अव्ययम्

पृथक् - अव्ययम्

पदार्थः

द्रुपदः - द्रुपदः

द्रौपदेयाः - द्रौपद्याः पुत्राः

च-च

सर्वशः - सर्वासु दिक्शु

पृथिवीपते – धृतराष्ट्र

सौभद्रः - अभिमन्युः

च-च

महाबाहुः - महाबाहुः

शङ्खान् - शङ्खान्

दध्मुः - अधमन्

पृथक् - भिन्न

पृथक् - भिन्न

अन्वयः

पृथिवीपते ! द्रुपदः द्रौपदेयाः महाबाहुः सौभद्रः च सर्वशः पृथक् पृथक् शङ्खान् दध्मुः ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः प्रथमे अध्याये अष्टादशः श्लोकः । हृषीकेशः अर्जुनः भीमः नकुल सहदेवः च दध्मुः | ततः परमेष्वासः काशीराजा महारथः शिखण्डी धृष्टद्युम्नः विराटः च अपराजितः सात्यकिः च दध्मुः | पश्चात् संजयः एवं अवदत् हे पृथिवीपते ! द्रुपदः द्रौपद्याः पुत्राः महाबाहुः शौभद्रः च सर्वश : पृथक् पृथक् शङ्खान् दध्मुः |

व्याकरणम्

सन्धिः

द्रुपदो द्रौपदेयाश्च - द्रुपदः + द्रौपदेयाश्च - विसर्गउकारः

द्रौपदेयाश्च - द्रौपदेयाः + च विसर्गसकारः

सौभद्रश्च - सौभद्रः + च - विसर्गसकारः

समासः

महाबाहुः - महन्तौ बाहू यस्य स – बहुव्रीहिसमासः

तद्धितान्तः

द्रौपद्याः अपत्यं पुंसः द्रौपदेयाः

शुभद्रयाः अपत्यं पुमान् शौभद्रः

Downloaded from www.omkaravidya.com

मूलश्लोकः

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥19॥

पदच्छेदः
सः घोषः धार्तराष्ट्राणां हृदयानि व्यदारयत् नभः च पृथिवीं च एव तुमुलः व्यनुनादयन्

पदपरिचयः
सः- दकार पु प्र एक
घोषः - अ. पु. प्र एक
धार्तराष्ट्राणां - अ. पु. ष बहु
हृदयानि - अ. नपु. दवि बहु
व्यदारयत् - लङ प्रपु एक
नभः - सकार नपु द्वि. ऐक
च - अव्ययम्
पृथिवीं - ई स्त्री दवि एक
च - अव्ययम्
एव - अव्ययम्
तुमुलः - अ. पु. प्र एक
व्यनुनादयन् - लङ् प्र पु बहु

पदार्थः

Downloaded from www.omkaravidya.com

सः - सः

घोषः - नादः

धार्तराष्ट्राणां - कौरवाणाम्

हृदयानि - मनांसि

व्यदारयत् - आखण्डयत्

नभः - आकाशम्

च-च

पृथिवीं - भूमिं

च-च

एव - एव

तुमुलः - घोरः

व्यनुनादयन् - प्रतिध्वनयन्

अन्वयः

सः तुमुलः घोषः नभः पृथिवीं च एव व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् च ।

तात्पर्यम्

अयं श्लोकः प्रथम अध्याये एकोनविंशतितमः श्लोकः | हृषीकेशः अर्जुनः भीमः नकुल सहदेवः च  दध्मुः | अतः परमेष्वासः काशीराजा महारथः शिखण्डी धृष्टद्युम्नः विराटः च अपराजितः सात्यकिः च दध्मुः । सः तुमुलः घोषः नभः पृथिवीं च व्यनुनादयन् कौरवाणां हृदयानि व्यदारयत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

स घोषो - सः + घोषः - विसर्गलोपः

घोषः धार्तराष्ट्राणां - घोषो धार्तराष्ट्राणां - विसर्गउकारः

धार्तराष्ट्राणां हृदयानि - धार्तराष्ट्राणाम् + हृदयानि - अशनुस्वार सन्धिः

नभश्च - नभः + च विसर्गसकारः

पृथिवीं + च - पृथिवीम् + च - अनुस्वारसन्धिः

चैव - च + एव - वृद्धिसन्धिः

तुमुलो व्यनुनादयन् - तुमुलः + व्यनुनादयन् - विसर्गउकारः

तद्धितान्तः

धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रः ते धार्तराष्ट्राः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥20॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।

पदच्छेदः

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनुः उद्यम्य पाण्डवः हृषीकेशं तदा वाक्यम् इदमाह महीपते

Downloaded from www.omkaravidya.com

पदपरिचयः

अथ - अव्ययम्

व्यवस्थितान् - अ.पु. द्वि बहु

दृष्ट्वा – क्त्वान्तम्

धार्तराष्ट्रान् - अ.पु . दवि बहु

कपिध्वजः - अ.पु . प्र एक

प्रवृत्ते - अ.पु . स. एक

शस्त्रसंपाते - अ.पु . स एक

धनुः - षकार. नपु. द्वि एक

उद्यम्य – ल्यबन्तम्

पाण्डवः - अ.पु . प्र एक

हृषीकेशं - अ.पु . द्वि एक

तदा - अव्ययम्

वाक्यम् - अ.नपु . द्वि एक

इदम् - मकार नपु . द्वि एक

आह - ब्रुञ् लट् प्रपु एक

महीपते - इ पु संप्र एक

पदार्थः

अथ - ततः

व्यवस्थितान् - व्यवस्थितान्

दृष्ट्वा - वीक्ष्य

धार्तराष्ट्रान् - कौरवान्

कपिध्वजः - वानरकेतुः

प्रवृत्ते - प्रवृत्ते

शस्त्रसंपाते - आयुधपाते

Downloaded from www.omkaravidya.com

धनुः - चापं
उद्यम्य - उद्यम्य
पाण्डवः - अर्जुनः
हृषीकेशं - कृष्णं
तदा - तस्मिन् समये
वाक्यम् - वचनं
इदम् - इदम्
आह - वदति
महीपते - हे धृतराष्ट्र

अन्वयः
महीपते ! अथ कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते धनुः उद्यम्य तदा हृषीकेशम् इदम् वाकयम् आह ।

तात्पर्यम्
अयं श्लोकः प्रथमाध्याये विंशतितमः श्लोकः । हृषीकेशः अर्जुनः भीमः नकुल सहदेवः च शङ्खान् दध्मुः । ततः परमेष्वासः काशीराजा महारथः शिखण्डी धृष्टद्युम्नः विराटः च अपराजितः सात्यकिः च दध्मुः । सः तुमुलः घोषः नभः पृथिवी च व्यनुनादयन् कौरवाणां हृदयानि व्यदारयत् । अथ कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते धनुः उद्यम्य तदा हृषीकेशम् इदम् वाकयम् आह ।

व्याकरणम्
सन्धिः
धनुरुद्यम्य - धनुः + उद्यम्य - विसर्गरेफः
हृषीकेशं तदा - हृषीकेशम् + तदा - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

समासः
कपिध्वजः- ध्वजे कपिः यस्य सः - व्यधिकरणबहुव्रीहिसमासः
शस्त्रसंपाते - शस्त्राणाम् संपातः तस्मिन् षष्ठीतत्पुरुषः
हृषीकेशः हृषीकाणाम् ईशः - तम् षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

अर्जुन उवाच
सेनयोरभयोर्मध्ये रथं स्थापय मेऽच्युत ॥21॥

पदच्छेदः
सेनयो: उभयो: मध्ये रथं स्थापय मे अच्युत

पदपरिचयः
सेनयोः - आ.स्त्री. ष. द्वि
उभयो: - आ.स्त्री. ष. द्वि
मध्ये -= अ.पु. स. ऐक
रथं - अ पु द्वि एक
स्थापय - स्था लोट् मपु एक
मे - दका अस्मद् सर्व ष. एक
अच्युत - अ पु सं प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
सेनयोः - सैन्ययोः
उभयोः - द्वयोः
मध्ये - मध्ये
रथं - स्यन्दनं
स्थापय - स्थापय
मे - मम
अच्युत - कृष्ण

अन्वयः
हे अच्युत ! सेनयोः उभयोः मध्ये मे रथं स्थापय ।

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये द्वाविंशतितमः श्लोकः । राजा दुर्योधनः पाण्डवाणां कौरवाणां च मुख्यधीराणां नामानि उक्तवान् । पश्चात् प्रतापवान् कुरुवृद्धःभीष्मः सन्तोषेण स्वस्य शङ्खं उच्चैः दध्मौ । ततः शङ्खाश्च पणवाः अनेकाः गोमुखाः च युगपदेव अभ्यहन्यन्त । ततः हृषीकेशः अर्जुनः भीमः नकुल सहदेवः च दध्मुः । ततः सर्वे दध्मः । सः तुमुलः घोषः नभः पृथिवीं च व्यनुनादयन् कौरवाणां हृदयानि व्यदारयत् । अथ कपित्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् इष्ट्वा शस्त्रसम्पाते प्रवृत्ते धनुः उद्यम्य तदा हृषीकेशम् इदम् वाकयम् आह । हे कृष्ण सैन्ययोः उभयोः मध्ये मम रथं स्थापय ।

व्याकरणम्
सन्धिः

Downloaded from www.omkaravidya.com

सेनयोः + उपयोः - विसर्गरेफः
उभयोः + मध्ये - विसर्गरेफः
रथम् + स्थापय - अनुस्वारसन्धिः
मे + अच्युत - पूर्वरूपसन्धिः

समासः
अच्युतः न च्युतः - नञ्तत्पुरुषः समासः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ 22 ॥

पदच्छेदः
यावत् एतान निरीक्षे अहं योद्धुकामान् अवस्थितान् कैः मया सह योद्धव्यम् अस्मिन् रणसमुद्यमे

पदपरिचयः
यावत् - अव्ययम्
एतान् - दकार. एतद् पु. द्वि बहु
निरीक्षे - लट् उपु एक
अहं - दकार. अस्मद् प्र एक
योद्धुकामान् - अकार.पु. द्वि बहु

Downloaded from www.omkaravidya.com

अवस्थितान् - अकार. पु. द्वि बहु
कैः - मकार. पु तृ बहु
मया - दकार. अस्मद् पु. तृ एक
सह - अव्ययम्
योद्धव्यम् - अकार. नपु प्र एक
अस्मिन् - मकार. इदम् पु स एक
रणसमुद्यते - अ. पु स एक

पदार्थः
यावत् - यावत्
एतान - इमान्
निरीक्षे - अवलोकयामि
अहं - अहम्
योद्धकामान् - युद्धं कर्तुं इष्टवतः
अवस्थितान् - स्थितान्
कैः - कैः
मया - मया
सह - साकम्
योद्धव्यम् - युद्धं कर्तव्यम्
अस्मिन् - अस्मिन्
रणसमुद्यतमे - युद्धे

अन्वयः
यावत् अहं अस्मिन् रणसमुद्यमे कैः सह मया योद्धव्यम् (इति)
अवस्तिथान् एतान् योद्धकामान् निरीक्षे ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये द्वाविंशतितमः श्लोकः। हृषीकेशः अर्जुनः भीमः नकुल सहदेवः शङ्खान् च दध्मुः। ततः सर्वे दध्मः । सः तुमुलः घोषः नभः पृथिवीं च व्यनुनादयन् कौरवाणां हृदयानि व्यदारयत्। ततः अर्जुनः सैन्ययोः उभयोः मध्ये गच्छ इति कृष्णम् प्रति उक्तवान्। ततः अर्जुनः अस्मिन् रणसमुद्यमे मया कैः सह योद्धव्यं इति अवस्थितान् एतान् योद्धुकामान् निरीक्षे। एवम् अवदत्।

व्याकरणम्

सन्धिः
यावदेतान - यावत् + एतान् - जश्त्वसन्धि
निरीक्षेऽहं - निरीक्षे + अहम् - पूर्वरूपसन्धिः
कैर्मया - कैः + मया - विसर्गरेफः

समासः
योद्धुकामान् - योद्धुं कामः येषाम् ते, तान् बहुव्रीहिः
रणसमुद्यते - रणस्य समुद्यमः तस्मिन षष्ठीतत्पुरुषः

कृदन्तः
योद्धव्यम् - युध् + तव्यत् प्रत्ययः
अवस्थितः - अव + स्था + क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥23॥

पदच्छेदः
योत्स्यमानान् अवेक्षे अहं ये एते अत्र समागताः धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः

पदपरिचयः
योत्स्यमानान् - अकार. पु द्वि बहु
अवेक्षे - लट् उपु एक
अहं - दकार. अस्मद् पु प्र एक
ये - दकार. यद् पु प्र बहु
एते - दकार. एतद् पु प्र बहु
अत्र - अव्ययम्
समागताः - अकार. पु प्र बहु
धार्तराष्ट्रस्य - अकार. पु. ष. एक
दुर्बुद्धेः - इकार. स्त्री.ष. एक
युद्धे - अकार. नपु स. एक
प्रियचिकीर्षवः - उकार. पु प्र बहु

पदार्थः
योत्स्यमानान् - युद्धं करिष्यमाणानान्

Downloaded from www.omkaravidya.com

अवेक्षे - पश्यामि

अहं - अहम्

ये-ये

एते - इमे

अत्र - अस्मिन् स्थाने

समागताः - आगताः

धार्तराष्ट्रस्य - दुर्योधनस्य

दुर्बुद्धेः - दुष्टमतेः

युद्धे - रणे

प्रियचिकीर्षवः - प्रियं कर्तुं इच्छवः

अन्वयः

अत्र युद्धे दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचकीर्षवः ये एते समागताः (इति) अहम् योत्स्यमानान् अवेक्षे ।

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये त्रयोविंशतितमः श्लोकः | हृषीकेशः अर्जुनः भीमः नकुल सहदेवः शङ्खान् च दध्मुः | ततः सर्वे दध्मः | सः तुमुलः घोषः नभः पृथिवीं च व्यनुनादयन् कौरवाणां हृदयानि व्यदारयत् | ततः अर्जुनः सैन्ययोः उभयोः मध्ये गच्छ इति कृष्णम् प्रति उक्तवान् । अर्जुनः अस्मिन् रणसमुद्यमे मया कैः सह योद्धव्यं इति पश्यति एवम् अवदत् | तत : अत्र युद्धे दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः ये एते समागताः तान् अर्जुनः योत्स्यमानान् अवेक्षते ।

व्याकरणम्

सन्धिः

Downloaded from www.omkaravidya.com

अवेक्षेऽहं - अवेक्षे + अहम् - पूर्वरूपसन्धिः
य एते - ये + एते - यान्तवान्तसन्धिः य लोपः
एतेऽत्र - एते + अत्र - पूर्वरूपसन्धिः
दुर्बुद्धेर्युद्धे - दुर्बुद्धेः + युद्धे - विसर्गरेफः

समासः
प्रियचिकीर्षवः - प्रियम् चिकीर्षवः - द्वितीयातत्पुरुषः

कृदन्तः
समागताः - सम् + आ + गम् + क्त प्रत्ययः
योत्स्यमानान् - युध् + लृट् शानच् प्रत्ययः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥24॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान् कुरूनिति ॥25॥

पदच्छेदः
एवम् उक्तः हृषीकेशः गुडाकेशेन भारत सेनयोः उभयोः मध्ये स्थापयित्वा रथोत्तमम् भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् उवाच पार्थ पश्य एतान् समवेतान् कुरुन् इति

Downloaded from www.omkaravidya.com

पदपरिचयः

एवम् - अव्ययम्

उक्तः- अकार. पु. प्र. एक

हृषीकेशः - अकार. पु. प्र. एक

गुडाकेशेन - अकार. पु. तृ एक

भारत - अकार. पु. सं. प्र. एक

सेनयोः आकार. स्त्री ष. द्वि

उभयोः - आकार. स्त्री ष. द्वि

मध्ये - अकार. पु. स एक

स्थापयित्वा – क्तवान्तम्

रथोत्तमम् - अकार. पु. दवि. एक

भीष्मद्रोणप्रमुखतः - अव्ययम्

सर्वेषां - अ.पुं. ष. बहु

च - अव्ययम्

महीक्षिताम् - तकार पुं. ष. बहु

उवाच - लिट् प्र पु एक

पार्थे - अ.पु. सं प्र. एक

पश्य - लोट् म पु ऐक

एतान् - दकार.पुं. द्वि. बहु

समवेतान् - अ. पु. द्वि. बहु

कुरून् - उ. पुं. द्वि. बहु

इति - अव्ययम्

पदार्थः

एवम् - एवम्

Downloaded from www.omkaravidya.com

उक्तः - कथितः

हृषीकेशः - श्रीकृष्णः

गुडाकेशेन - अर्जुनेन

भारत - धृतराष्ट्र

सेनयोः - सैन्ययोः

उभयोः - द्वयोः

मध्ये - अन्तरे

स्थापयित्वा - अवस्थाप्य

रथोत्तमम् - रथश्रेष्ठम्

भीष्मद्रोणप्रमुखतः - भीष्मद्रोणादीनां सम्मुखे

सर्वेषां - सर्वजनानाम्

च-च

महीक्षिताम् - राज्ञां

उवाच - अब्रवीत्

पार्थ - अर्जुन

पश्य - वीक्ष्य

एतान् - इमान्

समवेतान् - संमिलितान्

कुरून् - कुरूवंशीयान्

इति - एवम्

अन्वयः

हे भारत! गुडाकेशेन एवम् उक्तः हृषीकेशः उभयोः सेनयोः मध्ये रथोत्तमं स्थापयित्वा हे पार्थ ! “भीष्मद्रोणप्रमुखतः सर्वेषां महीक्षिताम् (प्रमुखतः) च समवेतान् एतान् कुरून् पश्य” इति उवाच ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये चतुर्विंशतितमः च पञ्चविंशतितमः श्लोकौ । अर्जुनः अस्मिन् रणसमुद्यमे "मया कैः सह योद्धव्यं"? इति पृच्छति | हे भारत! गुडाकेशेन एवम् उक्तः हृषीकेशः उभयोः सेनयोः मध्ये रथोत्तमं स्थापयिवा हे पार्थ ! “भीष्मद्रोणप्रमुखतः सर्वेषां महीक्षिताम् प्रमुखतः च समवेतान् एतान् कुरुन् पश्य” इति अवदत् |

व्याकरणम्

सन्धिः

एवमुक्तो हृषीकेशोः - एवमुक्तः + हृषीकेशः विसर्गउकारः

हृषीकेशो गुडाकेशेन - हृषीकेशः + गुडाकेशेन - विसर्गउकारः

सेनयोरुभयोर्मध्ये - सेनयोः उभयोर्मध्ये - विसर्गरेफः

उभयोर्मध्ये - उभयोः + मध्ये - विसर्ग रेफः

सर्बेषां च - सर्वेषाम् + च - अनुस्वारसन्धिः

समासः

गुडाकेशः - गुडाकायाः ईशः षष्टितत्पुरुषः:

हृषीकेशः - हृषीकाणम् ईशः षष्टितत्पुरुषः

रथोत्तमं - रथेषु उत्तमम् सप्तमितत्पुरुषः

भीष्मद्रोणप्रमुखतः भीष्मद्रोणयोः प्रमुखम् षष्ठीतत्पुरुषः

कृदन्तः

उक्तः - वच् + क्त प्रत्ययः      स्थापयित्वा - स्था + णिच् प्रत्ययः

तद्धितान्तः

भारतः - भरतस्य गोत्रापत्यं पुमान् भारतः

पार्थः - पृथायाः अपत्यं पुमान् पार्थः

Downloaded from www.omkaravidya.com

मूलश्लोकः

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥26॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।

पदच्छेदः
तत्र अपश्यत् स्थितान् पार्थः पितॄन् अथ पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् तथा श्वशुरान् सुहृदः च एव सेनयोः उभयोः अपि

पदपरिचयः
तत्र - अव्ययम्
अपश्यत् - लङ् प्रपु एक
स्थितान् - अकार.पु. द्वि बहु
पार्थः - अकार.पु. प्र एक
पितॄन् - ऋकार.पु. दवि बहु
अथ - अव्ययम्
पितामहान् - अकार.पु. द्वि बहु
आचार्यान् - अकार.पु. द्वि बहु
मातुलान् - अकार.पु. दवि बहु
भ्रातॄन् - ऋकार.पु. द्वि बहु
पुत्रान्- अकार.पु. द्वि बहु
पौत्रान् - अकार.पु. द्वि बहु
सखीन् - इकार पु. द्वि बहु

Downloaded from www.omkaravidya.com

तथा - अव्ययम्
श्वशुरान् - अकार.पु. द्वि बहु
सुहृदः - दकार पु द्वि बहु
च - अव्ययम्
एव - अव्ययम्
सेनयोः - आ. स्त्री ष द्वि
उभयोः - आ.स्त्री ष. द्वि
अपि - अव्ययम्

पदार्थः
तत्र - तस्मिन प्रदेशे
अपश्यत् - दृष्टवान्
स्थितान् - स्थितान्
पार्थः - अर्जुनः
पितॄन् - पितॄन्
अथ - ततः
पितामहान् - पितुः पितॄन्
आचार्यान् - गुरून्
मातुलान् - मातृसहोदरान्
भ्रातॄन् - सहोदरान्
पुत्रान् - पुत्रान्
पौत्रान् - पुत्रस्य पुत्रान्
तथा - तथा
श्वशुरान् - भार्यया: पितॄन्
सुहृदः - कृतोपकारान्
च-च

Downloaded from www.omkaravidya.com

एव - एव
सेनयोः - सैन्ययोः
उभयोः - द्वयोः
अपि - अपि

अन्वयः
अथ पार्थः तत्र उभयोः सेनयोः अपि स्थितान् पितॄन् पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् तथा श्वशुरान् सुहृद एव च अपश्यत् ।

तात्पर्यम्
अयं श्लोकः प्रथमाध्याये षड्विंशतितमः श्लोकः । अथ पार्थः तत्र उभयोः सेनयोः अपि स्थितान् पितॄन् पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् तथा श्वशुरान् सुहृदः एव च अपश्यत् ।

व्याकरणम्
सन्धिः
तत्र + पश्यत् - सवर्णदीर्घसन्धिः
सखीन् + तथा - सत्वसन्धिः
सुहृदः + च - विसर्गसकारः
च + एव - वृद्धिसन्धिः
सेनयोः + उभयोः - विसर्गरेफः
उभयोः + अपि – विसर्गरेफः

तद्धितान्तः
पुत्रस्य अपत्यं पुमान् पौत्रः

Downloaded from www.omkaravidya.com

मूलश्लोकः

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥27॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत्।

पदच्छेदः
तान्, समीक्ष्य, सः, कौन्तेयः, सर्वान्, बन्धून्, अवस्थितान् कृपया, परया, आविष्टः, विषीदन्, इदम्, अब्रवीत्

पदपरिचयः
तान् - द. सर्व. पुं. द्वि. बहु.
समीक्ष्य - अव्ययम्
सः - द. सर्व. पुं. प्र. एक
कौन्तेयः - अ. पुं. प्र. एक.
सर्वान् - सर्व. अ. पुं. द्वि. बहु.
बन्धून् - उ. पुं. द्वि. बहु.
अवस्थितान् - अ. पुं. द्वि. बहु.
कृपया - आ. स्त्री. तृ. एक.
परया - आ. स्त्री. तृ. एक.
आविष्टः - अ. पुं. प्र. एक.
विषीदन् - विषीदत् -त.पु.प्र.एक.
इदम् - म. सर्व. नपुं. द्वि. एक.
अब्रवीत् - ब्रूञ् -पर. लङ्. प्रपु. एक.

Downloaded from www.omkaravidya.com

पदार्थः

परया -अधिकतया

कृपया - दयया

आविष्टः - सहितः

सः कौन्तेय - सः अर्जुनः

तान् - तान्

सर्वान् - अखिलान्

अवस्थितान् - उपस्थितान्

बन्धून् - बान्धवान्

समीक्ष्य - अवलोक्य

विषीदन् - सन्तप्यमानः

इदम् - एतत्

अब्रवीत् - अवदत्

अन्वयः

सः कौन्तेयः तान् सर्वान् अवस्थितान् बन्धून् समीक्ष्य परया कृपया आविष्टः विषीदन् इदम् अब्रवीत्।

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये सप्तविंशतितमः श्लोकः | अर्जुनः तत्र सम्मिलितान् सर्वान् बान्धवान् दृष्ट्वा करुणया आविष्टः अभवत्। सः अत्यन्तं विषादम् अनुभवन् इदं वाक्यं अवदत्।

व्याकरणम्

सन्धिः

Downloaded from www.omkaravidya.com

स + कौन्तेयः - विसर्गलोपः
परया +आविष्टः - सवर्णदीर्घसन्धिः।
आविष्टः + विषीदन् - विसर्गउकारः
विषीदन् +इदम् - ङमुडागमसन्तिः।

कृदन्तः
आविष्टः - आ + विश् + क्त (कर्मणि)

अवस्थितान् - अव + स्था +इण् + क्त (कर्तरि)
समीक्ष्य - सम् + ईक्ष + ल्यप्
विषीदन् - वि + सद् + शत् (कर्तरि)

तद्धितान्तः
कुन्त्याः अपत्यं पुमान् कौन्तेयः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥28॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।

पदच्छेदः
दृष्ट्वा इमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् सीदन्ति मम गात्राणि मुखं च परिशुष्यति

Downloaded from www.omkaravidya.com

पदपरिचयः

दृष्ट्वा – क्त्वान्तम्

इमं - मकार. पु. द्वि एक

स्वजनं - अकार. पु द्वि एक

कृष्ण - अकार. पु सं प्र एक

युयुत्सुं - उकार. पु द्वि एक

समुपस्थितम् - अकार. पु द्वि एक

सीदन्ति - लट् प्रपु बहु

मम - दकार. अस्मद् ष. एक

गात्राणि - अकार. नपु प्र बहु

मुखं - अकार. नपु प्र एक

च - अव्ययम्

परिशुष्यति -लट् प्रपु एक

पदार्थः

दृष्ट्वा - अवलोक्य

इमं - इमम्

स्वजनं - बन्धून्

कृष्ण - हे कृष्ण

युयुत्सुं - योद्धुं इच्छुम्

समुपस्थितम् - समीपे वर्तमानम्

सीदन्ति - शिथिति भवति

मम - मम

गात्राणि - अङ्गानि

मुखं - वदनम्

च-च परिशुष्यति - शुष्कं भवति

Downloaded from www.omkaravidya.com

अन्वयः

हे कृष्ण ! युयुत्सुं समुपस्थितम् इमं स्वजनं दृष्ट्वा मम गात्रणि सीदन्ति मुखं च परिशुष्यति ।

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये अष्टाविंशतितमः श्लोकः । अर्जुनः एवम् अवदत् । हे कृष्ण! युयुत्सुं समुपस्थितम् इमम् स्वजनं दृष्ट्वा मम गात्रणि सीदन्ति मुखं च परिशुष्यति ।

व्याकरणम्

सन्धिः

दृष्ट्वा + इमं - गुणसन्धिः

इमम् + स्वजनं - अनुस्वारसन्धिः

स्वजनम् + कृष्ण - अनुस्वार सन्धिः

युयुत्सुम् + समुपस्थितम् - अनुस्वारसन्धिः

मुखम् + च - अनुस्वारसन्धिः

समासः

स्वजनम् - स्वस्य जनम् - षष्ठीतत्पुरुषः

कृदन्ताः

समुपस्थितम् - सम् + उप + स्था +क्त प्रत्ययः

दृष्ट्वा - दृशिर् + क्त्वा प्रत्ययः

सन्नन्तः

युयुत्सुं – योद्धुम् इच्छुः तम्

Downloaded from www.omkaravidya.com

मूलश्लोकः
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥29॥

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥30॥

पदच्छेदः
वेपथुः च शरीरे मे रोमहर्षः च जायते गाण्डीवं स्रंसते हस्तात् त्वक् च एव परिदह्यते न च शक्नोमि अवस्थातुं भ्रमति इव च मे मनः

पदपरिचयः
वेपथुः - उकार. पु. प्र एक
च - अव्ययम्
शरीरे - अकार. नपु. स. एक
मे - दकार. पु. ष. एक
रोमहर्षः - अकार. पु. प्र एक
च - अव्ययम्
जायते - लट् प्रपु एक
गाण्डीवं - अकार. नपु. प्र एक
स्रंसते - लट् प्रपु एक
हस्तात् - अकार. पु. प. एक
त्वक् - चकार. स्त्री. प्र एक
च - अव्ययम्
एव - अव्ययम्

Downloaded from www.omkaravidya.com

परिदह्यते - लट् प्रपु एक

न - अव्ययम्

च - अव्ययम्

शक्नोमि - लट् उपु एक

अवस्थातुं - अव्ययम्

भ्रमति - लट् प्र पु एक

इव - अव्ययम्

च - अव्ययम्

मे - दकार. पु. ष एक

मनः - सकार. नपु. प्र एक

पदार्थः

वेपथुः - कम्पनम्

च-च

शरीरे - देहे

मे - मम

रोमहर्षः - रोमाञ्चः

च-च

जायते - उद्भवति

गाण्डीवं - गाण्डीवं नाम धनुः

स्रंसते - भ्रश्यति

हस्तात् - करात्

त्वक् - चर्म

च एव - च एव

परिदह्यते - संतप्यति

न-न

Downloaded from www.omkaravidya.com

च-च

शक्नोमि - प्रभवामि

अवस्थातुं - स्थातुम्

भ्रमति -भ्रमति

इव - इव

च-च

मे - मम

मनः - चित्तम्

अन्वयः

मे शरिरे वेपथुः च रोमहर्षः च जायते। हस्तात् गाण्डीवं स्रंसते। त्वक् च एव परिदह्यते। अवस्थातुं न च शक्नोमि। मे मनः च भ्रमति इव।

तात्पर्यम्

अयं श्लोकः प्रथमाध्याये त्रिंशत्तमः श्लोकः। अर्जुनः युद्धे स्वस्य बान्धवान् दृष्ट्वा एवं विलपत्।

“मम शरीरे वेपथुः च रोमहर्षं च जायते। हस्तात् गाण्डीवं स्रंसते। त्वक् च एव परिदह्यते। अवस्थातुं न च शक्नोमि। मे मनः च भ्रमति इव।

व्याकरणम्

सन्धिः

वेपथुः + च - विसर्गसकारः

रोमहर्षः + च - विसर्गसकारः

गाण्डीवम् + स्रंसते - अनुस्वारसन्धिः

च + एव - वृद्धिसन्धिः

शक्नोमि + अवस्थातुं - यण्सन्धिः

Downloaded from www.omkaravidya.com

भ्रमति + इव - सवर्णदीर्घसन्धिः

समासः
रोमहर्षम् - रोम्णां हर्षम् - षष्ठीतत्पुरुषः तम्

कृदन्तः
अवस्थातुम् - अव + स्था + तुमुन् प्रत्ययः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥31॥

पदच्छेदः
निमित्तानि च पश्यामि विपरीतानि केशव न च श्रेयः अनुपश्यामि हत्वा स्वजनम् आहवे

पदपरिचयः
निमित्तानि - अकार. नपु. द्वि बहु
च - अव्ययम्
पश्यामि - लट् उपु एक
विपरीतानि - अकार. नपु. द्वि बहु

Downloaded from www.omkaravidya.com

केशव - अकार. पु. सं प्र
न - अव्ययम्
च - अव्ययम्
श्रेयः - सकार. नपु. द्वि एक
अनुपश्यामि - लट् उपु एक
हत्वा - अव्ययम्
स्वजनम् - अकार. पुः द्वि एक
आहवे - अकार. पु. स. एक
पदार्थः
निमित्तानि - शकुनानि
च-च
पश्यामि - ईक्षे
विपरीतानि - प्रतिकुलानि
केशव - कृष्ण
न-न
च-च
श्रेयः - शुभम्
अनुपश्यामि - भावयामि
हत्वा - संहत्य
स्वजनम् - बन्धून्
आहवे - युद्धे

अन्वयः
हे केशव ! विपरीतानि निमित्तानि च पश्यामि । आहवे स्वजनं हत्वा श्रेयः न च अनुपश्यामि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमाध्याये एकत्रिंशत्तमः श्लोकः अर्जुनः युद्धे स्वस्य बन्धून् दृष्ट्वा एवमं अवदत् । हे केशव ! युद्धे अनेकानि अपशकुनानि च अहं पश्यामि । आहवे स्वजनं हत्वा श्रेयः न च अनुपश्यामि ।

व्याकरणम्

सन्धिः

श्रेयः + अनुपश्यामि - विसर्ग उकारः गुणसन्धिः पूर्वरूपसन्धिः

समासः

स्वजनं - स्वस्यजनं तम् षष्ठितत्पुरुषः

हत्वा - हन् + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥32॥

पदच्छेदः

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च किं नः राज्येन गोविन्द किं भोगैः जीवितेन वा

पदपरिचयः

न - अव्ययम्

काङ्क्षे - लट् उपु एक

Downloaded from www.omkaravidya.com

विजयं - अकार. पु. दवि एक

कृष्ण - अकार. पु. सं प्र एक

न - अव्ययम्

च - अव्ययम्

राज्यं - अकार. नपु. द्वि एक

सुखानि - अकार. नपु. द्वि बहु

च - अव्ययम्

किं - दकार. नपु. प्र एक

नः - दकार. सर्व ष बहु

राज्येन - अकार. नपु. तृ एक

गोविन्द - अकार. पु. सं प्र एक

किं - दकार. नपु. प्र एक

भोगैः - अकार. पु. तृ बहु

जीवितेन - अकार. नपु तृ एक

वा- अव्ययम्

पदार्थः

न-न

काङ्क्षे - अभिलषामि

विजयं - जयम्

कृष्ण - वासुदेव

न-न

च-च

राज्यं - देशम्

सुखानि - भोगान्

च -च

Downloaded from www.omkaravidya.com

किं - किम्
नः - अस्माकम्
राज्येन - देशेन
गोविन्द - कृष्ण
किं - किम्
भोगैः - भोगैः
जीवितेन - जीवितेन
वा-वा

अन्वयः
हे कृष्ण! विजयं राज्यं (न) सुखानि च न काङ्क्षे । हे गोविन्द ! नः राज्येन भोगैः जीवितेन वा किम् (प्रयोजनम्) ? ।

तात्पर्यम्
अयं श्लोकः प्रथमोध्याये द्वात्रिंशत्तमः श्लोकः । युद्धे स्वस्य बन्धून् दृष्ट्वा शोकेन एवम् अवदत् ।
हे कृष्ण अहं युद्धे न विजयं न राज्यं न सुखानि च काङ्क्षे ।
हे गोविन्द ! अस्माकं राज्येन भोगैः जीवितेन वा किम् (प्रयोजनम्) ? ।

व्याकरणम्
सन्धिः
विजयम् + कृष्ण - अनुस्वारसन्धिः
राज्यम् + सुखानि - अनुस्वारसन्धिः
किम् + न - अनुस्वारसन्धिः
नः + राज्येन - विसर्गउकारः
भोगैः + जीवितेन - विसर्गरेफ़ः

Downloaded from www.omkaravidya.com

मूलश्लोकः

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्तवा धनानि च ॥ 33

आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः श्वशुराः पोत्राः श्यालाः संबन्धिनस्तथा ॥ 34॥

पदच्छेदः
येषाम् अर्थे काङ्क्षितं नः राज्यं भोगाः सुखानि च । ते इमे अवस्थिताः युद्धे प्राणान् त्यक्तवा धनानि च आचार्याः पितरः पुत्राः तथा एव च पितामहाःमातुलाः श्वशुराः पोत्राः श्यालाः संबन्धिनः तथा

पदपरिचयः
येषाम् - दकार. पु. ष बहु
अर्थे - अव्ययम्
काङ्क्षितं - अकार. नपु. प्र एक
नः - दकार. पु ष. बहु
राज्यं - अकार. नपु. प्र एक
भोगाः - अकार. पु. प्र बहु
सुखानि - अकार. नपु. प्र बहु
च - अव्ययम्
ते - दकार पु प्र बहु
इमे - मकार. पु. प्र बहु

Downloaded from www.omkaravidya.com

अवस्थिताः - अकार. पु. प्र बहु

युद्धे - अकार. नपु. स एक

प्राणान् - अकार. पु. द्वि बहु

त्यक्तवा - अव्ययम्

धनानि - अकार. नपु. द्वि बहु

च - अव्ययम्

आचार्याः - अकार. पु. प्र बहु

पितरः - ऋकार. पु. प्र बहु

पुत्राः - अकार. पु. प्र बहु

तथा - अव्ययम्

एव - अव्ययम्

च - अव्ययम्

पितामहाः - अकार. पु. प्र बहु

मातुलाः - अकार. पु. प्र बहु

श्वशुराः - अकार. पु. प्र बहु

पोत्राः - अकार. पु. प्र बहु

श्यालाः - अकार. पु. प्र बहु

संबन्धिनः - नकार. पु. प्र बहु

तथा - अव्ययम्

पदार्थः

येषाम् - येषाम् जनानाम्

अर्थे - कृते

काङ्क्षितं - वाञ्छितम्

नः - अस्माकम्

राज्यं - राष्ट्रम्

Downloaded from www.omkaravidya.com

भोगाः - भोगवस्तुनि

सुखानि - सुखावस्तुनि

च-च

ते- ते

इमे - एते

अवस्थिताः - स्थिताः

युद्धे - रणे

प्राणान् - प्राणान्

त्यक्तवा - विसृज्य

धनानि - अर्थान्

च -च

आचार्याः - गुरवः

पितरः - पितरः

पुत्राः - पुत्राः

तथा - तथा

एव - एव

च-च

मातुलाः - मातृसहोदराः

पोत्राः - पुत्रस्य पुत्राः

संबन्धिनः - बान्धवाः

पितामहाः - पितृणां पितरः

श्वशुराः - श्वशुराः

श्यालाः - भार्याः सहोदराः

तथा - तथा

अन्वयः

येषाम् अर्थे नः राज्यं भोगाः सुखानि च काङ्क्षितं ते इमे आचार्याः पितरः पुत्राः तथा एव च पितामहाः मातुलाः श्वशुराः पोत्राः श्यालाः तथा संबन्धिनः प्राणान् धनानि च त्यक्तवा युद्धे अवस्थिताः ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

एतौ श्लोकौ श्रीमद्भगवद्गीतायाम् प्रथमाध्याये स्तः | अर्जुनः श्रीकृष्णस्य समीपे अवदत् । येषाम् जनानाम् अर्थे नः राज्यं भोगाः सुखानि च काङ्क्षितं ते इमे आचार्याः पितरः पुत्रा तथा एव च पितामहाः मातुलाः श्वशुरा पौत्राः श्यालाः तथा संबन्धिनः प्राणान् धनानि च त्यक्तवा युद्धे अवस्थिताः |

व्याकरणम्

सन्धिः

काङ्क्षितम् + नः - अनुस्वारसन्धिः

नः + राज्यम् - विसर्गउकारः

राज्यम् + भोगाः - अनुस्वारसन्धिः

ते + इमे - यान्तवान्तलोपसन्धिः य लोपः

अवस्थिताः + युद्धे – विसर्गलोपः

प्राणान् + त्यक्तवा -सत्वसन्धिः

तथा + एव - वृद्धिसन्धिः

पुत्राः+ तथैव - विसर्गसकारः

संबन्धिनः + तथा - विसर्गसकारः

कृदन्तः

अवस्थिताः - अव+ स्था+क्त प्रत्ययः

त्यक्तवा- त्यज् + क्तवा प्रत्ययः

तद्धितान्तः

मातुः भ्राताः मातुलः - ते मातुलाः

Downloaded from www.omkaravidya.com

मूलश्लोकः

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥35॥

पदच्छेदः
एतान् न हन्तुम् इच्छामि घ्नतः अपि मधुसूदन अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते

पदपरिचयः
एतान् - दकार. पु. द्वि बहु
न - अव्ययम्
हन्तुम् - अव्ययम्
इच्छामि - लट् उपु एक
घ्नतः - तकार पु. द्वि बहु
अपि - अव्ययम्
मधुसूदन -अकार पु.सं प्र
अपि - अव्ययम्
त्रैलोक्यराज्यस्य - अ नपु ष. एक
हेतोः - उकार. पु. ष. एक
किं - मकार नपु. प्र एक
नु - अव्ययम्
महीकृते - तकार. पु च. एक

Downloaded from www.omkaravidya.com

पदार्थः

एतान् - इमान्

न-न

हन्तुम् - नाशयितुम्

इच्छामि - इच्छामि

घ्नतः - मारयतः

अपि - अपि

मधुसूदन - कृष्ण

अपि - अपि

त्रैलोक्यराज्यस्य - त्रैलोकाधिपत्यस्य

हेतोः -हेतोः

किं - किं

नु-नु

महीकृते - भूमिप्राप्तये

अन्वयः

हे मधुसूदन। त्रैलोक्यराज्यस्य हेतो घ्नतः अपि हन्तुम् न इच्छामि।
महीकृते किं ?

तात्पर्यम्

अयं श्लोकः प्रथमोध्याये पञ्चत्रिंशत्तमः श्लोकः । युद्धे स्वस्य बन्धून् दृष्ट्वा शोकेन एवम् अवदत् ।हे मधुसूदन त्रैलोक्यराज्यस्य हेतोः घ्नतः अपि हन्तुम् न इच्छामि । महीकृते किं ?

व्याकरणम्

सन्धिः

Downloaded from www.omkaravidya.com

घ्नतः + अपि - विसर्गउकारः गुणसन्धिः पूर्वरूपसन्धिः
किम् + नु - अनुस्वारसन्धिः

समासः
महीकृते मह्याः कृत् तस्मै षष्ठीतत्पुरुषः

कृदन्तः
हन्तुम् - हन् + तुमुन् प्रत्ययः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥36॥

पदच्छेदः
निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्यात् जनार्दन पापम् एव आश्रयेत् अस्मान् हत्वा एतान् आततायिनः

पदपरिचयः
निहत्य - अव्ययम्
धार्तराष्ट्रान् - अकार. पु. द्वि बहु
नः - दकार. सर्व ष. बहु
का - मकार. स्त्री. प्र एक

Downloaded from www.omkaravidya.com

प्रीतिः - इकार. स्त्री. प्र. एक

स्यात् - विधि प्रपु एक

जनार्दनः - अकार. पु. सं. प्र

पापम् - अकार. नपु. प्र एक

एव - अव्ययम्

आश्रयेत् - विधि प्रपु बहु

अस्मान् - दकार. पु. दवि बहु

हत्वा - अव्ययम्

एतान् - दकार. पु. द्वि बहु

आततायिनः - नकार. पु. द्वि बहु

पदार्थः

निहत्य - हत्वा

धार्तराष्ट्रान् - कौरवान्

नः - अस्माकम्

का-का

प्रीतिः - आनन्दः

स्यात् - भवेत्

जनार्दनः - कृष्ण

पापम् - पापम्

एव - एव

आश्रयेत् - प्राप्नुयात्

अस्मान् -अस्मान्

हत्वा - नाशयित्वा

एतान् - एतान्

आततायिनः - महापातकं कृतवतः

Downloaded from www.omkaravidya.com

अन्वयः

हे जनार्दन! धार्तराष्ट्रान निहत्य नः का प्रीतिः स्यात् । एतान् आततायिनः हत्वा पापम् एव आश्रयेत् ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमाध्याये षड्विंशत् तमः श्लोकः। अर्जुनः अवदत् । है जनार्दना! धार्तराष्ट्रान निहत्य नः का प्रीतिः स्यात् । एतान् आततायिनः हत्वा पापम् एव आश्रयेत् ।

व्याकरणम्

सन्धिः

स्यात् + जनार्दनः - जश्त्वं श्चुत्वम्

एव + आश्रयेत् - सवर्णदीर्घसन्धिः

आश्रयेत् + अस्मान् - जश्त्वम्

हत्वा + एतान् - वृद्धिसन्धिः

कृदन्तः

निहत्य - नि + हन् + ल्यप् प्रत्ययः

हत्वा - हन् + क्त्वा प्रत्ययः

तद्धितान्तः

धार्तराष्ट्रान् - धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रः तान् धार्तराष्ट्रान्

Downloaded from www.omkaravidya.com

मूलश्लोकः
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥37॥

पदच्छेदः
तस्मात् न अर्हाः वयम् हन्तुं धार्तराष्ट्रान् स्वबान्धवान् स्वजनं हि कथं हत्वा सुखिनः स्याम माधव

पदपरिचयः
तस्मात्- दकार. पु. ष. एक
न - अव्ययम्
अर्हाः - अकार. पु. प्र बहु
वयम् - दकार. सर्व प्र बहु
हन्तुं - अव्ययम्
धार्तराष्ट्रान् - अकार. पु. द्वि बहु
स्वबान्धवान् - अकार. पु. द्वि बहु
स्वजनं - अकार. पु. द्वि एक
हि - अव्ययम्
कथं - अव्ययम्
हत्वा - अव्ययम्
सुखिनः - नकार. पु. प्र बहु
स्याम - विधि उपु बहु
माधव - अकार. पु. सं प्र

Downloaded from www.omkaravidya.com

पदार्थः

तस्मात्- तस्मात् कारणात्

न-न

अर्हाः - योग्याः

वयम् - वयम्

हन्तुं - नाशयितुम्

धार्तराष्ट्रान् - कौरवान्

स्वबान्धवान् - स्वबन्धून्

स्वजनं - निजजनम्

हि - हि

कथं - कथम्

हत्वा - विनाश्य

सुखिनः - सुखिनः

स्याम - भवेम

माधव - कृष्ण

अन्वयः

हे माधव! तस्मात् वयं स्वबान्धवान् धार्तराष्ट्रान् हन्तुम् न अर्हाः ।स्वजनं हत्वा कथं हि सुखिनः स्याम ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायाम् प्रथमोऽध्याय सप्तत्रिंशत्तमः श्लोकः । अर्जुनः युद्धे तस्य बान्धवान् दृष्ट्वा एवम् अवदत् । हे माधव! तस्मात् वयं स्वबान्धवान् धार्तराष्ट्रान् हन्तुम् न अर्हाः स्वजनं हत्वा कथं हि सुखिनः भवेत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

तस्मात् +न - अनुनासिकासन्धिः

न + अर्हाः - सवर्णदीर्घसन्धिः

अर्हाः + वयम् – विसर्गलोपः

वयम् + हन्तुम् - अनुस्वारसन्धिः

हन्तुम् + धार्तराष्ट्रान् - अनुस्वारसन्धिः

स्वजनम् + हि - अनुस्वारसन्धिः

कथम् + हत्वा - अनुस्वारसन्धिः

समासः

स्वबान्धवान् - स्वस्य बान्धवां तान् षष्ठीतत्पुरुषः

स्वजनम् - स्वस्यजनं - तान् षष्ठीतत्पुरुषः

कृदन्तः

हन्तुम् - हन्+ तुमुन् प्रत्ययः

हत्वा - हन् + क्त्वा प्रत्ययः

तद्धितान्तः

धार्तराष्ट्रान् - धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रः तान् धार्तराष्ट्रान्

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥38॥

Downloaded from www.omkaravidya.com

पदच्छेदः

यद्यपि एते न पश्यन्ति लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्

पदपरिचयः

यद्यपि - अव्ययम्

एते - दकार. पु. प्र. बहु

न - अव्ययम्

पश्यन्ति - दृश् प्रपु बहु

लोभोपहतचेतसः - सकार. नपु. प्र बहु

कुलक्षयकृतं - अकार. पु. द्वि एक

दोषं - अकार. पु. द्वि एक

मित्रद्रोहे - अकार. पुः स एक

च - अव्ययम्

पातकम् - अकार. पु. द्वि एक

पदार्थः

यद्यपि - यद्यपि

एते - धार्तराष्ट्राः

न-न

पश्यन्ति - वीक्षन्ते

लोभोपहतचेतसः: - लोभाविष्टचित्ताः

कुलक्षयकृतं - वंशनाशजन्यम्

दोषं - अनर्थम्

मित्रद्रोहे - मित्रस्यद्रोहे

च-च

Downloaded from www.omkaravidya.com

पातकम् - पापम्

अन्वयः
यद्यपि लोभोपहतचेतसः एते कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति ।

तात्पर्यम्
अयं श्लोकः प्रथमोध्याये अष्टात्रिंशत्तमः श्लोकः । युद्धे अर्जुनः स्वस्य बान्धवान् दृष्ट्वा विलपन् एवम् अवदत् । यद्यपि लोभोपहतचेतसः एते कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति ।

व्याकरणम्
सन्धिः
यद्यप्येते - यद्यपि + एते - यण्सन्धिः
कुलक्षयकृतम् + दोषं - अनुस्वारसन्धिः
दोषम् + मित्रद्रोहे - अनुस्वारसन्धिः

समासः
कुलक्षयकृतं - कुलानां क्षयः षष्ठीतत्पुरुषः
लोभोपहतचेतसः: - लोभोपहतं चेतः येषां ते बहुव्रीहिसमासः

कृदन्तः
उपहतः - उप + हन् + क्त प्रत्ययः
कृतः - कृ + क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥39॥

पदच्छेदः
कथं न ज्ञेयम् अस्माभिः पापात् अस्मान् निवर्तितुम् कुलक्षयकृतं दोषं प्रपश्यद्भिः जनार्दन

पदपरिचयः
कथं - अव्ययम्
न - अव्ययम्
ज्ञेयम् - अकार.नपु. प्र एक
अस्माभिः - दकार. सर्व तृ बहु
पापात् - अकार.नपु. प एक
अस्मात् - दकार. पु प. बहु
निवर्तितुम् - अव्ययम्
कुलक्षयकृतं - अकार.पु. द्वि एक
दोषं - अकार. पु. द्वि एक
प्रपश्यद्भिः -तकार पु. तृ बहु
जनार्दन - अकार.पु. सं एक

पदार्थः
कथं - कथम्

Downloaded from www.omkaravidya.com

न-न

ज्ञेयम् - अवगन्तव्यम्

अस्माभिः - अस्माभिः

पापात् - दोषात्

अस्मान् - अस्मान्

निवर्तितुम् - निवारयितुम्

कुलक्षयकृतं - वंशनाशकार्यम्

दोषं - पापम्

प्रपश्यद्भिः - अवलोक्यद्भिः

जनार्दन - कृष्ण

अन्वयः

जनार्दन! कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः अस्मात् पापात् निवर्तितुम् कथं न ज्ञेयम् ?

तात्पर्यम्

अयं श्लोकः प्रथमोध्याये नवत्रिंशत्तमः श्लोकः । युद्दे अर्जुनः स्वस्य बान्धवान् दृष्ट्वा विलपन् एवम् अवदत् । हे कृष्ण! कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः अस्मात् पापात् कथम् न ज्ञेयम्?

व्याकरणम्

सन्धिः

कथम् + न - अनुस्वारसन्धिः

पापात् + अस्मान् - जश्त्वसन्धिः

कृतम् + दोषम् - अनुस्वारसन्धिः

अस्मात् + निवर्तितुम् – अनुनासिकासन्धिः

Downloaded from www.omkaravidya.com

दोषम् + प्रपश्यद्भिः - अनुस्वारसन्धिः
प्रपश्यद्भिः + जनार्दन - विसर्गरेफः

समासः
कुलक्षयकृतं - कुलानाम् क्षयः षष्ठीतत्पुरुषः
कुलक्षयेण कृतः तम् तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ५०॥

पदच्छेदः
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः धर्मे नष्टे कुलं कृत्स्नम् अधर्माः अभिभवति उत

पदपरिचयः
कुलक्षये - अकार. पु. स एक
प्रणश्यन्ति - लट् प्रपु बहु
कुलधर्माः - अकार. पु. प्र बहु
सनातनाः - अकार. पु. प्र बहु
धर्मे - अकार. पु. स एक
नष्टे - अकार. पु. स एक

Downloaded from www.omkaravidya.com

कुलं - अकार. नपु. द्वि एक
कृत्स्नम् - अकार. नपु. द्वि एक
अधर्मः - अकार. पु. प्र एक
अभिभवति - लट् प्रपु एक
उत - अव्ययम्

पदार्थः
कुलक्षये - वंशनाशे
प्रणश्यन्ति - क्षीयन्ते
कुलधर्माः - कुलाचाराः
सनातनाः -पुरातना
धर्मे - सनातनधर्मे
नष्टे - क्षीणे
कुलं - वंशम्
कृत्स्नम् - सर्वम्
अधर्मः - अनाचारः
अभिभवति -व्याप्नोति
उत - अपि

अन्वयः
कुलक्षये सनातनाः कुलधर्माः प्रणश्यन्ति। धर्मे नष्टे कृत्स्नम् कुलं उत अधर्मः अभिभवति ।

तात्पर्यम्
अयं श्लोकः श्रिमद्भगवद्गीतायाम् प्रथमोऽध्याये चत्वारिंशत्तमः श्लोकः। अर्जुनः

Downloaded from www.omkaravidya.com

एवम् अवदत् । यदि कुलानि नश्यन्ति तर्हि सनातनाः कुलधर्माः नश्यन्ति । यदि धर्मः नष्टः भवति तर्हि कुलं सर्वम् अधर्मः एव व्याप्नोति ।

व्याकरणम्

सन्धिः

कुलम् + कृत्स्नम् - अनुस्वारसन्धिः

अधर्मः + अभिभवति - विसर्गउकारः

अभिभवति + उत - यण्सन्धिः

समासः

कुलक्षये - कुलस्य क्षयः - तस्मिन षष्ठितत्पुरुषः

कुलधर्माः - कुलस्य धर्माः- षष्ठितत्पुरुषः

अधर्मः - न धर्मः - नञ्तत्पुरुषः

कृदन्तः

नष्टः - नश् + क्त प्रत्ययः

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः॥41॥

पदच्छेदः

अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते

Downloaded from www.omkaravidya.com

वर्णसङ्करः

पदपरिचयः

धर्माभिभवात् - अकार. पु. प. एक

कृष्ण - अकार. सं प्र

प्रदुष्यन्ति - लट् प्रपु बहु

कुलस्त्रियः - ईकार. स्त्री प्र बहु

स्त्रीषु - ईकार. स्त्री. स. बहु

दुष्टासु - अकार. स्त्री स. बहु

वार्ष्णेय - अकार. पु. सं प्र

जायते - लट् प्रपु एक

वर्णसङ्करः - अकार. पु. प्र एक

पदार्थः

अधर्माभिभवात् - अधर्मवर्धनात्

कृष्ण - वासुदेव

प्रदुष्यन्ति - कलुषयन्ति

कुलस्त्रियः - वंशस्त्रियः

स्त्रीषु - नारीषु

दुष्टासु - भ्रष्टासु

वार्ष्णेय - कृष्ण

जायते – भवति वर्णसङ्करः- वर्णमिश्रणम्

अन्वयः

हे कृष्ण ! अधर्माभिभवात् कुलस्त्रियः प्रदुष्यन्ति । हे वार्ष्णेय ! दुष्टासु स्त्रीषु वर्णसङ्करः जायते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमोऽध्याये एकचत्वारिंशत्तमः श्लोकः । अर्जुनः स्वबान्धवान् हन्तुं न ऐच्छत् । अतः सः एवम् अवदत् । हे कृष्ण ! अधर्माभिभवात् कुलस्त्रियः प्रदुष्यन्ति । हे वार्ष्णेय ! स्त्रीषु दुष्टासु वर्णसङ्करः जायते ।

व्याकरणम्

समासः

अधर्मः - न धर्मः - नञ्तत्पुरुषः

अधर्माभिभवात् - अधर्मस्य अभिभवः षष्ठीतत्पुरुषः

कुलस्त्रियः - कुलस्य स्त्रियः षष्ठी तत्पुरुषः

वर्णसङ्करः - वर्णानां सङ्करः षष्ठी तत्पुरुषः

तद्धितान्तः

वार्ष्णेयः - वृष्णेः गोत्रापत्यं पुमान्

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो हयेषां लुप्तपिण्डोदकक्रियाः ॥ 42॥

पदच्छेदः

सङ्करः नरकाय एव कुलघ्नानां कुलस्य च पतन्ति पितरः हि एषां लुप्तपिण्डोदकक्रियाः

Downloaded from www.omkaravidya.com

पदपरिचयः

सङ्करः - अकार. पु. प्र एक

नरकाय - अकार. पु. च एक

एव - अव्ययम्

कुलघ्नानां - अकार. पु. ष. बहु

कुलस्य - अकार. नपु. ष. एक

च - अव्ययम्

पतन्ति - लट् प्रपु बहु

पितरः - ऋकार. पु. प्र बहु

हि - अव्ययम्

एषां - दकार. पु. ष. बहु

लुप्तपिण्डोदकक्रियाः - अकार. पु. प्र बहु

पदार्थः

सङ्करः -मिश्रणम्

नरकाय - नरकलोकाय

एव - एव

कुलघ्नानां - वंशनाशकानाम्

कुलस्य - वंशस्य

च-च

पतन्ति - ग्लायन्ति

पितरः - पितृदेवताः

हि - हि

एषां - एतेषाम्

लुप्तपिण्डोदकक्रियाः - नष्टपिण्डोदकक्रियाः -

Downloaded from www.omkaravidya.com

अन्वयः

सङ्करः कुलघ्नानां कुलस्य च नरकाय एव (भवति) हि एषां
पितरः लुप्तपिण्डोदकक्रियाः पतन्ति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमोऽध्याये द्विचत्वारिंशत्तमः श्लोकः ।
अर्जुनः युद्धे स्वबान्धवान् दृष्ट्वा अवदत् । सङ्करः कुलघ्नानां कुलस्य च नरकाय एव (भवति) हि एषां पितरः लुप्तपिण्डोदकक्रियाः पतन्ति ।

व्याकरणम्

सन्धिः

सङ्करो नरकायैव - सङ्करः + नरकायैव – विसर्गउकारः
नरकायैव - नरकाय + एव - वृद्धिसन्धिः
कुलघ्नानां कुलस्य - कुलघ्नानाम् + कुलस्य - अनुस्वारसन्धिः
पितरो हयेषां - पितरः ह्येषां - विसर्गउकारः
ह्येषां - हि + एषाम् - यण्सन्धिः

समासः

लुप्तपिण्डोदकक्रियाः - पिण्डम् च उदकक्रियाःच - द्वन्द्वसमासः ताः
लुप्ते पिण्डोदकक्रिये येषां ते - बहुव्रीहिः

कृदन्तः

लुप्त - लुप् + क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥43॥

पदच्छेदः

दोषैः एतैः कुलघ्नानां वर्णसङ्करकारकैः उत्साद्यन्ते जातिधर्माः कुलधर्माः च शाश्वताः

पदपरिचयः
दोषैः - अकार. पु. तृ बहु
एतैः - दकार. पु. तृ बहु
कुलघ्नानां - अकार. पु. ष बहु
वर्णसङ्करकारकैः - अकार. पु. तृ. बहु
उत्साद्यन्ते - लट् प्रपु बहु
जातिधर्माः - अकार. पु. प्र. बहु
कुलधर्माः - अकार. पु. प्र. बहु
च - अव्ययम्
शाश्वताः - अकार. पु. प्र. बहु

पदार्थः
दोषैः - पापैः
एतैः - एभिः

Downloaded from www.omkaravidya.com

कुलघ्नानां - वंशनाशकानाम्
वर्णसङ्करकारकैः - वर्णसङ्करकारकैः
उत्साद्यन्ते - विनश्यन्ते
जातिधर्माः - वर्णधर्माः
कुलधर्माः - वंशधर्माः
च-च
शाश्वताः - सनातनाः

अन्वयः
कुलघ्नानां वर्णसङ्करकारकैः एतैः दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमोऽध्याये त्रयचत्वारिंशत्तमः श्लोकः ।
अर्जुनः एवम् अवदत् । वंशनाशकानां वर्णसङ्करकारकैः एतैः दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ।

व्याकरणम्
सन्धिः
दोषैः + एतैः - विसर्गरेफः
कुलघ्नानाम् + वर्णसङ्करकारकैः - अनुस्वारसन्धिः
कुलधर्माः + च - विसर्गसकारः श्चुत्वम्

समासः
वर्णसङ्करकारकैः - वर्णसङ्करस्य च कारकाः तेः षष्ठी तत्पुरुषः
जातिधर्माः - जाते धर्माः षष्ठी तत्पुरुषः
कुलधर्माः - कुलस्य धर्माः षष्ठी तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ॥ 44॥

पदच्छेदः
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नरके अनियतं वासः भवति इति

पदपरिचयः
उत्सन्नकुलधर्माणां - अकार. पु . ष. बहु
मनुष्याणां - - अकार. पु . ष. बहु
जनार्दन - अकार. पु. सं प्र. एक
नरके - अकार. पु . स. एक
अनियतं - अकार. नपु . प्र. एक
वासः - अकार. पु . प्र. एक
भवति - लट् प्रपु एक
इति - अव्ययम्
अनुशुश्रुम - लिट् उपु बहु

पदार्थः
उत्सन्नकुलधर्माणाम् - नष्टवंशाचाराणाम्
मनुष्याणाम् - नराणाम्
जनार्दन - कृष्ण

Downloaded from www.omkaravidya.com

नरके - नरकलोके
अनियतं - दीर्घकालं यावत्
वासः - स्थितिः
भवति -संभवति
इति - इति
अनुशुश्रुम - श्रुतवन्तः

अन्वयः
हे जनार्दन | उत्सन्नकुलधर्माणां मनुष्याणां नरके अनियतं वासः भवति” इति अनुशुश्रुम ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवदगीतायां प्रथमोऽध्याये चतुश्चत्वारिंशत्तमः श्लोकः |
अर्जुनः एवम् अवदत्। हे जनार्वन ! उत्सन्नकुलधर्माणां मनुष्याणां नरके अनियतं वासः भवति इति अनुशुश्रुम।

व्याकरणम्
सन्धिः
उत्सन्नकुलधर्माणाम् + मनुष्याणां - अनुस्वारसन्धिः
मनुष्याणाम् + जनार्दन - अनुस्वारसन्धिः
अनियतम् + भवति - अनुस्वारसन्धिः
भवति + इति - सवर्णदीर्घसन्धिः
इति + अनुशुश्रुम – यण्सन्धिः नरके + अनियतं - पूर्वरूपसन्धिः

समासः
उत्सन्नकुलधर्माणाम् - उत्सन्न कुलधर्मा येषां ते बहुव्रीहिः तेषाम्

Downloaded from www.omkaravidya.com

मूलश्लोकः

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ 45॥

पदच्छेदः
अहो बत महत्पापं कर्तुं व्यवसिता वयम् यत् राज्यसुखलोभेन हन्तुं स्वजनम् उद्यताः

पदपरिचयः
अहो - अव्ययम्
बत - अव्ययम्
महत् - तकार. नपु द्वि एक
पापं - अकार. नपु प्र एक
कर्तुं - अव्ययम्
व्यवसिताः - अकार पु प्र बहु
वयम् - दकार सर्व प्र बहु
यत् -दकार. नपु. प्र एक
राज्यसुखलोभेन - अकार पु. तृ एक
हन्तुं - अव्ययम्
स्वजनम् - अकार. पु द्वि एक
उद्यताः अकार. पु प्र बहु

पदार्थः

Downloaded from www.omkaravidya.com

अहो - आश्चर्यम्

बत - कष्टम्

महत् - बृहत्

पापं - दोषम्

कर्तुं - आचरितुम्

व्यवसिताः - प्रवृत्ताः

वयम् - पाण्डवाः

यत् - यत्

राज्यसुखलोभेन - राज्यसौख्यलोभेन

हन्तुं - नाशयितुम्

स्वजनम् - निजजनम्

उद्यताः - प्रवृत्ताः

अन्वयः

अहो बत ! यत् राज्यसुखलोभेन स्वजनं हन्तुम् उद्यताः | वयं महत् पापं कर्तुं व्यवसिताः ।

तात्पर्यम्

अयं श्लोकः प्रथमोऽध्याये पञ्चचत्वारिंशत्तम श्लोकः। अर्जुनः एवम् अवदत् | अहो बत ! यत् राज्यसुखलोभेन स्वजनं हन्तुम् उद्यताः | वयं महत् पापं कर्तुं व्यवसिताः ।

व्याकरणम्

सन्धिः

महत्पापम् + कर्तुम् - अनुस्वारसन्धिः

कर्तुम् + व्यवसिताः - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

हन्तुम् + स्वजनम् - अनुस्वारसन्धिः
व्यवसिताः + वयम् - विसर्गलोपः
यत् + राज्यसुखलोभेन - जश्त्वसन्धिः

समासः
यद्राज्यसुखलोभेन - राज्यस्य सुखं षष्ठी तत्पुरुषः
राज्य्सुखे लोभः - सप्तमी तत्पुरुषः तेन

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः |
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ 46॥

पदच्छेदः
यदि माम् अप्रतीकारम् अशस्त्रं शस्त्रपाणयः धार्तराष्ट्राः रणे हन्युः तत् मे क्षेमतरं भवेत्

पदपरिचयः
यदि - अव्ययम्
माम् - दकार. सर्व द्वि एक
अप्रतीकारम् - अकार. पु द्वि एक
अशस्त्रं - अकार. पु द्वि एक
शस्त्रपाणयः - इकार. पु प्र बहु

Downloaded from www.omkaravidya.com

धार्तराष्ट्राः - अकार. पु प्र बहु
रणे - अकार पु स एक
हन्युः - विधि प्र पु एक
तत् - दकार. नपु प्र एक
मे - दकार. पु ष एक
क्षेमतरं - अकार. पु द्वि एक
भवेत् - विधि प्रपु एक

पदार्थः
यदि - यदि
माम् - माम्
अप्रतीकारम् - प्रतिक्रियारहितम्
अशस्त्रम् - आयुधरहितम्
शस्त्रपाणयः - आयुधपाणयः
धार्तराष्ट्राः - कौरवाः
रणे - युद्धे
हन्युः - नाशयेयुः
तत् - तत्
मे - मम
क्षेमतरम् - शुभकरम्
भवेत् - स्यात्

अन्वयः
शस्त्रपाणयः धार्तराष्ट्राः रणे यदि अप्रतीकारम् अशस्त्रं मां हन्युः तत् मे क्षेमतरं भवेत्।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमोऽध्याये षड्विंशत्तमः श्लोकः | अर्जुनः अवदत् । शस्त्रपाणयः धार्तराष्ट्राः रणे यदि अप्रतीकारम् अशस्त्रं मां हन्युः तत् मे क्षेमतरं भवेत् ।

व्याकरणम्

सन्धिः

अशस्त्रम् + शस्त्रपाणयः - अनुस्वारसन्धिः

धार्तराष्ट्राः + रणे - विसर्गलोपः

हन्युः + तन्मे - विसर्गसकारः

तत् + मे - अनुनासिकासन्धिः

क्षेमतरम् + भवेत् - अनुस्वारसन्धिः

> समासः

शस्त्रपाणयः - शस्त्रं पाणौ येषां ते व्यधिकरणबहुव्रीहिः

अशस्त्रम् - न विद्यते शस्त्रं यस्य सः अशस्त्रः तम् नञ् बगुव्रीहिः

अप्रतीकारम् - न विद्यते प्रतीकारम् यस्य सः अप्रतीकारः तम् - नञ् बहुव्रीहिः

तद्धितान्तः

धार्तराष्ट्राः धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रः ते धार्तराष्ट्राः

Downloaded from www.omkaravidya.com

मूलश्लोकः
संजय उवाच

एवमुक्तवार्जुन सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ 47 ।

पदच्छेदः
संजय उवाच एवम् उक्तवा अर्जुन सङ्ख्ये रथोपस्थे उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमानसः

पदपरिचयः
एवम् - अव्ययम्
उक्तवा - अव्ययम्
अर्जुनः - अकार पु. प्र एक
सङ्ख्ये - अकार नपु. स एक
रथोपस्थे - अकार पु. स एक
उपाविशत् - लङ् प्रपु एक
विसृज्य - अव्ययम्
सशरं - अकार पु. द्वि एक
चापं - अकार पु. द्वि एक
शोकसंविग्नमानसः - अकार पुः प्र एक

पदार्थः
एवम् - एवम्

Downloaded from www.omkaravidya.com

उक्तवा - ऊकतवा

अर्जुनः - धनञ्जयः

सङ्ख्ये - युद्धे

रथोपस्थे - रथमध्यभागे

उपाविशत् - उपविष्टवान्

विसृज्य - त्यक्त्वा

सशरम् - बाणेन सह

चापम् - धनुः

शोकसंविग्नमानसः - दुःखाकुलचित्तः

अन्वयः

शोकसंविग्नमानसः अर्जुनः एवम् उक्तवा शङ्ख्ये शसरं चापं विसृज्य रथोपस्थे उपाविशत् ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां प्रथमोऽध्याये सप्तचत्वारिंशत्तमः श्लोकः ।
एषः श्लोकः संजयः अवदत् । शोकसंविग्नमानसः अर्जुनः एवम् उक्तवा शङ्ख्ये शसरं चापं विसृज्यः रथोपस्थे उपाविशत् ।

व्याकरणम्

सन्धिः

उक्तवा + अर्जुनः - सवर्णदीर्घसन्धिः

सशरम् + चाप - अनुस्वारसन्धिः

चापम् + शोकसंविग्नमानसः - अनुस्वारसन्धिः

रथोपस्थे + उपाविशत् - यान्तवान्तदेशसन्धिः य लोपः

Downloaded from www.omkaravidya.com

समासः
रथोपस्थे - रथस्य उपस्थे, तस्मिन् षष्ठीतत्पुरुषः
शोकसंविग्नमानसः - शोकेन संविग्नम् तृतीया तत्पुरुष समासः
शोकसंविग्नं मानसं यस्य सः - बहुव्रीहिः

कृदन्तः
विसृज्य - वि + सृज् + ल्यप्
संविग्नम् - सम् + विज् + क्त

श्रीमद्भगवद्गीता - प्रथमोऽध्यायः - अर्जुनविषादयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ।

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगः नाम प्रथमः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्

Downloaded from www.omkaravidya.com

श्रीमद्भगवदगीतासु - आकार. स्त्री स. बहु

उपनिषत्सु - दकार. स्त्री स बहु

ब्रह्मविद्यायां - आकार. स्त्री ष.बहु

योगशास्त्रे - अकार. नपु. स. एक

श्रीकृष्णार्जुनसंवादे - - अकार. पु. स. एक

अर्जुनविषादयोगः अकार. पु. प्रर. एक

नाम - नकार.नपु. प्र एक

प्रथमः - अकार. पु. प्र एक

अध्यायः - अकार. पु. प्र एक

पदार्थः

ॐ - ओम् 	तत् - तत्

सत् - सत् 	इति - एवम्

श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु

उपनिषत्सु - उपनिषत्सु

ब्रहमविद्यायां - ब्रहमपाठे

योगशास्त्रे - योगशास्त्रे

श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे

अर्जुनविषादयोगः - अर्जुनविषादयोगः

नाम - नाम

प्रथमः - प्रथमः

अध्यायः - अध्यायः

अन्वयः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोग नामः प्रथमः अध्यायः (संपूर्णम् भवति) ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

तत् सत् इति श्रीमद्भगगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगः नामः प्रथमः अध्यायः संपूर्णम् भवति

व्याकरणम्

सन्धिः

सदिति - सत् + इति - जश्त्वसन्धिः

श्रीमद्भगवद्गीतासूपनिषत्सु - श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः

योगो नाम - योगः + नामः - विसर्ग उकारः

प्रथमोऽध्यायः - प्रथमः + अध्यायः - विसर्गउकारः पूर्वरूपसन्धिः

समासः

ब्रह्मविद्यायां - ब्रह्म इति विद्या कर्मधारयः तस्मात्

कृदन्तः

ॐ - अव् + मन् प्रत्ययः

उपनिषत् - उप + नि + षद् +क्विप्

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# द्वितीयोऽध्यायः
# साङ्ख्ययोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

सञ्जय उवाच
तं तथा कृपयाविष्टमश्रुपूर्णा कुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ 2.01॥

पदच्छेदः
तं तथा कृपया आविष्टम् अश्रुपूर्णाकुलेक्षणम् विषीदन्तम् इदं वाक्यम् उवाच मधुसूदनः

पदपरिचयः
तं - दकार पु. द्वि एक
तथा - अव्ययम्
कृपया - आकार. स्त्री. प्र एक
आविष्टम् - अकार. पु द्वि एक
अश्रुपूर्णाकुलेक्षणम् - अकार. पु द्वि एक
विषीदन्तम् - अकार. पु द्वि एक
इदं - मकार. नपु प्र एक
वाक्यम् - अकार. नपु द्वि एक
उवाच - वच् प्रपु एक
मधुसूदनः - अकार. पु प्र एक

पदार्थः
तं - तम्
तथा - तथा
कृपया - दयया

Downloaded from www.omkaravidya.com

आविष्टम् - अन्वितम्
अश्रुपूर्णाकुलेक्षणम् - विकारभावनेत्रसहितम्
विषीदन्तम् - दुःखितम्
इदं - इदम्
वाक्यम् - वचनम्
उवाच - अवदत्
मधुसूदनः - श्री कृष्णः

अन्वयः
मधुसूदनः तथा कृपया आविष्टम् अश्रुपूर्णाकुलेक्षणम् विषिदन्तम् तं इदम् वाक्यं उवाच ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोऽध्याये प्रथमश्लोकः। अर्जुनः शोकेन रथोपस्थे उपविष्टवान् । पश्चात् संजयः अवदत् । तथा कृपया आविष्टम् अश्रुपूर्णाकुलेक्षणं विषिदन्तं तं मदुसूदनः इदम् वाक्यं उवाच ।

व्याकरणम्
सन्धिः
तम् + तथा - अनुस्वारसन्धिः
कृपया+ आविष्टम् - सवर्णदीर्घसन्धिः

समासः
अश्रुपूर्णाकुलेक्षणम् - अश्रु पूर्ण आकुल ईक्षणाम् यस्य सः – बहुव्रीहिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

श्री भगवानुवाच
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ 2.02 ॥

पदच्छेदः
कुतः त्वा कश्मलम् इदं विषमे समुपस्थितम् अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् अर्जुन

पदपरिचयः
कुतः - अव्ययम्
त्वा - दकार. पु द्वि एक
कश्मलम् - अकार. नपु प्र एक
इदं - दकार. नपु प्र एक
विषमे - अकार. पु स एक
समुपस्थितम् - अकार. नपु प्र एक
अनार्यजुष्टम् - अकार. नपु प्र एक
अस्वगर्यम् - अकार. नपु प्र एक
अकीर्तिकरम् - अकार. नपु प्र एक
अर्जुन - अकार. पु सं प्र

पदार्थः
कुतः - कस्मात्
त्वा - त्वाम्
कश्मलम् - क्लेशम्

Downloaded from www.omkaravidya.com

इदं - इदम्
विषमे - विकल्पक्षणे
समुपस्थितम् - प्राप्तम्
अनार्यजुष्टम् - अनार्यजुष्टम्
अस्वगर्यम् - स्वर्गयोग्यरहितम्
अकीर्तिकरम् - अयशस्करम्
अर्जुन - पार्थ

अन्वयः
हे अर्जुन! विषमे कुतः इदम् अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तीकरं कश्मलं त्वा समुपस्थितम् ?

तात्पर्यम्
अयं श्लोकः श्रिमद्भगवद्गीतायां द्वितीयाध्याये द्वितीयश्लोकः। अर्जुनस्य मनक्लेशं दृष्ट्वा भगवान् श्रीकृष्णः पृच्छवान्। "हे अर्जुन! विषमे कुतः इदम् अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तीकरं कश्मलं त्वा समुपस्थितम् ?"।

व्याकरणम्
सन्धिः
कुतः + त्वा - विसर्ग सकारः
कश्मलमिदम् + विषमे - अनुस्वारसन्धिः

समासः
अनार्यजुष्टम् - आर्यैः जुष्टम् आर्यजुष्टम् तृतीयातत्पुरुषः
अनार्यजुष्टम् - न आर्यजुष्टम् - नञ्तत्पुरुष
अस्वगर्यम् - न स्वर्ग्यम् नञ् तत्पुरुषः
अकीर्तिकरम् - न कीर्तिकरम् - नञ्तत्पुरुषः

कृदन्तः
समुपस्थितम् - सम् + उप + स्था+ क्त प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ 2.03॥

पदच्छेदः
क्लैब्यं मा स्म गमः पार्थ न एतत् त्वयि उपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ परन्तप

पदपरिचयः
क्लैब्यं - अकार. नपु. द्वि एक
मा - अव्ययम्
स्म - अव्ययम्
गमः - लुङ् म.पु एक
पार्थ - अकार. पु. सं प्र
न - अव्ययम्
एतत् - दकार. नपु. प्र एक
त्वयि - दकार. त्रिलि. स एक
उपपद्यते - लट् प्रपु एक
क्षुद्रे - अकार. नपु. द्वि एक
हृदयदौर्बल्यं - अकार. नपु. द्वि एक
त्यक्त्वा -अव्ययम्
उत्तिष्ठ - लोट् मपु एक
परन्तप - अकार. पु. सं प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

क्लैब्यं - क्लीबस्य भावः
मा-मा
स्म - स्म
गमः - प्राप्तः
पार्थ - अर्जुन
एतत् - एतत् क्लेशम्
न-न
त्वयि - त्वयि
उपपद्यते - उपयुज्यते
क्षुद्रं - दीनबुद्धिः
हृदयदोर्बल्यं - मनसः निर्बलता
त्यक्तवा - हित्वा
उत्तिष्ठ - उत्तिष्ठ
परन्तप - अर्जुन

अन्वयः
हे पार्थ ! क्लैब्यं मा स्म गमः एतत् त्वयि न उपपद्यते । हे परन्तप ! क्षुद्र हृदयदोर्बल्यं त्यक्तवा उत्तिष्ठ ।

तात्पर्यम्
अयं श्लोकः श्रिमद्भगवद्गीतायां द्वितीयाध्याये तृतीयश्लोकः । अर्जुनस्य मनक्लेशं दृष्ट्वा भगावान् श्रीकृष्णः उक्तवान । हे पार्थे ! क्लैब्यं मा स्म गमः एतत् त्वयि न उपपद्यते । हे परन्तप ! क्षुद्र हृदयदोर्बल्यं त्यक्तवा उत्तिष्ठ ।

व्याकरणम्
सन्धिः
न + एतत् - वृद्धिसन्धिः
त्वयि + उपपद्यते - यण्सन्धिः

Downloaded from www.omkaravidya.com

क्षुद्रम् + हृदयदौर्बल्यं - अनुस्वारसन्धिः
हृदयदोर्बल्यम् + त्यक्त्वा - अनुस्वारसन्धिः
त्यक्तवा + उत्तिष्ठ - वृद्धिसन्धिः

समासः
परन्तपः परान् तपति - द्वितीयातत्पुरुषः

कृदन्तः
त्यक्तवा - त्यज् + क्तवा प्रत्ययः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अर्जुन उवाच
कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन ॥ 2.04

पदच्छेदः
कथं भीष्मम् अहं सङ्ख्ये द्रोणं च मधुसूदन इषुभिः प्रति योत्स्यामि पूजार्हौ अरिसूदन

पदपरिचयः
कथं - अव्ययम्
भीष्मम् - अकार. पु द्वि एक
अहं - दकार. त्रि प्र एक
सङ्ख्ये - अकार. नपु. स. एक

Downloaded from www.omkaravidya.com

द्रोणं - अकार. पु द्वि एक
च - अव्ययम्
मधुसूदन - अकार. पु सं प्र
इषुभिः - उकार. पु तृ बहु
प्रति योत्स्यामि - प्रति + युध् लृट् उपु एक
पूजार्हौ - अकार. पु द्वि द्वि
अरिसूदन - अकार. पु सं प्र

पदार्थः

कथं - कथम्
भीष्मम् - पितामहम्
अहं - अहम्
सङ्ख्ये - युद्द
द्रोणं - द्रोणाचार्यम्
च-च
मधुसूदन - कृष्ण
इषुभिः - बाणैः
प्रतियोत्स्यामि - प्रति युद्धं करिष्यामि
पूजार्हौ - पूजनीयौ
अरिसूदन - वासुदेव

अन्वयः

हे अरिसूदन मधुसूदन ! अहं पूजार्हौ भीष्मं द्रोणं च सङ्ख्ये कथम् इषभिः प्रतियोत्स्यामि ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये चतुर्थः श्लोकः | अर्जुनः श्री कृष्णम् उद्दिश्य एवम् उक्तवान् | हे अरिसूदन मधुसूदन ! अहं पूजार्हौ भीष्मं द्रोणं च सङ्ख्ये कथम् इषभिः प्रतियोत्स्यामि ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
कथम् + भीष्ममहं - अनुस्वारसन्धिः
भीष्ममहम् + सङ्ख्ये अनुस्वारसन्धिः
द्रोणम् + च अनुस्वारसन्धिः
पूजार्हौ + अरिसूदन – यान्तवान्तदेशसन्धिः

समासः
पूजार्हौ - पूजाणाम् अर्हः तौ षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥2.05॥

पदच्छेदः

गुरून् अहत्वा हि महानुभावान् श्रेयः भोक्तुं भैक्ष्यम् अपि इह लोके
हत्वा अर्थकामान् तु गुरुन् इह एव भुञ्जीय भोगान् रुधिरप्रदिग्धान्

पदपरिचयः
गुरुन् -उकार पु द्वि बहु
अहत्वा - अव्ययम्
हि - अव्ययम्

Downloaded from www.omkaravidya.com

महानुभावान् - अकार पु द्वि बहु
श्रेयः सकार . नपु प्र एक
भोक्तुं - अव्ययम्
भैक्ष्यम् - अकार नपु द्वि एक
अपि - अव्ययम्
इह - अव्ययम्
लोके - अकार पु स एक
हत्वा - अव्ययम्
अर्थकामान् - अकार पु द्वि बहु
तु - अव्ययम्
गुरून् - उकार पु. द्वि बहु
इह - अव्ययम्
एव - अव्ययम्
भुञ्जीय -विथि उ पु एक
भोगान - अकार. पु द्वि बहु
रुधिरप्रदिगधान् - अकार. पु द्वि बहु

पदार्थः
गुरुन् - आचार्यान्
अहत्वा - अविनाश्य
हि- हि
महानुभावान् - महनीयाः
श्रेयः - वरम्
भोक्तुं - खादितुम्
भैक्ष्यम् - शिक्षाम्
अपि -अपि
इह - इह
लोके - लोके

Downloaded from www.omkaravidya.com

हत्वा - विनाश्य
अर्थकामान् - अर्थकामारूपान्
तु-तु
गुरून् - आचार्यान्
इह - इह
एव + एव
भुञ्जीय - अनुभवामि
भोगान् - अनेक भोगान्
रुधिरप्रदिग्धान् - रक्तमिश्रितान्

अन्वयः
महानुभावान् गुरुन् अहत्वा इहलोके भैक्ष्यं भोक्तुमपि श्रेयः हि तु गुरून् हत्वा इह एव रुधिर प्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चमः श्लोकः । अर्जुनः स्वबान्धवान् हन्तुम् न ऐच्छत् । अतः सः अनेककारणानि उक्तवान् । महानुभावान् गुरून् अहत्वा भैक्ष्यं भोक्तुमपि श्रेयः हि तु गुरून् हत्वा इह एव रुधिरप्रदिगधान् अर्थकामान् भोगान् भुञ्जीय।

व्याकरणम्
सन्धिः
श्रेयः + भोक्तुं - विसर्गउकारः          अपि + इह - सवर्णदीर्घसन्धिः
इह + एव - वृद्धिसन्धिः
समासः
महानुभावान् - महान् अनुभावः येषां ते तान् - बहुव्रीहिः
कृदन्तः
हत्वा - हन् + क्त्वा प्रत्ययः  भोक्तुम् - भुज् + तुमुन् प्रत्यः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ 2.06॥

पदच्छेदः
न च एतत् विद्मः कतरत् नः गरीयः यत् वा जयेम यदि वा नः जयेयुः यान् एव हत्वा न जिजीविषामः ते अवस्थिताः प्रमुखे धार्तराष्ट्राः

पदपरिचयः
न - अव्ययम्
च - अव्ययम्
विद्मः - विद् धातुः लट् उपु बहु
नः - दकार. पु ष. बहु
यत् - दकार. नपु प्र एक
जयेम - विधि. उपु बहु
वा - अव्ययम्
जयेयुः - विध प्रपु बहु
एव - अव्ययम्
न - अव्ययम्
ते - दकार. पु प्र बहु
प्रमुखे - अकार. पु स. एक
एतत् - दकार. नपु. द्वि एक
कतरत् - सर्व नपु प्र एक
गरीयः - सकार. नपु द्वि एक
वा - अव्ययम्

Downloaded from www.omkaravidya.com

यदि - अव्ययम्
नः - दकार त्रि द्वि बहु
यान् - दकार. पु द्वि बहु
हत्वा - अव्ययम्
जिजीविषामः - जीव् लट् उपु बहु
अवस्थिताः - अकार. पु प्र बहु
धार्तराष्ट्राः - अकार. पु प्र बहु

पदार्थः
न-न
च-च
विद्मः - जानीमः
नः - अस्माकम्
यत् - यत्
जयेम - जयेम
एतत् - इदम्
कतरत् - कतरत्
गरीयः - श्रेयस्
वा-वा
यदि - यदि
नः - अस्मान्
जयेयुः - जयेयुः
यान् - तान्
एव -एव
हत्वा - विनाश्य
न-न
जिजीविषामः - जीवितुम् इच्छामः
ते -ते

Downloaded from www.omkaravidya.com

अवस्थिताः - स्थिताः
प्रमुखे - संमुखे
धार्तराष्ट्राः - कौरवाः

अन्वयः
नः कतरत् गरीयः यत् (वा) वयं जयेम यदि वा (ते) नः जयेयुः एतत् च न एव विद्मः यान् हत्वा न जिजीविषामः ते धार्तराष्ट्राः प्रमुखे अवस्थिताः

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षष्ठमः श्लोकः। अर्जुनः स्वबान्धवान् हन्तुं न ऐच्छत्। अतः सः अनेकविधानि विलपन् कृष्णम् उद्दिश्य एवम् अवदत्। नः कतरत् गरीयः यत् (वा) वयं जयेम यदि वा (ते) नः जयेयुः एतत् च न एव विद्मः यान् हत्वा न जिजीविषामः ते धार्तराष्ट्राः प्रमुखे अवस्थिताः।

व्याकरणम्
सन्धिः
एतत् + विद्मः - जश्त्वसन्धिः
कतरत् + न - अनुनासिकासन्धिः
नः + गरीयः - विसर्गउकारः
गरीयः + यत् - विसर्गउकारः
नः + जयेयुः - विसर्गउकारः
जिजीविषामः + ते विसर्गसकारः
ते + अवस्थिताः - पूर्वरूपसन्धिः

कृदन्तः
अवस्थिताः - अव + स्था + क्त प्रत्ययः

तद्धितान्तः
धार्तराष्ट्राः - धृतराष्ट्रस्य अपत्यं पुमान् - धार्तराष्ट्रः ते धार्तराष्ट्राः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ 2.07॥

पदच्छेदः
कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः यत् श्रेयः स्यात् निश्चितं ब्रूहि तत् मे शिष्यः ते अहं शाधि मां त्वां प्रपन्नम्

पदपरिचयः
कार्पण्यदोषोपहतस्वभावः - अकार. पु. प्र एक
पृच्छामि - लट् उपु एक
त्वां - दकार. त्रि द्वि एक
यत् - दकार. नपु. प्र एक
स्यात् - विधि प्रपु एक
ब्रूहि - लोट् मपु एक
मे - दकार. त्रि. ष. एक
ते - दकार. पु. ष एक
शाधि लोट् मपु एक
त्वां - दकार त्रि द्वि एक
धर्मसम्मूढचेताः - सकार. पु. प्र एक
श्रेयः - सकार. नपु. प्र एक
निश्चितं - अकार. नपु. प्र एक
तत् - दकार. नपु. प्र एक
शिष्यः - - अकार. पु. प्र एक
अहं - दकार. त्रि प्र एक

Downloaded from www.omkaravidya.com

मां - दकार त्रि द्वि ऐक
प्रपन्नम् - अकार. नपु प्र एक

पदार्थः
कार्पण्यदोषोपहतस्वभावः - लुब्धत्वदोषेण नष्टस्वाभावः
पृच्छामि - पृच्छामि
त्वां - भवन्तम्
यत् - यत्
स्यात् - भवेत्
ब्रूहि - वद
मे - मह्यम्
ते -तव
धर्मसम्मूढचेताः - धर्मे सम्मूढचेताः
श्रेयः- हितम्
निश्चितं - निश्चितम्
तत् - तत्
शिष्यः - शिष्यः
अहं -अहम्
शाधि - उपदिश
मां - माम्
त्वां -त्वां
प्रपन्नम् - शरणं करोमि

अन्वयः
कार्पण्यदोषोपहतस्वभावः धर्मसम्मूढचेताः (अहं) त्वां पृच्छामि ।यत् श्रेयः स्यात् तत् निश्चितं मे ब्रूहि । अहं ते शिष्यः । त्वां प्रपन्नम् मां शाधि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तमः श्लोकः । अर्जुनः स्वभान्धवान् हन्तुं न ऐच्छत् । सः एवम् अवदत् । "कार्पण्यदोषेण उपहतः मम स्वभावः । मम सर्वं विनश्यति । अहं धर्माधर्मं न जानामि । मम मनसि क्लेशः अस्ति । अतः अहं त्वां पृच्छामि । यत् श्रेयः तत् त्वां निश्चितं वद ।अहं तव शिष्यः ।अहं त्वां शरणं करोमि । माम् उपदेशं कुरु ।

व्याकरणम्

सन्धिः

त्वाम् + धर्मसम्मूढचेताः - अनुस्वारसन्धिः

यत् + श्रेयः - श्चुत्वं छत्वसन्धिः

स्यात् + निश्चितम - अनुनासिकासन्धिः

तत् + मे - अनुनासिकसन्धिः

शिष्यः + ते - विसर्ग सकारः

ते + अहं - पूर्वरूपसन्धिः

समासः

कार्पण्यम् एव दोषः - कर्मधारयः

कार्पण्यदोषोण उपहतः स्वाभावः यस्य सः – बहुव्रीहिः

धर्मे सम्मूढः यस्य सः बहुव्रीहिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ 2.08 ॥

पदच्छेदः
न हि प्रपश्यामि मम अपनुद्यात् यत् शोकम् उच्छोषणम् इन्द्रियाणाम् अवाप्य भूमौ असपत्नम् ऋद्धं राज्यं सुराणाम् अपि च आधिपत्यम्

पदपरिचयः
न - अव्ययम्
हि - अव्ययम्
प्रपश्यामि - लट् उपु एक
मम -दकार. त्रि ष. एक
अपनुद्यात् - अप् +नुद् विधि प्रपु एक
यत् - दकार नपु प्र एक
शोकम् - अकार. पु द्वि एक
उच्छोषणम् - अकार. पु द्वि एक
इन्द्रियाणाम् - अकार. नपु ष. बहु
अवाप्य - अव्ययम्
भूमौ - इकार स्त्री स. एक
असपत्नम् - अकार. नपु द्वि एक
ऋद्धं अकार. नपु द्वि एक
राज्यं - अकार. नपु द्वि एक
सुराणाम् - अकार.पु ष. बहु
अपि - अव्ययम्

Downloaded from www.omkaravidya.com

च - अव्ययम्
आधिपत्यम् अ. नपु द्वि एक

पदार्थः
न-न
हि-हि
प्रपश्यामि - अवलाशोक्यामि
मम - मम
अपनुद्यात् - अपनुद्यात्
यत् - यत्
शोकम् - दुःखम्
उच्छोषणम् - शोषकम्
इन्द्रियाणाम् - इन्द्रियाणाम्
अवाप्य - प्राप्य
भूमौ - भूमौ
असपत्नम् - रिपुरहितम्
ऋद्धं – धनधान्यादिसंमृद्धम्
राज्यं - राज्यम्
सुराणाम् - देवानाम्
अपि - अपि
च-च
आधिपत्यम् - आधिपत्यम्

अन्वयः
भूमौ असपत्नम् राज्यं सुराणाम् आधिपत्यम् च अवाप्य यत् मम इन्द्रियाणाम् उच्छोषणं शोकं अपनुद्यात् न प्रपश्यामि ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोद्याये अष्टमः श्लोकः । अर्जुनः युद्धं कर्तुं न ऐच्छत् । सः एवम् अवदत् । “भूमौ असपत्नम् राज्यं सुराणाम् आधिपत्यम् च अवाप्य यत् मम इन्द्रियाणाम् उच्छोषणं शोकं अपनुद्यात् न प्रपश्यामि” ।

व्याकरणम्

सन्धिः

मम+ अपनुद्यात् - सवर्णदीर्घसन्धिः

यत् + शोकम् - श्चुत्वं छत्वसन्धिः

भूमौ + असपत्नम् - यान्तवानतदेशसन्धिः

च + आधिपत्यम् - सवर्णदीर्घसन्धिः

समासः

असपत्नम् - न विद्यते सपत्नः यस्य तत् - नञ्बहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

संजय उवाच

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।

न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह। 2.09॥

पदच्छेदः

संजय उवाच

एवम् उक्त्वा हृषीकेशं गुडाकेशः परन्तपः न योत्स्ये इति गोविन्दम् उक्त्वा तूष्णीं बभूव

Downloaded from www.omkaravidya.com

पदपरिचयः

एवम् - अव्ययम्

उक्त्वा - अव्ययम्

हृषीकेशं - अकार. पु द्वि एक

गुडाकेशः- अकार. पु प्र एक

परन्तपः - अकार. पु प्र एक

न - अव्ययम्

योत्स्ये - लट् उपु एक

इति - अव्ययम्

गोविन्दम् - अकार. पु द्वि एक

उक्त्वा - अव्ययम्

तूष्णीम् - अव्ययम्

बभूव लिट् प्रपु एक

ह - अव्ययम्

पदार्थः

एवम् - इति

उक्त्वा - कथयित्वा

हृषीकेशं - कृष्णं

गुडाकेशः - अर्जुन

परन्तपः: - अर्जुनः

न-न

योत्स्य - युद्धं करिष्यामि

इति - एवम्

गोविन्दम् - कृष्णं

उक्त्वा - कथयित्वा

तूष्णीं – मौनम्

बभूव - अभवत्

Downloaded from www.omkaravidya.com

अन्वयः
परन्तपः गुडाकेशः हृषीकेशं एवम् उक्त्वा न योत्स्ये इति गोविन्दम् उक्त्वा तूष्णीम् बभूव ह ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवमः श्लोकः | अर्जुनः स्वबान्धवान् हन्तुम् न ऐच्छत्। अतः सः अनेक विधानि विलपन् आसीत् | सः परन्तपः | सः हृषीकेशं न योत्स्ये इति उक्तवा तूष्णीम् अभवत् |

व्याकरणम्
सन्धिः
हृषीकेशम् + गुडाकेश - अनुस्वारसन्धिः
योत्स्ये + इति - यान्तवान्तदेशसन्धिः य लोपः

समासः
हृषीकेशः हृषीकाणाम् ईशः तेन बहुव्रीहिः
गुडाकैशः गुडाकायाः ईशः तेन बहुव्रीहिः

कृदन्तः
उक्त्वा - वच् + क्तवा

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ **2.10** ॥

Downloaded from www.omkaravidya.com

पदच्छेदः

तम् उवाच हृषीकेशः प्रहसन् इव भारत सेनयोः उभयोः मध्ये विषीदन्तम् इदं वचः

पदपरिचयः

तम् - दकार. पु प्र एक

उवाच - वच् + लिट् प्रपु एक

हृषीकेशः - अकार. पु.प्र एक

प्रहसन् - प्र + हस् + शतृ

इव - अव्ययम्

भारत - अकार. पु. सं प्र एक

सेनयोः अःशकार. स्त्री. ष द्वि

उभयोः - अःशकार. स्त्री श्र. द्वि

मध्ये - अकार. पु. सं एक

विषीदन्तम् - वि + सद् + शतृ - तकार पुं द्वि एक

इदम् - मकार. नपु.द्वि एक

वचः: - वचस् स. नपु द्वि एक

पदार्थः

तम् - अर्जुनम्

उवाच - अवदत्

हृषीकेशः - कृष्णः

प्रहसन् - हसन्

इव - इव

भारत - धृतराष्ट्र

सेनयोः - सैन्ययोः

उभयोः - द्वयोः

मध्ये - मध्ये

Downloaded from www.omkaravidya.com

विषीदन्नम् - विषादम् अनुभवन्तम्
इदे - एतत्
वचः - वचनम्

अन्वयः
भारत! हृषीकेशः प्रहसन् इव उभयोः सेनयो: मध्ये विषिदन्तं तम् इदं वचः उवाच ।

तात्पर्यम्
एषः श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये दशमः श्लोकः । अयं श्लोकः संजयः धृतराष्ट्राय उक्तवान् । अर्जुनः मनक्लेशेन शोकेन च रुदन् विलपन् च उभयोः सेनयोः मध्ये तिष्ठवान् । अतः भगवान् श्री कृष्णः प्रहसन् इव अर्जुनाय उपदेशम् वक्तुम् आरन्धवान्।

व्याकरणम्
सन्धिः
प्रहसन् + इव – ङमुडागमानसन्धिः
सेनयोः + उभयो- विसर्गरेफः
उभयो: + मध्ये - विसर्गरेफः

कृदन्तः
प्रहसन् - प्र + हस् + शतृ
विषीदन्तम् - वि + सद् + शतृ + तम्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

श्री भगवानुवाच
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ 2.11॥

पदच्छेदः
अशोच्यान् अन्वशोचः त्वं प्रज्ञावादान् च भाषसे गतासून् अगतासून् च न अनुशोचन्ति पण्डिताः

पदपरिचयः
शोच्यान् - अकार. पु द्वि बहु
अन्वशोचः लङ् मपु एक
त्वं - दकार. त्रि प्र
प्रज्ञावादान् - अकार. पु द्वि बहु
च - अव्ययम्
भाषसे - लट् मपु एक
गतासून् - उकार. पु द्वि बहु
अगतासून् - उकार. पु द्वि बहु
च - अव्ययम्
न - अव्ययम्
अनुशोचन्ति - लट् प्रपु बहु
पण्डिताः - अकार. पु प्र एक

पदार्थः
अशोच्यान्- अदुखिनः

Downloaded from www.omkaravidya.com

अन्वशोचः - अखेदयः
त्वं - त्वम्
प्रज्ञावादान् - मेधायुक्वचनानि
च-च
भाषसे - वदसि
गतासून् - मृतान्
अगतासून् - जीवितान्
च-च
न-न
अनुशोचन्ति - दुःखम् अनुभवन्ति
पण्डिताः - पण्डिताः

अन्वयः

त्वम् अशोच्यान् अन्वशोचः प्रज्ञावातान् च भाषसे। पण्डिताः गतासून् अगतासून् च न अनुशोचन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोऽध्याये एकादशः श्लोकः। अर्जुनः अहं न युद्धं करोमि इति रथे तिष्ठवान्। एषः श्लोकः श्रीमद्भगगवद्गीतायां उपक्रमः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय अवदत्। हे अर्जुन ! त्वं बुद्धिमान् इव वदसि। परन्तु उन्मत्त इव असि । तवं भीष्मं द्रोणं च चिन्तयित्वा दुःखम् अनुभवसि । तत् न अवश्यकम् । आत्माज्ञानेमेव दुःखस्य कारणम्। पण्डिताः नित्यान् अशोच्यान् न अनुशोचति। किन्तु त्वं अनुशोचसि। अतः त्वं मूढः असि इति अभिप्रायः।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
अन्वशोचः + त्वं - विसर्गसकारः
प्रज्ञावादान् + च - सत्वसन्धिः
अगतासून् + च - सत्वसन्धिः
न + अनुशोचन्ति - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ 2.12॥

पदच्छेदः
न तु एव अहं जातु न आसं न त्वं न इमे जनाधिपाः न च एव न भविष्यामः सर्वे वयम् अतः परम्

पदपरिचयः
न - अव्ययम्
तु - अव्ययम्
एव - अव्ययम्
अहं - दकार. सर्व प्र पु
जातु - अव्ययम्
न - अव्ययम्
आसं - लङ् उपु एक
त्वं - दकार सर्व प्र ऐक

Downloaded from www.omkaravidya.com

इमे - मकार सर्व प्र बहु
न - अव्ययम्
एव - अव्ययम्
भविष्यामः - लृट् उपु बहु
वयम् - दकार सर्व प्र बहु
जनाधिपाः - अकार. पु. प्र बहु
च - अव्ययम्
न - अव्ययम्
सर्वे - अकार. पु. प्र. बहु
अतः परम् -अव्ययम्

पदार्थः
न- न
तु – तु
एव- एव
अहं - अहम्
आसं - अभवम्
न-न
त्वं - त्वम् (अर्जुनः)
न-न
इमे - एते
जनाधिपाः - राजानः
न-न
च-च
एव - एव
न-न
भविष्यामः - भविष्यामः
सर्वे - समस्ताः

Downloaded from www.omkaravidya.com

वयम् - वयम्
अतः - इतः
परम्- ऊर्ध्वम्

अन्वयः
अहं जातु न तु आसं न एव त्वं ( न असी:) न इमे जनाधिपा: (न आसन्) न अतः परं सर्वे वयं न भविष्याम: च न एव ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्वादशश्लोकः । भगवान् कृष्णः अर्जुनाय उक्तवान् ! हे अर्जुना! अहं जातु नासम् । त्वमपि न आसी न इति किन्तु आसीः एव । इमे राजान् च न च आसन् न इति किन्तु आसन् एव । तथा वयं सर्वे न च एव न भविष्यामः किन्तु भविष्याम एव ।

व्याकरणम्
सन्धिः
त्वेव – तु + एव यण्सन्धिः
नासम् - न + आसम् सवर्णदीर्घसन्धिः
न + इमे - गुणसन्धिः
च + एव - वृद्धिसन्धिः

समासः
जनाधिपाः जनानाम् अधिपाः षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ 2.13॥

पदच्छेदः
देहिनः अस्मिन् यथा देहे कौमारं यौवनं जरा तथा देहान्तरप्राप्तिः धीरः तत्र न मुह्यति

पदपरिचयः
देहिनः - नकार. पु. ष एक
अस्मिन् - दकार. सर्व. स एक
यथा - अव्ययम्
देहे - अकार. पु. स एक
कोमारं - अकार. नपु. प्र एक
यौवनं - अकार. नपु. प्र एक
जरा - अःशकार. स्त्री प्र एक
तथा - अव्ययम्
देहान्तरप्राप्तिः - इकार. स्त्री प्र एक
धीरः - अकार. पु. प्र एक
तत्र - अव्ययम्
न - अव्ययम्
मुह्यति - मुह् धातुः लट् प्रपु एक

पदार्थः
देहिनः - शरीरणः

Downloaded from www.omkaravidya.com

अस्मिन् - एतस्मिन्
यथा - येन प्रकारेण
देहे - शरीरे
कोमारं - कुमारभावः
यौवनं - तारुण्यम्
जरा - वृद्धत्वम्
तथा - तेन प्रकारेण
देहान्तरप्राप्तिः - अन्यशरीरप्राप्तिः
धीरः - ज्ञानी
तत्र - तस्मिन् विषये
न-न
मुह्यति - विप्रलभते

अन्वयः
देहिनः अस्मिन् देहे यथा कौमारं यौवनं जरा तथा देहान्तरप्राप्तिः । तत्र धीरः न मुह्यति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये त्रयोदशः श्लोकः । भगवान् अर्जुनाय अवदत् । हे अर्जुन ! आत्मज्ञानमेव दुःखस्य निवारणम् । आत्मा एव नित्यम् । शरीरम् अनित्यम् । अस्मिन् देहे कौमारं यौवनम् वृद्धत्वं च परिणमति। किन्तु आत्मा न परिणमति ।आत्मा निर्विकारः । अनात्मा शरीरः सविकारः । यदा कुमारभावं विनश्यति तदा यौवनं भवति । यदा यौवनं विनश्यति तदा वृद्धत्वम् भवति ।एवमेव देहनाशानन्तरं अन्य देहे प्रविशति । पण्डिताः एतस्मिन् विषये न चिन्तयन्ति च शोकं अनुभवन्ति ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
देहिनः + अस्मिन् - विसर्गउकारः गुणः पूर्वरूपसन्धिः
देहान्तरप्राप्तिः +धीरः - विसर्गरेफः
धीरः + तत्र - विसर्गसकारः

तद्धितान्तः
कुमार अवस्था कौमारम्
युव अवस्था यौवनम्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ 2.14॥

पदच्छेदः
मात्रास्पर्शाः तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः तान् तितिक्षस्व भारत

पदपरिचयः
मात्रास्पर्शाः - अकार. पुं प्र बहु
तु - अव्ययम्
कौन्तेय - अकार. स. प्र एक
शीतोष्णसुखदुःखदाः - अकार. पुं प्र बहु

Downloaded from www.omkaravidya.com

आगमापायिनः - नकार. पुं प्र बहु
अनित्याः - अकार. पुं प्र बहु
तान् - दकार. पुं द्वि बहु
तितिक्षस्व - लोट् मपु एक
भारत - अकार. पुं सं प्र

पदार्थः
मात्रास्पर्शाः - विषयसंयोगाः
तु - तु
कौन्तेय - कुन्तीपुत्र
शीतोष्णसुखदुःखदाः - शीतोष्णसुखदुःखानि ददति
आगमापायिनः: - संयोगवियोगशीलाः
अनित्याः - न नित्याः
तान् - तान्
तितिक्षस्व - सहस्व
भारत - अर्जुन

अन्वयः
हे कौन्तेय ! मात्रास्पर्शाः तु  शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः । हे भारत तान् तितिक्षस्व ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये चतुर्दशः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय उक्तवान् । आत्मा नित्यम् निर्विकारः च शरीरम् अनित्यम् सविकारम् च । शरीराय अनेकविधानि अनुभवानि भवन्ति । इन्द्रियेभ्यः अनेकसुखदुःखानि वयं अनुभवामः तत् सर्वं अनित्यमेव । तस्मात् तान् सहस्व । अतः अभिमानं परित्यज्य शीतोष्णादीन् तितिक्षस्व ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
मात्रास्पर्शाः + तु - विसर्गसन्धिः
आगमापायिनः: + अनित्याः - विसर्गउकारः गुण पूर्वरूपसन्धिः
अनित्याः + तान् - विसर्गसकारः
तान् + तितिक्षस्व- सत्वसन्धिः

समासः
मात्राणां स्पर्शाः - षष्ठितत्पुरुषः
शीतं च ऊष्णं च, सुखं च दुःखं च शीतोष्णसुखदुःखानि । इतरेतरद्वन्द्वसमासः
अनित्याः - न नित्याः - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ **2.15**॥

पदच्छेदः
यं हि न व्यथयन्ति एते पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सः अमृतत्वाय कल्पते

पदपरिचयः
यं - दकार. पु द्वि एक
हि - अव्ययम्

Downloaded from www.omkaravidya.com

न - अव्ययम्
व्यथयन्ति - व्यथ् लट् प्रपु बहु
एते - दकार. नपु प्र द्वि
पुरुषम् - अकार. पु द्वि एक
पुरुषर्षभ - अकार. पु सं प्र एक
समदुःखसुखम् - अकार. पु द्वि एक
धीरम् - अकार. पु द्वि एक
सः -दकार. पु . प्र एक
अमृतत्वाय - अकार. नपु च एक
कल्पते - लट् प्रपु एक

पदार्थः
यम् - यम्
हि - हि
न-न
व्यथयन्ति - पीडयन्ति
एते - सुखदुखे
पुरुषम् - पुरुषम्
पुरुषर्षभ - पुरुषश्रेष्ठ
समदुःखसुखं - सुखदुःखयोः समभावम्
धीरम् - मनस्विनम्
सः - सः
अमृतत्वाय - मुक्तये
कल्पते - योग्यः भवति

अन्वयः
हे पुरुषर्षभ ! एते समदुःखसुखं धीरं यं पुरुषं न व्यथयन्ति हि सः अमृतत्वाय कल्पते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चादशः श्लोकः। भगवान् श्री कृष्णः अर्जुनाय आत्मलक्षणम् बोधितवान्। अयं श्लोके सः अर्जुनं पुरुषेसु श्रेष्ठः एवं आह्वयत्। सुखदुःखानि यं पुरुषं धीरं च न व्यथयन्ति सः एव मोक्षाय कल्पते। द्वन्द्व उदासीनत्वमेव मोक्षाय समर्थः भवति।

व्याकरणम्
सन्धिः
व्यथयन्ति + एते - यण्सन्धिः
सः + अमृतत्वाय- विसर्गउकारः पूर्वरूपसन्धिः

समासः
पुरुषः ऋषभः इव कर्मधारयः
सुखं च दुः खं च सुखदुः खं - द्वन्द्वसमासः
समे सुखदुःखे यस्य सः तम् बहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ **2.16**॥

पदच्छेदः
न असतः विद्यते भावः न अभावः विद्यते सतः उभयोः अपि दृष्टः अन्तः तु अनयोः तत्त्वदर्शिभिः

Downloaded from www.omkaravidya.com

पदपरिचयः

न - अव्ययम्

असतः - तकार. पु ष एक

विदयते - लट् प्रपु एक

भावः - अकार. पु प्र एक

न - अव्ययम्

अभावः - अकार. पुर्य प्र एक

विदयते - लट् प्र पु एक

सतः - तकार. पु ष एक

उभयोः - अकार. पु ष द्वि

अपि - अव्ययम्

दृष्टः - अकार. पु प्र एक

अन्तः - अकार. पु प्र एक

तु - अव्ययम्

अनयोः - मकार. पु ष द्वि

तत्त्वदर्शिभिः - नकार. पु तृ बहु

पदार्थः

न-न

असतः - अवस्तुनः

विद्यते - भवति

भावः - अस्तिता

न-न

अभावः - अविद्यमानता (नास्तिता)

विद्यते - भवति

सतः - सत्पदार्थस्य

अपि - अपि

अन्तः - निश्चयः

Downloaded from www.omkaravidya.com

अनयोः - अनयोः
उभयोः - द्वयोः
दृष्टः - वीक्षितः
तत्तवदर्शिभिः - ब्रह्मविद्भिः

अन्वयः
असतः भावः न विद्यते | सतः अभावः न विद्यते ।अनयोः उभयोः अपि अन्तः तत्त्वदर्शिभिः दृष्टः |

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षोडषः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् बोधितावान् । पूर्वं श्लोकेषु आत्मा नित्यं निर्विकाराम् च | आनात्मा देहः अनित्यं सविकारः च एवं वयं दृष्टवन्तः | अस्मिन् श्लोके असतः भावः न भवति | सतः अभावः न भवति। अतः कृष्णः आत्मा सत्यम् देहं मिथ्या इति उक्तवान् | एवं आत्मानात्मनोः उभयोः सत्यत्वम् अपि तत्त्वदर्शिभिः दृष्टः | एवम् उक्तवान् ।

व्याकरणम्
सन्धिः
न + असतः - सवर्णदीर्घसन्धिः
न + अभावः - सवर्णदीर्घसन्धिः
अभावः + विद्यते - विसर्गउकारः
दृष्टः + अन्तः - विसर्गउकारः
अनयोः + तत्त्वदर्शिभीः- विसर्गसकारः

समासः
असतः न सत् तस्य नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

कृदन्तः
दृष्टः - दृशिर् + क्त प्रत्ययः
असतः + विद्यते - विसर्गउकारः
भाव : + न - विसर्गउकारः
उभयिः + अपि- विसर्गरेफः
तु + अनयोः - यण्सन्धिः
अभावः: - न भावः - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ 2.17॥

पदच्छेदः
अविनाशि तु तत् विद्धि येन सर्वम् इदम् ततम् विनाशम् अव्ययस्य अस्य न कश्चित् कर्तुम् अर्हति

पदपरिचयः
अविनाशि - नकार.नपु. द्वि एक
तु - अव्ययम्
विद्धि - लोट् मपु एक
तत् - दकार. नपु. द्वि एक
येन - दकार. नपु. तृ एक
सर्वम् - अकार. नपु. प्र एक
ततम् - अकार. नपु. प्र एक

Downloaded from www.omkaravidya.com

अव्ययस्य - अकार. पु. ष एक
न - अव्ययम्
कर्तुम् -अव्ययम्
इदम् - मकार. नपु. प्र एक
विनाशम् - अकार. पु. द्वि एक
अस्य - मकार. पु. ष एक
कश्चित् - अव्ययम्
अर्हति - लट् प्रपु एक

पदार्थः
अविनाशि - विनाशरहितम्
तत् - तत्त्वं
विद्धि - जानीहि
सर्वम् - सर्वम्
ततम् - व्याप्तम्
अव्ययस्य - तत्त्वस्य
न-न
कर्तुम् - कर्तुम्
येन - येन
इदम् - एतत्
विनाशम् - नाशम्
अस्य - एतस्य
कश्चित् - कोपि
अर्हति - शक्नोति

अन्वयः
इदं सर्वं येन ततम् तत् अविनाशि तु विद्धि । अव्ययस्य अस्य विनाशम् कर्तुं कश्चित् न अर्हति ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तदशः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकार सत्यं च । अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् येन आत्मतत्वेन इदं जगत् व्याप्तम् तत् अव्ययम् इति जानीहि। अस्य अव्ययस्य विनाशं कर्तु कोऽपि न शक्नोति । एवम् उक्तवान् ।

व्याकरणम्

सन्धिः

तत् + विद्धि - जश्त्वसन्धिः

अव्ययस्य + अस्य - सवर्णदीर्घसन्धिः

कः + चित् - विसर्ग सकारः

समासः

अविनाशि - न विनाशि - नञ्तत्पुरुषः

अव्ययस्य - न विद्यते व्ययः यस्य तत् तस्य - नञ्बहुव्रीहिः

कृदन्तः

कर्तुम् - कृ + तुमुन्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ **2.18**॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अन्तवन्तः इमे देहाः नित्यस्य उक्ताः शरीरिणः अनाशिनः अप्रमेयस्य तस्मात् युध्यस्व भारत

पदपरिचयः
अन्तवन्तः - तकार. पु प्र बहु
इमे - मकार. पु. प्र बहु
देहाः - अकार. पु. प्र बहु
नित्यस्य -अकार पु ष. एक
उक्ताः - अकार. पु. बहु
शरीरिणः - नकार. पु. ष एक
अप्रमेयस्य - अकार. पु.ष एक
युध्यस्व - लोट् मपु एक
नाशिनः - नकार. पु. ष एक
तस्मात् - दकार. पु. प एक
भारत - अकार. पु. सं प्र एक

पदार्थः
अन्तवन्तः - अन्तविनाशिनः
इमे - इमे
देहाः - शरीराणि
नित्यस्य - नित्यभावस्य
उक्ताः - उदिताः
शरीरिणः - देहिनः
अप्रमेयस्य - न प्रमेयस्य
युध्यस्व - युद्धं कुरु
अनाशिनः - नाशरहितस्य

Downloaded from www.omkaravidya.com

तस्मात् - अतः
भारत - भरतकुलश्रेष्ठ

अन्वयः
नित्यस्य अनाशिनः अप्रमेयस्य शरीरिणः इमे देहाः अन्तवन्तः उक्ताः | हे भारत तस्मात् युद्धस्व |

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये अष्टादशः श्लोकः | भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकार सत्यं अव्ययभावः च | अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् | अस्मिन श्लोके भगवान् इमे देहाः अन्तविनाशः आत्मा अप्रमेयः शरीरिणः अनाशिनः | हे भारत ! तस्मात्काराणात् युद्धं कुरु । एवम् उक्तवान् |

व्याकरणम्
सन्धिः
अन्तवन्तः + इमे - विसर्ग लोपः
देहाः + नित्यस्योक्ता - विसर्ग atc:
नित्यस्य + उक्ताः - गुणसन्धिः
अनाशिनः + अप्रमेयस्य - विसर्ग उकारः गुण पूर्वरूपसन्धिः
तस्मात् + युध्यस्व - जश्त्वसन्धिः

समासः
अनाशिन- न नाशिनः - नञ्तत्पुरुषः
अप्रमेयः - न प्रमेयः - नञ्तत्पुरुषः

तद्धितान्तः
भारत - भरतस्य गोत्रापत्यं पुमान् भारतः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

य एनं वेत्ति न्ताहरं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ 2.19॥

पदच्छेदः
यः एनं वेत्ति हन्तारं यः च एनम् मन्यते हतम् उभौ तौ न विजानीतः न अयं हन्ति न हन्यते

पदपरिचयः
यः - दकार. पु. प्र एक
एनं - दकार. पु. द्वि एक
वेत्ति - लट् प्रपु  एक

यः - अकार. पु. प्र एक
एनम् - दकार. पु. द्वि एक
हतम् - अकार. पु. द्वि एक
तौ - दकार. पु. प्र द्वि
विजानीतः - लट् प्रपु द्वि
अयं - मकार. पु. प्र एक
न - अव्ययम्
हन्तारं - ऋकार. पु. द्वि एक
च -अव्ययम्
मन्यते - लट् प्रपु एक
उभौ - अकार. पु. प्र द्वि

Downloaded from www.omkaravidya.com

न - अव्ययम्
हन्ति - लट् कर्तरि प्रपु एम
हन्यते - लट् कर्मणि प्रपु एक

पदार्थः
यः -यः
एनं - आत्मानम्
वेत्ति - जानाति
हन्तारं - मारकम्
यः - यः
एनम् - आत्मानम्
हतम् - मारितम्
तौ -तौ
च-च
मन्यते - जानाति
उभौ - उभौ
न-न
विजानीत: - अवगच्छतः
न-न
अयं - एषः आत्मा
हन्ति - मारयति
न-न
हन्यते - मार्यते

अन्वयः
यः एनं हन्तारं वेत्ति यः एनं हतं मन्यते तौ उभौ न विजानीतः | अयं न हन्ति न हन्यते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवदशः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकार सत्यं अव्ययभावः अप्रमेयः च । अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् आत्मा अकर्ता । अत्मा कोऽपि कार्यं न करोति। कार्यस्य फलमपि न अनुभवति । अतः आत्मा अकर्ता अभोक्ता च । आत्मा न हन्ति च न हन्यते । यः एवं न जानाति सः अज्ञानी। एवम् उक्तवान् ।

व्याकरणम्

सन्धिः

यः + एनमं - विसरगलोपः

यः + च विसर्गसकारः

च + एनम् - वृद्धिसन्धिः

विजानीतः +न - विसर्गउकारः

न + अयम् - सवर्णदीर्घसन्धिः

कृदन्तः

हतम् - हन् + क्त + तम्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ 2.20॥

Downloaded from www.omkaravidya.com

पदच्छेदः
न जायते म्रियते वा कदाचित् न अयं भूत्वा भविता वा न भूयः अजः नित्यः शाश्वतः अयं पुराणः न हन्यते हन्यमाने शरीरे

पदपरिचयः
न - अव्ययम्
जायते - लट् प्रपु एक
वा - अव्ययम्
न - अव्ययम्
भूत्वा - अव्ययम्
वा - अव्ययम्
भूयः - अव्ययम्
नित्यः - अकार. पु प्र एक
अयं - मकार. पु प्र एक
न - अव्ययम्
हन्यमाने - - अकार. नपु स एक
म्रियते - लट् प्रपु एक
कदाचित् - अव्ययम्
अयं - मकार. पु प्र एक
भविता - लुट् प्रपु एक
न - अव्ययम्
अजः - अकार. पु प्र एक
शाश्वतः - अकार. पु प्र एक
पुराणः - अकार. पु प्र एक
हन्यते - लट् प्रपु एक
शरीरे - अकार. नपु स एक

पदार्थः

Downloaded from www.omkaravidya.com

न-न
जायते - उत्पद्यते
वा-वा
न-न
भूत्वा - उत्पद्य
वा-वा
भूयः - पुनः
म्रियते - म्रियते
कदाचित् - कदापि
अयं - एषः आत्मा
भविता - भविता
न-न
अजः - जन्मरहितः
नित्यः - निर्विकारः
शाश्वतः - क्षयरहितः
अयं - एषः आत्मा
पुराणः - पुरातनः
न-न
हन्यते - मार्यते
हन्यमाने - नाशितेऽपि
शरीरे - देहे

अन्वयः
अयम् अजः नित्यः शास्वतः पुराणः (तस्मात्) शरीरे हन्यमाने अयं कदाचित् न हन्यते न जायते न म्रियते वा । भूत्वा भूयः भविता वा न ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये विंशतितमः श्लोकः । पूर्वेषु श्लोकेषु

Downloaded from www.omkaravidya.com

आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च । अनात्मा अनित्यं सविकारः असत्यं च एवम् उक्तवान् । अस्मिन श्लोके भगवान् आत्मा न जायते न म्रियते च । अस्माकं देहे षड्विधविकाराणि अनुभवन्ति । किन्तु आत्मा नित्यमेव परिणमति । अतः आत्मा अजः नित्यः शाश्वतः पुराणः । शरीरं नाशयितुमपि आत्मा न । एवम् उक्तवान् ।

व्याकरणम्

सन्धिः

कदाचित् + न परसवर्णसन्धिः

न + अयम् - सवर्णदीर्घसन्धिः

शाश्वतः + अयं - विसर्गउकारः पूर्वरूपसन्धिः

पुराणो न - पुराणः + न - विसर्गउकारः

समासः

अजः न जायते इति अजः उपपदसमासः

कृदन्तः

भूत्वा - भू + क्तवा

हन्यमाने - हन् + शानच्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ 2.21॥

Downloaded from www.omkaravidya.com

पदच्छेदः
वेद अविनाशिनं नित्यं यः एनम् अजम् अव्ययम् कथं सः पुरुषः पार्थ कं घातयति हन्ति कम्

पदपरिचयः
वेद - विद् लट् प्रपु एक
नित्यं - अकार. पु द्वि एक
एनम् - दकार. पु द्वि एक
अव्ययम् - अकार. पु द्वि एक
सः - दकार. पु प्र एक
पार्थ - अकार. पु सं प्र एक
घातयति - लट् प्रपु एक
कम् - दकार. पु द्वि एक
अविनाशिनम् - नकार. पु द्वि एक
यः - दकार. पु प्र एक
अजम् - अकार. पु द्वि एक
कथं -अव्ययम्
पुरुषः - अकार. पु प्र एक
कं - दकार. पु द्वि एक
हन्ति - लट् प्रपु एक

पदार्थः
वेद - जानाति
नित्यं - निर्विकारम्
एनम् - एतम् आत्मा
अव्ययम् - विकाररहितम
सः - सः
पार्थे - अर्जुनः

Downloaded from www.omkaravidya.com

घातयति - सूदुयति
कम् - कम्

अन्वयः
विनाशिनं - नाशरहितम्
यः - यः पुरुषः
अजम् - जन्मरहितम्
कथं - कथम्
पुरुषः - नरः
कं - कम्
हन्ति - मारयति

अन्वय:
हे पार्थ ! यः एनम् (आत्मा) अजम् अव्ययम् अविनाशिनं नित्यम् (च) वेद सः पुरुषः कथं कं घातयति कं हन्ति?

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये एकविंशतितमः श्लोकः। भगवान् श्रीकृष्ण: अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अप्रमेयः अकर्ता अभोक्ता च। अनात्मा अनित्यं सविकार: असत्यं च एवं उक्तवान्। अस्मिन श्लोके भगवान् अयम् आत्मा विनाशरह्वितः नित्यः जन्मरहितः अपक्षयरहितः च इति यः जानाति सः ज्ञानी एव। तादृशः ज्ञानवान् पुरुष: अन्यं कथं वा हन्ति? कथं वा घातयति। एवम् उक्तवान्।

व्याकरणम
सन्धिः
वेद + अविनाशिनं - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

यः + एनम् - विसर्गलोपः
सः + पुरुषः – विसर्गलोपः

समासः
अविनाशिनम् - न विनाशि तम् नञ् तत्पुरुषः
अव्ययम् - न विद्यते व्ययः तत् - नञ्बहुव्रीहिः

तद्धितान्तः
पृथायाः अपत्यं पुमान् पार्थः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ 2.22 ॥

पदच्छेदः
वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरः अपराणि तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही

पदपरिचयः
वासांसि - सकार. नपु . द्वि बहु
जीर्णानि - अकार. नपु . द्वि बहु
यथा - अव्ययम्

Downloaded from www.omkaravidya.com

विहाय - अव्ययम्
नवानि - अकार.णपु . द्वि बहु
गृह्णाति - लट् प्र पु एक
नरः - अकार. पु . प्र एक
अपराणि - अकार. नपु . द्वि बहु
तथा - अव्ययम्
शरीराणि - अकार. पु . द्वि बहु
विहाय - अव्ययम्
अन्यानि - अकार. नपु . द्वि बहु
नवानि - अकार. नपु . द्वि बहु
जीर्णानि - अकार. नपु . द्वि बहु
संयाति - लट् प्रपु एक
देही - नकार. पु . प्र एक

पदार्थः
वासांसि - वस्त्राणि
जीर्णानि - मलिनानि
यथा - यथा
विहाय - परित्यज्य
नवानि - नूतनानि
गृह्णाति - धरति
नरः - पुरुषः
अपराणि - इतराणि
तथा - तथा
शरीराणि - शरीराणि
विहाय - परित्यज्य
जीर्णानि -शिथिलानि
अन्यानि - इतराणि

Downloaded from www.omkaravidya.com

संयाति - प्राप्नोति
नवानि - नूतनानि
देही - आत्मा

अन्वयः
नरः यथा जीर्णानि वासांसि विहाय नवानि अपराणि वासांसि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय नवानि अन्यानि शरीराणि संयाति।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्वाविंशतितमः श्लोकः | भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणं उपदिष्टवान् । अस्मिन् श्लोके भगवान् एवम् उक्तवान् यथा लोके पुरुष शिथिलानि वस्त्राणि परित्यज्य अन्यानि अभिनवानि गृह्णाति तथा एव जीर्णानि शरीराणि विहाय अन्यानि शरीराणि सङ्गच्छति |

व्याकरणम्
सन्धिः
नरः + अपराणि - विसर्गउकारः गुणः पूर्वरूपसन्धिः
जीर्णानि + अन्यानि - यण्सन्धिः

कृदन्तः
विहाय - वि+ हा + ल्यप्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥2.23॥

पदच्छेदः
न एनम् छिन्दन्ति शस्त्राणि न एनं दहति पावकः न च एनं क्लेदयन्ति आपः न शोषयति मारुतः

पदपरिचयः
न - अव्ययम्
एनम् - मकार. पु. द्वि एक
छिन्दन्ति - लट् प्रपु बहु
शस्त्राणि - अकार. नपु. प्र बहु
न - अव्ययम्
एनं - मकार. पु द्वि एक
दहति - लट् प्रपु एक
न - अव्ययम्
एनं - मकार. पु. द्वि एक
आपः - अकार. पु. प्र बहु
शोषयति - लट् प्रपु एक
पावकः - अकार. पु. प्र एक
च - अव्ययम्
क्लेदयन्ति - लट् प्रपु बहु
न - अव्ययम्
मारुतः - अकार. पु. प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
न-न
एनम् - एषः आत्मा
छिन्दन्ति -छिन्दन्ति
शस्त्राणि - आयुधानि
न-न
एनं - एषः आत्मा
दहति - भस्मिकरोति
न-न
एनं - एषः आत्मा
आपः - जलम्
शोषयति - शोषयति
पावकः - अग्निः
च-च
क्लेदयन्ति - क्लेदयन्ति
न-न
मारुतः - वायुः

अन्वयः
शस्त्राणि एनम् (आत्मा) न छिन्दन्ति। पावकः एनम् (आत्मा) न दहति। आपः एनम् (आत्मा) न च क्लेदयन्ति। मारुतः ( एनम् आत्मा) न शोषयति।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये त्रयविंशतितमः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च। अनात्मा अनित्यं

Downloaded from www.omkaravidya.com

सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् एनं प्रकृतं देहिनं शस्त्राणि न छिन्दन्ति । तथा पावकः एनम् न भस्मिकरोति । तथा आपः एनम् (आत्मा) न च क्लेदयन्ति । तथा वायुः एनम् न शोषयति । एवम् उक्तवान् ।

व्याकरणम्

सन्धिः

न+ एनम् - गुणसन्धि

च+ एनम् - गुणसन्धि -

क्लेदयन्ति +आपः - यण्सन्धिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥2.24॥

पदच्छेदः

अच्छेद्यः अयम् अदाह्यः अयम् अक्लेद्यः अशोष्यः एव च नित्यः सर्वगतः स्थाणुः अचलः अयं सनातनः

पदपरिचयः

अच्छेद्यः - अकार. पु प्र. एक

अदाह्यः - अकार. पु प्र. एक

अक्लेद्यः - अकार. पु प्र एक

एव -अव्ययम्

Downloaded from www.omkaravidya.com

नित्यः - अकार. पु प्र. एक
स्थाणुः - उकार. पु प्र. एक
अयं - मकार. पु प्र. एक
अयम् - मकार. पु प्र एक
अयम् - मकार. पु प्र. एक
अशोष्यः - अकार. पु प्र. एक
च - अव्ययम्
सर्वगतः - अकार. पु प्र. एक
अचलः - अकार. पु प्र. एक
सनातनः: - अकार. पु प्र. एक

पदार्थः

अच्छेद्यः - छेत्तुम् अयोग्यः
अदाह्यः - दग्धुम् अयोग्यः
अक्लेद्यः - क्लेदितुम् अशक्तः
एव -एव
नित्यः - शास्वतः
स्थाणुः - स्थिरः
अयं - एषः आत्मा
अयम् - एषः आत्मा
अयम् - एषः आत्मा
अशोष्यः – शोष्टुम् अशक्तः
च-च
सर्वगतः सर्वव्यापी
अचलः - सञ्चाररहितः
सनातनः - सनातनः

Downloaded from www.omkaravidya.com

अन्वयः

अयम् अच्छेद्यः अयम् अदाह्यः अक्लेद्यः अशोष्यः एव च । (अयम्) नित्यः सर्वगतः स्थाणुः अचलः । अयं सनातनः ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये चतुर्विंशतितमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च । अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् अयम् छेत्तुम् अयोग्यः । अयम् दग्धुम् अयोग्यः । अयम् क्लेदितुम् अशक्तः शोष्टुम् अशक्तः सञ्चाररहितः एव च । अयं निर्विकारः शाश्वतः । अयम् आत्मा सर्वव्यापी स्थिरः । अयं आत्मा सनातनः । एवम् उक्तवान् ।

व्याकरणम

सन्धिः

अच्छेद्यः + अयम् - विसर्गउकारः पूर्वरूपसन्धिः

अदाह्यः + अयम् - विसर्गउकारः पूर्वरूपसन्धिः

अक्लेद्यः + अशोष्यः - विसर्गउकारः पूर्वरूपसन्धिः

अचलः + अयम् - विसर्ग उकारः पूर्वरूपसन्धिः

अशोष्यः + एव - विसर्गलोपः

स्थाणुः + अचलः विसर्गरेफः

समासः

न छेद्यः - अच्छेद्यः - नञ्तत्पुरुषः न दाह्यः - अदाह्यः - नञ्तत्पुरुषः

न क्लेद्यः - अक्लेद्यः - नञ्तत्पुरुषः न शोष्यः - अशोष्यः - नञ्तत्पुरुषः

न चलः - अचलः -नञ्तत्पुरुषः सर्वं गतः - सर्वगतः - द्वितीया तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ 2.25॥

पदच्छेदः
अव्यक्तः अयम् अचिन्त्यः अयम् अविकार्यः अयम् उच्यते तस्मात् एवं विदित्वा एनं न अनुशोचितुम् अर्हसि

पदपरिचयः
अव्यक्तः - अकार. पु प्र एक
अचिन्त्यः - अकार. पु प्र एक
अविकार्यः - अकार. पु प्र एक
उच्यते - लट् प्रपु एक
एवं - अव्ययम्
एनं - मकार. पु द्वि एक
अनुशोचितुम् - अव्ययम्
अयम् - मकार. पु प्र एक
अयम् - मकार. पु प्र एक
अयम् - मकार. पु प्र एक
तस्मात् - दकार. पु प एक
विदित्वा - अव्ययम्
न - अव्ययम्
अर्हसि - लट् मपु एक

पदार्थः

Downloaded from www.omkaravidya.com

अव्यक्तः - अप्रकटः
अचिन्त्यः - निराकारः
अविकार्यः - परिणामः
उच्यते - कथ्यते
एवं - इत्थम्
एनं - एनम्
अनुशोचितुम् - विलरपितुम्
अयम् - एषः आत्मा
अयम् - एषः आत्मा
तस्मात् - अतः
विदित्वा - विज्ञाय
न-न
अर्हसि - योग्यः भ्वसि

अन्वयः
अयम् अव्यक्त: अयं अचिन्त्यः अयम् अविकार्यः (इति) उच्यते | तस्मात् एवम् एनम् (आत्मानम्) विदित्वा अनुशोचितुम् (त्वम्) न अर्हसि |

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चर्विशतितमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च | अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् अयम् आत्मा अव्यक्तः ।अयं अचिन्त्यः अयम् अविकार्यः च इति उच्यते | तस्मात् एवम् एनम् (आत्मानम्) विदित्वा अनुशोचितुम् (त्वम्) न अर्हसि |

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

अव्यक्तः + अयम् - विसर्ग उकारः पूर्वरूपसन्धिः

अचिन्त्यः + अयम् - विसर्ग उकारः पूर्वरूपसन्धिः

अविकार्यः + अयम् - विसर्ग उकारः पूर्वरूपसन्धिः

तस्मात् + एवम् - जश्त्वसन्धिः

विदित्वा + एनम् - वृद्धिसन्धिः

न + अनुशोचितुम् - सवर्णदीर्घसन्धिः

समासः

न व्यक्त: अव्यक्तः - नञ्तत्पुरुषः

न चिन्त्यः - अचिन्त्यः - नञ्तत्पुरुषः

न विकार्यः - अविकार्यः - नञ्तत्पुरुषः

> कृदन्ताः

विद् + क्तवा = विदित्वा

अनु+ शुच् + तुमुन् = अनुशोचितुम्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ 2.26 ॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अथ च एनं नित्यजातं नित्यं वा मन्यसे मृतम् तथा अपि त्वं महाबाहो न एवं शोचितुम् अर्हसि

पदपरिचयः
अथ - अव्ययम्
एनं - दकार. पु द्वि एक
नित्यं - अकार. पु द्वि एक
मन्यसे - लट् मपु एक
तथा - अव्ययम्
त्वं - दकार. पु प्र एक
न - अव्ययम्
शोचितुम् – अव्ययम्
नित्यजातं - अकार. पु द्वि एक
वा - अव्ययम्

मृतम् - अकार. पु द्वि एक
अपि - अव्ययम्
महाबाहो - उकार. पु सं प्र एक
एवं - अव्ययम्
अर्हसि - लट् मपु एक

पदार्थः
अथ - पश्चात्
एनं - देहिनं
नित्यं -सदा
मन्यसे - चिन्तयसि
तथा - तथा

Downloaded from www.omkaravidya.com

त्वं - त्वम्
च - अव्ययम्
नित्यजातं - सर्वदा जायमानम्
वा-वा
मृतम् -नष्टम्
अपि - अपि
महाबाहो -दीर्घबाहो
एवं - इत्थम्
शोचितुम् - खेत्तुम्		अर्हसि - योग्यः अस्ति

अन्वयः
हे महाबाहो! अथ च एनं नित्यजातं नित्यं मृतं वा मन्यसे तथा अपि त्वम् एवं शोचितुम् न अर्हसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षड्विंशतितमः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च। अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् हे महाबाहो! अथ च एनं नित्यजातं नित्यं मृतं वा मन्यसे तथा अपि त्वम् एवं शोचितुं न अर्हसि।

व्याकरणम्
सन्धिः
च + एनम् - वृद्धिसन्धिः
तथा +अपि – सवर्णदीर्घसन्धिः		न + एवम् - वृद्धिसन्धिः

कृदन्तः
जातम् जन् + क्त मृतम् - मृ + क्त

Downloaded from www.omkaravidya.com

मूलश्लोकः

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ 2.27॥

पदच्छेदः
जातस्य हि ध्रुवः मृत्युः ध्रुवं जन्म मृतस्य च तस्मात् परिहार्ये अर्थे न त्वं शोचितुम् अर्हसि ।

पदपरिचयः
जातस्य - अकार. पु ष एक
हि - अव्ययम्

ध्रुवः - अकार. पु प्र एक
मृत्युः - अकार. पु प्र एक
ध्रुवम् - अकार. नपु प्र एक
जन्म - नकार.णपु प्र एक
मृतस्य - अकार. पु ष एक
च - अव्ययम्
अपरिहार्ये - अकार. नपु स एक
न - अव्ययम्
शोचितुम् - अव्ययम्
अपरिहार्ये - परिहर्तुम् अयोग्ये
तस्मात् - दकार. पु प एक
अर्थे - अकार. पु स एक

Downloaded from www.omkaravidya.com

त्वं - दकार. पु प्र एक

पदार्थः

जातस्य - उत्पन्नस्य

हि - हि

ध्रुवः - निश्चितम्

मृत्युः -मरणम्

जन्म - उत्पत्तिः

च-च

अर्हसि लट् मपु एक

ध्रुवम् - निश्चितम्

मृतस्य - नष्टस्य

तस्मात् - ततः

अर्थे - विषये

न-न

त्वं - त्वम्

शोचितुम् - खेत्तुम्

अर्हसि - योग्यः भवसि

अन्वयः

जातस्य हि मृत्युः ध्रुवः। मृतस्य च जन्म ध्रुवम् । तस्मात् अपरिहार्ये अर्थे त्वं शोचितुम् न अर्हसि ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तविंशतितमः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय आत्मलरक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च। अनात्मा अनित्यं

Downloaded from www.omkaravidya.com

सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् यः जायते तस्य मरणं निश्चितम् । एवं यः म्रियतेः पुन जन्म निश्चयम् । एवं अस्मिन विषये त्वं दुःखयितुम् न अर्हसि । एवम् उक्तवान् ।

व्याकरणम्

सन्धिः

ध्रुवः + मृत्युः विसर्गउकारः

मृत्युः + ध्रुवम् - विसर्गरेफः

तस्मात् + अपरिहार्ये - जश्त्वसन्धिः

अपरिहार्ये + अर्थे - पूर्वरूपसन्धिः

समासः

अपरिहार्यः - न परिहार्यः - नञ्तत्पुरुषः

कृदन्तः

शोचितुम् - शुच् + तुमुन्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ 2.28॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनानि एव तत्र का परिदेवना

पदपरिचयः

अव्यक्तादीनि - इकार. नपु प्र बहु
भूतानि - अकार.नपु प्र बहु
व्यक्तमध्यानि - इकार. नपु प्र बहु
भारत - अकार. पु सं प्र
अव्यक्तनिधनानि - अकार. नपु प्र बहु
एव - अव्ययम्
तत्र - अव्ययम्
का - दकार. स्त्री प्र बहु
परिदेवना - अःशकार.स्त्री प्र एक

पदार्थः
अव्यक्तादीनि - अदर्शनादीनि
भूतानि - जीवाः
व्यक्तमध्यानि - दर्शनानि
भारत - भरतकुलश्रेष्ठ
अव्यक्तनिधनानि - अव्यक्तनिधनानि
एव -एव
तत्र - तस्मिन् विषये
का -का
परिदेवना - आक्रन्दनम्

अन्वयः

Downloaded from www.omkaravidya.com

हे भारत! भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि एव | तत्र का परिदेवना

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये अष्टाविंसतितमः श्लोकः | भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च | अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् | अस्मिन श्लोके भगवान् भूतानाम् आदिः अव्यक्तः वर्तते | अन्तः अपि अव्यक्तः वर्तते । इहलोके अनुभवगोचराणि भवन्ति हेतोः मध्यमात्रं हि व्यक्तं दृश्य |अतः तादृशेषु भूतेषु आक्रन्दनेन किं प्रयोजनम्? एवम् उक्तवान् |

व्याकरणम्

सन्धिः

अव्यक्तनिधनान्येव- अव्यक्तनिधनानि + एव - यण् सन्धिः

समासः

अव्यक्तः आदिः येषां ते अव्यक्तादीनि - बहुव्रीहिः

व्यक्तः मध्यः येषां ते व्यक्तमध्यानि – बहुव्रीहिः

अव्यक्तः निधनं येषां ते अव्यक्तानिधनानि – बहुव्रीहिः

तद्धितान्तः

भरत गोत्राप्यां पुमान् भारतः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः |
आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ 2.29॥

पदच्छेदः
आश्चर्यवत् पश्यति कश्चित् एनम् आश्चर्यवत् वदति तथा एव च अन्यः
आश्चर्यवत् च एनम् अन्यः श्रृणोति श्रुत्वा अपि एनं वेद न च एव कश्चित्

पदपरिचयः
आश्चर्यवत् - अव्ययम्
पश्यति - लट् प्रपु एक
एनम् - मकार. पु द्वि एक
वदति - लट् प्रपु एक
एव - अव्ययम्
अन्यः - अकार. पु प्र एक
च - अव्ययम्
अन्यः - अकार. पु प्र एक
श्रुत्वा – अव्ययम्
एनं - दकार. पु द्वि एक
न - अव्ययम्
एव - अव्ययम्
एनम् - दकार. पु द्वि एक
श्रृणोति - लट् प्रपु एक
अपि - अव्ययम्
वेद - लट् प्रपु एक

Downloaded from www.omkaravidya.com

च - अव्ययम्
कश्चित् - अव्ययम्

पदार्थः
आश्चर्यवत् - अद्भुतवत्
पश्यति - वीक्षते
एनम् - आत्मानम्
वदति - कथयति
एव -एव
अन्यः - अपरः
कश्चित् - अव्ययम्
आश्चर्यवत् - अव्ययम्
तथा - अव्ययम्
च - अव्ययम्
आश्चर्यवत् - अव्ययम्
कश्चित् - कोऽपि पुरुषः
आश्चर्यवत् - अद्भुतवत्
तथा - तथा
च-च
आश्चर्यवत् - अद्भुतवत्
च -च
एनम् - अमुम्
अन्यः - अपरः
श्रृणोति - अकर्णयति
श्रुत्वा - अकर्ण्य
अपि - अपि
एनं - आत्मानम्
वेद - जानाति

Downloaded from www.omkaravidya.com

न-न
च-च
एव - एव
कश्चित् - कश्चित्
अन्वयः
कश्चित् एनम् आश्चर्यवत् पश्यति | तथा एव अन्यः च एनम् आश्चर्यवत् वदति अन्यः च एनम् आश्चर्यवत् शृणौति । श्रृत्वा अपि च कश्चित् न वेद एव ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवविंशतितमः श्लोकः ।अस्मिन श्लोके भगवान् कश्चन एनम् आत्मानम् अद्भुतमिव वीक्षते ।अन्यः कश्चन एनम् अद्भुतमिव कथयति। अपरः एनम् अद्भुतमिव श्रृणोति | अन्यः च श्रुत्वा अपि एनम् न जानाति । एवम् उक्तवान् ।

व्याकरणम्
सन्धिः
कश्चित् + एनम् - जश्त्वसन्धिः
आश्चर्यवत् + वदति - जश्त्वसन्धिः
तथा + एव - वृद्धिसन्धिः
च + एव - वृद्धिसन्धिः
च + अन्यः - सवर्णदीर्घसन्धिः
श्रुत्वा + अपि - सवर्णदीर्जसन्धिः
आश्चर्यवत् + च - श्चुत्वसन्धिः
अपि + एनम् - यण्सन्धिः

कृदन्तः
श्रृत्वा- श्रु + क्त्वा

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ 2.30॥

पदच्छेदः
देही नित्यम् अवध्यः अयं देहे सर्वस्य भारत तस्मात् सर्वाणि भूतानि न त्वं शोचितुम् अर्हसि

पदपरिचयः
देही - नकार. पु प्र एक
नित्यम् - अकार. नपु प्र एक
अवध्यः - अकार. पु प्र एक
अयं - मकार. पु प्र एक
देहे - अकार. पु स एक
सर्वस्य - अकार. पु ष एक
भारत - अकार. पु सं प्र एक
तस्मात् - दकार. पु प एक
सर्वाणि - अकार. नपु द्वि बहु
भूतानि - अकार. नपु द्वि बहु
न - अव्ययम्
त्वं - दकार. पु प्र एक
शोचितुम् - अव्ययम्
अर्हसि - लट् मपु एक

पदार्थः

Downloaded from www.omkaravidya.com

देही - आत्मा
नित्यम् - सदा
अवध्यः - हन्तुम् अशक्तः
अयं - एषः
देहे - शरीरे
सर्वस्य -सकलस्य
भारत - अर्जुन
तस्मात् - ततः
सर्वाणि - सकलानि
भूतानि - प्राणिनः
न-न
त्वं - त्वम्
शोचितुम् - दुःखयितुम्
अर्हसि - योग्यः असि

अन्वयः
हे भारत! सर्वस्य देहे अयं देही नित्यम् अवध्यः। तस्मात् त्वं सर्वाणि भूतानि शोचितुम् न अर्हसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये त्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च । अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् हे भारत ! अयम् आत्मा सर्वासु अवस्थासु अवध्यः । परन्चु सः नित्यं स्थावरादिषु सर्वेषु अपि स्थितः। तस्मात् त्वं कोपि न हंसि । अस्ति चेत् अपि तेषां शरीरं एव हंसि । आत्मा न । अतः त्वं चिन्ताम् त्यज । एवम् उक्तवान् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
अवध्योऽयं - अवध्यः + अयम् - विसर्ग उकारः पूर्वरूपसन्धिः

समासः
अवध्यः - न वध्यः - नञ्तत्पुरुषः

> कृदन्तः
शोचितुम् - शुच् + तुमुन्

* तद्धितान्तः
भारत - भरतस्य अपत्यं पुमान्

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ 2.31॥

पदच्छेदः
स्वधर्मम् अपि च अवेक्ष्य न विकम्पितुम् अर्हसि धर्म्यात् हि युद्धात् श्रेयः अन्यत् क्षत्रियस्य न विद्यते

पदपरिचयः
स्वधर्मम् - अकार. पु. द्वि एक

Downloaded from www.omkaravidya.com

अपि - अव्ययम्
च - अव्ययम्
अवेक्ष्य - अव्ययम्
न - अव्ययम्
विकम्पितुम् - अव्ययम्
अर्हसि - लट् मपु एक
धर्म्यात् - अकार. नपु. प एक
युद्धात् - अकार. नपु. प एक
अन्यत् - अकार. नपु. प्र एक
न - अव्ययम्
श्रेयः - सकार. नपु. प्र एक
क्षत्रियस्य - अकार. पु. ष एक
विदयते - लट् प्रपु एक

पदार्थः
स्वधर्मम् - आत्मधर्मम्
अपि - अपि
च-च
अवेक्ष्य - विल्लोक्य
न-न
विकम्पितुम् - चलितुम्
हि - अव्ययम्
अर्हसि - शक्नोषि
धर्म्यात् - धर्मयुक्तात्
हि - हि
युद्धात् - रणात्
श्रेयः - हितम्
अन्यत् -अन्यत्

Downloaded from www.omkaravidya.com

क्षत्रियस्य - क्षत्रियकुलोद्भवस्य
विद्यते - लभते

अन्वयः
अपि च (त्वम्) स्वधर्मम् अवेक्ष्य विकम्पितुम् न अर्हसि । क्षत्रियस्य धर्म्यात् हि युद्धात् अन्यत् श्रेयः न विद्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये एकत्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मलक्षणम् उपदिष्टवान् । पूर्वेषु श्लोकेषु आत्मा नित्यं निर्विकारः सत्यं अव्ययभावः अप्रमेयः अकर्ता अभोक्ता च । अनात्मा अनित्यं सविकारः असत्यं च एवं उक्तवान् । अस्मिन श्लोके भगवान् युद्ध क्षत्रियस्य स्वधर्मः । तम् अवेक्ष्य त्वं न विकम्पितुम् न अर्हसि । तत् तव धर्ममेव । यस्मात् तत् युद्धे जयद्वारेण धर्मार्थप्रजारक्षणार्थं च भविष्यति । अतः तत् न्यायसहित श्रेष्ठधर्मः । अतः धर्म्यात् युद्धात् श्रेयः अन्यत् क्षत्रियस्य न विद्यते । एवम् उक्तवान् ।

व्याकरणम्
सन्धिः
च + अवेक्ष्य – सवर्णदीर्घसन्धिः धर्म्यात + हि - पूर्वसवर्णसन्धिः
युद्धात् + श्रेयः - श्चुत्वम् छत्वसन्धिः
श्रेयः + अन्यत् - विसर्ग विसर्ग उकारः पूर्वरूपसन्धिः

समासः
स्वधर्मम् - स्वस्य धर्मः तम् षष्ठितत्पुरुषः
कृदन्तः
अवेक्ष्य - अव + ईक्ष + ल्यप्
विकम्पितुम् - वि+ कम्प् + तुमुन्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ 2.32॥

पदच्छेदः
यदृच्छया च उपपन्नं स्वर्गद्वारम् अपावृतम् सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धम् ईदृशम्

पदपरिचयः
यदृच्छया - आकार. स्त्री तृ एक
च - अव्ययम्
उपपन्नम् - अकार. नपु द्वि एक
स्वर्गद्वारम् - अकार. नपु द्वि एक
अपावृतम् - अकार. नपु द्वि एक
सुखिनः - नकार. पु प्र बहु
क्षत्रियाः - अकार. पु प्र बहु
पार्थ - अकार. पु सं प्र एक
लभन्ते - लट् प्रपु बहु
ईदृसम् - अकार. नपु द्वि एक
युद्धम् - अकार. नपु द्वि एक

पदार्थः
यदृच्छया -अप्रार्थितया
च-च
उपपन्नम् - आगतम्

Downloaded from www.omkaravidya.com

स्वर्गद्वारम् - स्वर्गकपाटम्
अपावृतम् - उद्घाटितम्
सुखिनः - भाग्यवन्तः
क्षत्रियाः - क्षत्रियवर्णजनाः
पार्थ - अर्जुन
लभन्ते - प्राप्नुवन्ति
युद्धम् - रणम्

अन्वयः
हे पार्थ ! यदृच्छया उपपन्नं अपावृतं स्वर्गद्वारम् ईदृशम् युद्धम् क्षत्रियाः लभन्ते (ते) सुखिनः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्वात्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय अयं श्लोकतः सप्तत्रिंशत्तम श्लोकाः पर्यन्तं धर्माधर्मविवेकम् उपतिष्टवान्। अस्मिन् श्लोके भगवान् श्रीकृष्णः है पार्थ ! ईदृशं युद्धं वयं न एच्छाम। युद्धं विहाय धर्मपरिपालनं कर्तुं अनेक प्रयत्नं कृतवन्तः । परन्तु युद्धम् अप्रार्थतया अभ्रवन् । किन्तु एवं युद्धं द्वारा वीराः स्वर्गं प्राप्ष्यन्ति। तव पूर्वपुण्यफलेन धर्मयुद्धं कर्तुं भाग्यं प्राप्तवान्। अतः चिन्तां त्यज । एवम् अवदत् ।

व्याकरणम्
सन्धिः
च + उपपन्नम् -यण्सन्धिः

समासः
स्वर्गस्य द्वारम् - स्वर्गदवारं षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ 2.33॥

पदच्छेदः
अथ चेत् त्वम् इमं धर्म्यं सङ्ग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि

पदपरिचयः
अथ - अव्ययम्
चेत् - अव्ययम्
त्वम् - दकार. त्रि प्र एक
इमं - मकार. पु. द्वि एक
धर्म्यम् - अकार. पु. द्वि एक
सङ्ग्रामं अकार. पु. द्वि एक
न - अव्ययम्
करिष्यसि - लृट् मपु एक
ततः - अव्ययम्
स्वधर्मं -अकार. पु. द्वि एक
कीर्तिं - इकार. स्त्री द्वि एक
च - अव्ययम्
हित्वा - अव्ययम्
पापम् - अकार. नपु. द्वि एक
अवाप्स्यसि -लृट् मपु एक

Downloaded from www.omkaravidya.com

पदार्थः
अथ - पश्चात्
चेत् - चेत्
त्वम् - त्वम्
इमं - एनम्
धर्म्यम् - धर्मयुक्तम्
सङ्ग्रामं - युद्धम्
न-न
करिष्यसि - कर्तु शक्नोषि
ततः - ततः
स्वधर्म - स्वधर्मम्
कीर्तिं - यशः
च-च
हित्वा - वर्जित्वा
पापम् - पापम्
अवाप्स्यसि - प्राप्स्यसि

अन्वयः
अथ त्वमं धर्म्यम् इमं संग्रामम् न करिष्यसि चेत् ततः (तव) स्वधर्मं म् कीर्तीम् च हित्वा पापम् अवाप्स्यसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये त्रयत्रिंशत्तमः श्लोकः | भगवान् श्रीकृष्णः अर्जुनाय एकत्रिंशत्तमात् श्लोकात् सप्तत्रिंशत्तमः श्लोकपर्यन्तं धर्माधर्मविवेकम् उपदिष्टवान् | अस्मिन् भगवान् श्रीकृष्णः हे पार्थ! अथ त्वम् धर्मात् अनपेतम् धर्मयुद्धं इमम् धर्म्यम् न करिष्यसि चेत् ततः त्वं स्वधर्मं कीर्ति च हित्वा केवलं पापं अवाप्स्यसि । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
समासः
स्वस्य धर्मम् - स्वधर्मम्

कृदन्तः
हित्वा - हा + क्तवा प्रत्ययः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिं मरणादतिरिच्यते ॥ 2.34॥

पदच्छेदः
अकीर्तिं च अपि भूतानि कथयिष्यन्ति ते अव्ययाम् संभावितस्य च अकीर्तिः मरणात् अतिरिच्यते

पदपरिचयः
अकीर्तिं - इकार. स्त्री द्वि एक
च - अव्ययम्
अपि - अव्ययम्
भूतानि - अकार. नपु प्र एक
कथयिष्यन्ति - लुट् प्रपु बहु
ते - दकार. त्रि ष एक

Downloaded from www.omkaravidya.com

अव्ययाम् - अःशकार. स्त्री द्वि एक
संभावितस्य - अकार. पु ष एक
च - अव्ययम्
अकीर्तिः इ. स्त्री. प्र एक
मरणात् - अकार. नपु प एक
अतिरिच्यते - लट् प्रपु एक

पदार्थः
अकीर्तिं - अपकीर्तिम्
च-च
अपि - अपि
भूतानि - जनाः
कथयिष्यन्ति - वदिष्यन्ति
ते - तव
अव्ययाम् - शाश्वताम्
संभावितस्य - माननीयस्य
च-च
अकीर्तिः - अपकीर्तिः
मरणात् - निधनात्
अतिरिच्यते - अतिशय्यते

अन्वयः
अपि च भूतानि ते अव्ययाम् अकीर्तिं च कथयिष्यन्ति । संभावितस्य अकीर्तिः मरणात् अतिरिच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये चतुस्त्रिंशत्तमः श्लोकः | भगवान् श्रीकृष्णः अर्जुनाय एकत्रिंशत्तमात् श्लोकात् सप्तत्रिंशत्तमः श्लोकपर्यन्तं

Downloaded from www.omkaravidya.com

धर्माधर्मविवेकम् उपदिष्टवान् । अस्मिन् श्लोके भगवान् श्रीकृष्णः हे अर्जुन ! त्वं धर्मयुद्धं न करिष्यसि चेत् जनाः अनेकविधं अव्ययाम् अकीर्तिं कथयिष्यन्ति । एतावत् त्वम् अधिकयशः प्राप्तवान् । किन्तु तत् सर्वं नष्ट्वा अकीर्तिं च प्राप्नोषि । तत् मरणात् अतिरिच्यते । एवम् अवदत् ।

व्याकरणम्

सन्धिः

च + अपि - सवर्णदीर्घसन्धिः

ते + अव्ययाम् - पूर्वरूपसन्धिः

च + अकीर्तिः सवर्णदीर्घसन्धिः

मरणात् + अतिरिच्यते - जश्त्वसन्धिः

समासः

अकीर्तिः - न कीर्तिः - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यासि लाघवम् ॥ 2.35॥

पदच्छेदः

भयात् रणात् उपरतं मंस्यन्ते त्वां महारथाः येषां च त्वं बहुमतः भूत्वा यास्यासि लाघवम्

Downloaded from www.omkaravidya.com

पदपरिचयः

भयात् - अकार. नपु प एक

रणात् - अकार. नपु प एक

उपरतं - अकार. पु द्वि एक

मंस्यन्ते - लुट् प्र बहु

त्वां - दकार. त्रि द्वि एक

महारथाः - अकार. पु प्र बहु

येषां - दकार. त्रि ष. बहु

च - अव्ययम्

त्वं - दकार. त्रि प्र एक

बहुमतः - अकार. पु प्र एक

भूत्वा - अव्ययम्

यास्यासि - लृट् मपु एक

लाघवम् - अकार. नपु प्र एक

पदार्थः

भयात् - भयकारणात्

रणात् - युद्धात्

उपरतं - निवृत्तम्

मंस्यन्ते - चिन्तयिष्यन्ति

त्वां - त्वाम्

महारथाः - महावीराः

येषां - येषाम्

त्वं - त्वम्

बहुमतः – बहुश्रेष्ठाः

भूत्वा - भूत्वा

यास्यासि - प्राप्स्यसि

लाघवम् - लघुभावम्

Downloaded from www.omkaravidya.com

अन्वयः
महारथाः च त्वाम् भयात् रणात् उपरतम् मंस्यन्ते येषां त्वम् बहुमतः भूत्वा लाघवम् यास्यसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः अर्जुनाय एकत्रिंशत्तमात् श्लोकात् सप्तत्रिंशत्तमः श्लोकपर्यन्तं धर्माधर्मविवेकम् उपदिष्टवान् । अस्मिन् श्लोके भगवान् श्रीकृष्णः त्वम् धर्मनिमित्तेन अधिकयशः प्राप्तवान्। किन्तु तत् सर्वं नष्ट्वा अकीर्ति च प्राप्नोषि। महारथाः त्वां भयात् रणात् उपरतम् इति चिन्तयन्ति । त्वं येषां बहुमतः भूत्वा तेषाम् लघुत्वम् यास्यसि। एवम् अवदत् ।

व्याकरणम्
सन्धिः
भयात् + रणात् - जश्त्वसन्धिः
रणात् + उपरतम् - जश्त्वसन्धिः
बहुमतः + भूत्वा - विसर्गउकारः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किं ॥ 2.36॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अवाच्यवादान् च बहून् वदिष्यन्ति तव अहिताः निन्दन्तः तव सामर्थ्यं ततः दुःखतरं नु किं

पदपरिचयः
अवाच्यवादान् - अकार. पु. द्वि बहु
च - अव्ययम्
बहून् - उकार. पु. द्वि बहु
वदिष्यन्ति - लृट् प्रपु बहु
तव - दकार. पु. ष. एक
अहिताः - अकार. पु. प्र बहु
निनदन्तः - दकार. पु. प्र बहु
तव - अकार. त्रि. ष. एक
सामर्थ्यं - अकार. नपु. द्वि एक
ततः - अव्ययम्
दुःखतरं - अकार. नपु. प्र एक
नु - अव्ययम्
किं - दकार. नपु. प्र एक

पदार्थः
अवाच्यवादान् - अवक्तव्यवादान्
च-च
बहून् - अनेकप्रकारान्
वदिष्यन्ति - कथयिष्यन्ति
तव - तव
अहिताः - शत्रवः
निन्दन्तः - कुत्सयन्तः

Downloaded from www.omkaravidya.com

तव - तव
सामर्थ्यं - वीरम्
ततः - ततः
दुःखतरं - कष्ठतरम्
किं - किम्

अन्वयः
तव अहिताः तव सामर्थ्यं निन्दन्तः | बहून् अवाच्यवादान् च वदिष्यन्ति | ततः दुःखतरं किं नु?

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षड्त्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय एकत्रिंशत्तमात् श्लोकात् सप्तत्रिंशत्तमः श्लोकपर्यन्तं धर्माधर्मविवेकम् उपदिष्टवान् । अस्मिन् श्लोके भगवान् श्रीकृष्णः तव शत्रवः अवक्तव्यवादान् बहून् कथयिष्यन्ति | तव सामार्थ्यं निन्दन्ति | तत दुःखतरं किं नु ? एवम् अवदत् ।

व्याकरणम्
सन्धिः
अवाच्यवादान् + च - सत्वसन्धिः
तव + अहिताः सवर्णदीर्घसन्धिः
निन्दन्तः + तव - विसर्ग सकारः
ततः +दुःखतरम् - विसर्ग उकारः

समासः
अवाच्यवादान् - न विद्यते वाच्यवादः येषाम् ते तान् - नञ्बहुव्रीहिः
अहिताः - न विद्यते हितम् येषाम् ते नञ्बहुव्रीहिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ 2.37॥

पदच्छेदः
हतः वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् तस्मात् उत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः

पदपरिचयः
हतः - अकार. पु प्र एक
वा - अव्ययम्
प्राप्स्यसि - लृट् मपु एक
स्वर्ग - अकार. पु द्विएक
जित्वा - अव्ययम्
वा – अव्ययम्
महीम् - इकार स्त्री द्वि बहु
उत्तिष्ठ - लोट् मपु एक
युद्धाय - अकार. नपु च एक

पदार्थः
हतः - मारितः
वा-वा
प्राप्स्यसि - लप्स्यसे
स्वर्ग - स्वर्गलोकम्
जित्वा - जित्वा

Downloaded from www.omkaravidya.com

वा-वा
भोक्ष्यसे - अनुभविष्यसि
महीम् - राज्यम्
तस्मात् - अतः
भोक्ष्यसे - तृट् मपु एक
तस्मात् - दकार. पु प एक
कौन्तेय - अकार. पु सं प्र एक
कृतनिश्चयः - अकार. पु प्र एक
उत्तिष्ठ - उत्तिष्ठ
कोन्तेय - कुन्त्याः पुत्र
युद्धाय - युद्धं कर्तुम्
कृतनिश्चयः - निःसन्देहः

अन्वयः
हे कौन्तेय ! हतः वा स्वर्गं प्राप्स्यसि । जित्वा वा महीम् भोक्ष्यसे । तस्मात् युद्धाय कृतनिश्चयः उत्तिष्ठ ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तत्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय एकत्रिंशत्तमात् श्लोकात् सप्तत्रिंशत्तमः श्लोकपर्यन्तं धर्माधर्मविवेकम् उपदिष्टवान् । अस्मिन् श्लोके भगवान् श्रीकृष्णः त्वं युद्धे हतः चेत् स्वर्गं प्राप्स्यसि । त्वं युद्धे जित्वा राज्यं प्राप्स्यसि । ततः त्वं जनेभ्यः अनेकविध-उपकारान् दास्यसि । हे कौन्तेया तस्मात् युद्धं कर्तुं निश्चय मनसा उत्तिष्ठ । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

हतः + वा - विसर्गउकारः

तस्मात् + उत्तिष्ठ - जश्त्वसन्धिः

समासः

कृतनिश्चयः - कृतः निश्चयः येन सः - समानाधिकरणबहुव्रीहिः

कृदन्तः

हन् + क्त - हतः

जि + क्त्वा - जित्वा

तद्धितान्तः

कौन्तेयः - कुन्त्याः अपत्यं पुमान्

## श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ 2.38॥

पदच्छेदः

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततः युद्धाय युज्यस्व न एवं पापम् अवाप्स्यसि

Downloaded from www.omkaravidya.com

पदपरिचयः

सुखदुःखे - अकार नपु. द्वि द्वि

समे - अकार नपु. द्वि द्वि

कृत्वा - अव्ययम्

लाभालाभौ - अकार पु. द्वि द्वि

जयाजयौ - अकार पु. द्वि द्वि

ततः - अव्ययम्

युद्धाय - अकार नपु. च एक

युज्यस्व लोट् मपु एक

न - अव्ययम्

एवं - अव्ययम्

पापम् - अकार नपु. द्वि एक

अवाप्स्यसि - लृट् मपु एक

पदार्थः

सुखदुःखे - सुखदुःखे

समे - तुल्ये

कृत्वा - कृत्वा

लाभालाभौ - लाभः अलाभः च

जयाजयौ - जयः अजयः च

ततः: - अतः

युद्धाय - युद्धाय

युज्यस्व - युद्धं कुरु

न-न

एवं - एवम्

पापम् - पापम्

अवाप्स्यसि - प्राप्स्यसि

Downloaded from www.omkaravidya.com

अन्वयः
सुखदुःखे लाभालाभौ जयाजयौ च समे कृत्वा ततः युद्धाय युज्यस्व । एवम् पापम् न अवाप्स्यसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये अष्टात्रिंशत्तमः श्लोकः । अस्मिन् श्लोके भगवान् श्रीकृष्णः हे अर्जुन! यदि युद्धे त्वं जयसि तत् लाभम् । तेन कारणेन सुखं प्राप्स्यसि । यदि युद्धे अजयं प्राप्स्यसि चेत् तत् तव अलाभः एव । परन्तु त्वं जयम् अजयं लाभम् अलाभम् सुखदुःखं च समानभावेन चिन्तय । ततः त्वं युद्धाय युज्यस्व । एवं दृढनिश्चयेन धर्मयुद्धं करोषि चेत् पापं न अवाप्स्यसि । एवम् अवदत् ।

व्याकरणम्
सन्धिः
ततः + युद्धाय - विसर्ग उकारः
न + एवम् - वृद्धिसन्धिः

समासः
सुखदुःखे - सुखं च दुःखं च - इतरेतरद्वन्द्वसमासः
लाभालाभौ - लाभः च अलाभः च - इतरेतरद्वन्द्वसमासः
जयाजयौ - जयः च अजयः च - इतरेतरद्वन्द्वसमासः

कृदन्तः
कृत्वा -कृ + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

एषा तेऽभिहिता साङ्ख्ये बुद्धियोगे त्विमां श्रृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ 2.39॥

पदच्छेदः
एषा ते अभिहिता साङ्ख्ये बुद्धिः योगे त्विमां श्रृणु बुद्ध्या युक्तः यया पार्थे कर्मबन्धं प्रहास्यसि

पदपरिचयः
एषा - आकार. स्त्री प्र एक
ते - दकार. त्रि च एक
अभिहिता - आकार. स्त्री प्र एक
साङ्ख्ये - अकार. पु स एक
बुद्धिः - इकार. स्त्री प्र एक
योगे - अकार. पु स एक
इमां - मकार. स्त्री द्विएक
बुद्ध्या - - अःशकार. स्त्री तुएक
यया - दकार. स्त्री तृ एक
कर्मबन्धं - अकार. पु द्वि एक
तु - अव्ययम्
श्रृणु - लोट् मपु एक
युक्तः - अकार. पु प्र एक
पार्थ - अकार. पु सं प्र एक
प्रहास्यसि - लृट् मपु एक

Downloaded from www.omkaravidya.com

पदार्थः
एषा - इदम्
ते -तुभ्यम्
अभिहिता - उक्तः
साङ्ख्ये - आत्मतत्वे
बुद्धिः - बुद्धिः
योगे - योगविषये
इमां - इमाम्
श्रृणु - कर्णय
बुद्ध्या - बुद्ध्या
युक्तः - संयुक्तः
यया - यया
पार्थ - अर्जुन
कर्मबन्धं - कर्मबन्धम्
प्रहास्यसि - त्यक्ष्यसि

अन्वयः
हे अर्जुन! साङ्ख्ये एषा बुद्धिः ते अभिहिता। यया बुद्ध्या युक्ताः कर्मबन्धं प्रहास्यसि। (ताम्) योगे तु इमां श्रृणु।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवत्रिंशत्तमः श्लोकः। अस्मिन् श्लोके भगवान् श्रीकृष्णः आत्मज्ञानविषये तुभ्यम् अहम् बोधयामि। एतावत् आत्मानात्म विवेकं धर्माधर्मविवेकं च अहं बोधितवानस्मि। एतम् विषयं त्वम् न अवगच्छसि चेत् चित्तशुदिः नास्ति इति अर्थः। अतः अधुना आत्मज्ञानविषयं उपदेशं करोमि। हे पार्थ ईश्वरप्रसादयोगबुद्ध्या त्वं कर्मबन्धं प्रहास्यसि। एवम् अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

ते+ अभिहिता - पूर्वरूपसन्धिः

बुद्धिः + योगे - विसर्गरेफः

तु + इमाम् - यण्सन्धिः

युक्तः + यया - विसर्गउकारः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते |
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ 2.40॥

पदच्छेदः

न इह अभिक्रमनाशः अस्ति प्रत्यवायः न विद्यते स्वल्पम् अपि अस्य धर्मस्य त्रायते महतः भयात्

पदपरिचयः

न - अव्ययम्

इह - अव्ययम्

अभिक्रमनाशः - अकार. पु प्र एक

अस्ति - लट् प्रपु एक

प्रत्यवायः - अकार. पु प्र एक

न - अव्ययम्

विद्यते - लट् प्रपु एक

Downloaded from www.omkaravidya.com

स्वल्पम् - अकार. नपु प्र एक
अपि - अव्ययम्
अस्य - मकार. पु ष. एक
धर्मस्य - अकार. पु ष एक
त्रायते - लट् प्रपु एक
महतः - तकार. नपु प एक
भयात् - अकार. नपु प एक

पदार्थः
न-न
इह - इह
अभिक्रमनाशः - प्रारम्भनाशः
अस्ति - अस्ति
प्रत्यवायः - दोषः
न-न
विद्यते - लभते
स्वल्पम् - किञ्चित्
अपि - अपि
अस्य - अस्य
धर्मस्य - योगमार्गस्य
त्रायते - रक्षति
महतः - महतः
भयात् - भयकारणात्

अन्वयः
इह अभिक्रमनाशः न अस्ति । प्रत्यवायः न विद्यते । अस्य धर्मस्य स्वल्पमपि महतः भयात् त्रायते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याय् चत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मानात्मविवेकं धर्माधर्मविवेकं च उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः कर्मयोगस्य प्रारम्भानन्दरम नाशः न भवति । प्रत्यवायः अपि नास्ति | किन्तु योगधर्मस्य स्वल्पमपि अनुष्ठानं महतः ससारभयात् रक्षति। एवम् अवदत् ।

व्याकरणम्
सन्धिः
न + इह - गुणसन्धिः
इह + अभिक्रमनाशः - सवर्णदीर्घसन्धिः
प्रत्यवायः + न - विसर्गउकारः
स्वल्पमपि + अस्य - यण्सन्धिः
महतः + भयात् - विसर्गउकारः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन |
बहु शाखा हयनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ 2.41॥

पदच्छेदः
व्यवसायात्मिका बुद्धिः एका इह कुरुनन्दन बहुशाखा हि अनन्ताः च बुद्धयः अव्यवसायिनाम्

Downloaded from www.omkaravidya.com

पदपरिचयः
व्यवसायात्मिका - आ. स्त्री प्र एक
बुद्धिः - आ. स्त्री प्र एक
एका - आ. स्त्री प्र एक
इह -अव्ययम्
कुरुनन्दन - अ. पु सं प्र
बहुशाखाः - आ. स्त्री प्र बहु
हि -अव्ययम्
अनन्ताः - आ. स्त्री प्रबहु
च - अव्ययम्
बुद्धयः - इ स्त्री प्र बहु
अव्यवसायिनाम् - नकार. पु. ष. बहु

पदार्थः
व्यवसायात्मिका - निश्चयस्वभावा
बुद्धिः - योगबुद्धिः
एका - एका
इह - इह
कुरुनन्दन - कुरुवंशोद्भव
बहुशाखाः - अनेकशाखाः
हि- हि
अनन्ताः - अनेकाः
बुद्धयः - बुद्धयः
अव्यवसायिनाम् - निश्चयबुद्धिरहितानाम्

अन्वयः
हे कुरुनन्दन । इह व्यवसात्मिका बुद्धिः एका हि । अव्यवसायिन् बुद्धयः बहु शाखाः अनन्ताः च (सन्ति) ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये एकचत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मानात्मविवेकम् धर्माधर्मविवेकम् च उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः “हे कुरुनन्दन अव्यवसायिनां बुद्धेः अनेकशाखाः अनन्ताः च । परन्तु कर्मयोगे शाखाः न | अत्र एकम् लक्ष्यमेव | कर्मयोगे निश्चय फलं प्राप्स्यति I एवम् अवदत् |

व्याकरणम्

सन्धिः

बुद्धिः + एका - विसर्ग रेफः

एका + इह - गुणसन्धिः

हि + अनन्ताः - यण्सन्धिः

अनन्ताः + च - विसर्गसकारः

बुद्धयः + अव्यवसायिनाम् - विसर्गउकारः पूर्वरूपसन्धिः

बहुशाखाः + हि - विसर्गलोपः

समासः

कुरुनन्दनः - कुरुवंशस्य नन्दनः षष्ठी तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिन : ॥ 2.42॥

कामात्मनः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ 2.43॥

भोगेश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसयात्मिका बुद्धिः समाधौ न विधीयते॥ 2.4411

पदच्छेदः

याम् इमां पुष्पितां वाचम् प्रवदन्ति अविपश्चितः वेदवातरताः पार्थ न अन्यत् अस्ति इति वादिनः कामात्मनः स्वर्गपराः जन्मकर्मफलप्रदाम् क्रियाविशेषबहु लाम् भोगैश्वर्यगतिम् प्रति भोगैश्वर्यप्रसक्तानाम् तयापहृतचेतसाम् व्यवसयात्मिका बुद्धिः समाधौ न विधीयते

पदपरिचयः
याम् - दकार. स्त्री द्वि एक
इमां - दकार. स्त्री द्वि एक
पुष्पितां - आकार. स्त्री द्वि एक
वाचम् - चकार.स्त्री द्वि एक
प्रवदन्ति - लट् प्रषु बहु
अविपश्चितः - तकार. पु प्र बहु
वेदवादरताः - अकार. पु प्र बहु

Downloaded from www.omkaravidya.com

पार्थ - अकार. पु सं प्र एक
न - अव्ययम्
अन्यत् -तकार. नपु प्र एक
अस्ति - लट् प्रपु एक
इति - अव्ययम्
वादिन : - नकार. पु प्र बहु
कामात्मनः - नकार. पु प्र बहु
स्वर्गपराः - अकार. पु प्र बहु
जन्मकर्मफलप्रदाम् - आकार. स्त्री द्वि एक
क्रियाविशेषबहु लाम् - आकार. स्त्री द्वि एक
ओगैश्वर्यगतिम् - इकार. स्त्री द्वि एक
प्रति - अव्ययम्
भोगैश्वर्यप्रसक्तानाम् - अकार पु ष बहु
तया - तकार. स्त्री तृ एक
अपहृतचेतसाम् - सकार. पु ष बहु
व्यवसयात्मिका - आकार. स्त्री प्र एक
बुद्धिः - इकार. स्त्री प्र एक
समाधौ - इकार. पु स एक
न - अव्ययम्
विधीयते - लट् प्रपु एक

पदार्थः
याम् - याम्
इमां - इमाम्
पुष्पितां - पुजिपितवृक्षम् इव
वाचम् - वाक्यम्

प्रवदन्ति - कथयन्ति

Downloaded from www.omkaravidya.com

अविपश्चितः - अल्पमेधसः
वेदवादरता: - वेदवाक्येषु रताः
पार्थ - अर्जुन
न-न
अन्यत् - अन्यत्
अस्ति - अस्ति
इति - एवम्
वादिन : - वदनशीलाः
कामात्मनः - कामस्वभावाः
स्वर्गपराः - स्वर्ग प्राप्तुमिच्छवः
जन्मकर्मफलप्रदाम् - जन्मकर्मफलप्रदाम्
क्रियाविशेषबहु लाम् - अनेक कर्मविशेषाः
भोगैश्वर्यगतिम् - भोगश्वर्यं प्राप्तुम्
प्रति -प्रति
भोगैश्वर्यप्रसक्तानाम् -भोगैश्वर्यमेव प्रणयवताम्
तया - क्रियाविशेषबहुलया
अपहृतचेतसाम् - आच्छादितविवेकप्रज्ञानाम्
व्यवसयात्मिका - निश्चयात्मिका
बुद्धिः - बुद्धिः
समाधौ - मनसि
न-न
विधीयते -भवति

अन्वयः
हे पार्थ वेदवादरता: न अन्यत् अस्ति इति वादिनः कामात्मानः स्वर्गपरा: अविपश्चितः भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलाम् जन्मकर्मफलप्रदाम् पुष्पितां इमाम् याम् वाचं प्रवदन्ति तया अपहृतचेतसाम् भोगैश्वर्यप्रसक्तानाम् व्यवसयात्मिका बुद्धिः समाधौ विधीयते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

इमे श्लोकाः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्विचत्वारिंशत्तमः श्लोकतः चतुश्चत्वारिंशत्तमः श्लोकः पर्यन्तं सन्ति। भगवान् श्रीकृष्णः अर्जुनाय आत्मानात्म विवेकम् धर्माधर्मविवेकम् च उपदिष्टवान्। एषु श्लोकेषु भगवान् श्रीकृष्णः हे पार्थ ! अविवेकिनः वेदवाक्येषु रताः स्वर्गप्राप्त्यादिफलसाधकेभ्याः एवं वदनशीलाः कामात्मानः स्वर्गपराः भोगैश्वर्यप्रापनार्थम् अनेकविशेषक्रियां जन्मकर्मफलप्रदाम् इमां पुष्पिताम् वाचं कथयन्ति । तेन वाक्येन अपहृतचेतसां भोगैश्वर्ये अनुरागानां मनसि निश्चयात्मिका बुद्धि न भवति । एवम् अवदत्।

व्याकरणम्

सन्धिः

प्रवदन्ति + अविपश्चितः - यण्सन्धिः

न + अन्यत् सवर्णदीर्घसन्धिः

अन्यत् + अस्ति - जश्त्वसन्धिः

अस्ति + इति - सवर्णदीर्घसन्धिः

तया + अपहृतचेतसाम् - सवर्णदीर्घसन्धिः

समासः

अविपश्चितः - न विपश्चितः य - नञ्बहुव्रीहिः

वेदानां वादः वेदवादाः षष्ठीतत्पुरुषः

वेदवादेषु रतः - वेदवादरतः ते वेदवादरताः - सप्तमितत्पुरुषः

कामात्मानः - कामः अत्मा स्वभावः येषां ते समानाधिकरणबहुव्रीहिः

सवर्गपराः स्वर्गः परः पुरुषार्थं येषां ते - समानाधिकरणबहुव्रीहिः

जन्मकर्मफलप्रदाम् - कर्मणः फलम् कर्मफलम् - षष्ठितत्पुरुषः

जन्म एव कर्मफलम् - - जन्मकर्मफलम् - अवधारणापूर्वपदकर्मधारयसमासः

जन्मकर्मफलं प्रकर्षेण ददति इति - जन्मकर्मफलप्रदः- उपपदसमासः

ताम् जन्मकर्मफलप्रदाम्

Downloaded from www.omkaravidya.com

क्रियाणां विशेषः - क्रियाविशेषः - षष्ठीतत्पुरुषः
बहुलः क्रियाविशेषः ते - क्रियाविशेषबहु लाः - समानाधिकरणबहुव्रीहिः
भोगः च एश्वर्यः च - भगैश्वर्ये - इतरेतरद्वन्द्वसमासः
तयोः गतिः - भोगैश्वर्यगतिः ताम्- षष्ठीतत्पुरुषः
भोगः च एश्वर्य च भोगैश्वर्ये - इतरेतरद्वन्द्वसमासः
तयोः प्रसक्तः - भोगैश्वर्यप्रसक्तः ताम् - षष्ठीतत्पुरुषः
अपहृतचेतसाम् - अपहृतं चेतः येषां ते – अपहृतचेतः ताम् - समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ 2.45॥

पदच्छेदः
त्रैगुण्यविषयाः वेदाः निस्त्रैगुण्यः भव अर्जुन निर्द्वन्द्वः नित्यसत्त्वस्थः निर्योगक्षेमः आत्मवान्

पदपरिचयः
त्रैगुण्यविषयाः - अकार. पु प्र बहु
वेदाः - अकार. पु प्र बहु
निस्त्रैगुण्यः - अकार. पु प्र एक
भव - लोट् मपु एक
अर्जुन - अकार. पु सं प्र एक

Downloaded from www.omkaravidya.com

निर्दवन्द्वः - अकार. पु प्र एक
नित्यसत्त्वस्थः - अकार. पु प्र एक
निर्योगक्षेमः - अकार. पु प्र एक
आत्मवान् - तकार. पु प्र एक

पदार्थः
त्रैगुण्यविषयाः - त्रैगुण्यं संसारविषयाः
वेदाः - अगमाः
निस्त्रैगुण्यः - त्रैगुण्यरहितः
भव - भव
अर्जुन - अर्जुन
निर्द्वन्दः - द्वन्द्वरहितः
नित्यसत्त्वस्थः - सदासत्त्वगुणसहितः
निर्योगक्षेमः - योगक्षेमरहितः
आत्मवान् - अप्रमत्तः

अन्वयः
हे अर्जुन! वेदाः त्रैगुण्यविषयाः | (त्वम्) निस्त्रैगुण्यः निर्द्वन्द्वः नित्यसत्त्वस्थः निर्योगक्षेम्  आत्मवान् (च) भव ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चचत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मानात्मविवेकम् धर्माधर्मविवेकम् च उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः है अर्जुन! वेदाः त्रैगुण्यविषयाः बोधयन्ति | अतः त्वं निस्त्रैगुण्यः भव । त्वं सदा द्वन्द्वरहितः सत्त्वगुणाश्रितः च भव | त्वं निर्योगक्षेमः अप्रमत्तः च भव । इति अवदत्

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
त्रैगुण्यविषयाः + वेदाः - विसर्गलोपः
वेदाः + निस्त्रैगुन्यः - विसर्गलोपः
निस्त्रैगुण्यः + भव - विसर्गउकारः
भव + अर्जुन - सवर्णदीर्घसन्धिः
निर्द्वन्द्वः + नित्यसत्त्वस्थः - विसर्गउकारः
नित्यसत्त्वस्थः+ निर्योगक्षेम : - विसर्गउकारः
निर्योगक्षेमः + आत्मवान् - विसर्गलोपः

समासः
त्रैगुण्यम् - त्रयाणां गुणानां समाहारः- द्विगुसमासः
नित्यं सत्वे तिष्ठति इति नित्यसत्त्वस्थः - उपपदसमासः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावन्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥2.46॥

पदच्छेदः
यावान् अर्थः उदपाने सर्वतः सम्प्लुतोदके तावन् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः

पदपरिचयः
यावान् - तकार. पु प्र एक
अर्थः - अकार. पु प्र एक

Downloaded from www.omkaravidya.com

उदपाने - अकार. पु स एक
सर्वतः - अकार. पु प्र एक
सम्प्लुतोदके - अकार. नपु स एक
तावन् - तकार. पु प्र एक
सर्वेषु - अकार. पु स् बहु
वेदेषु - अकार. पु स बहु
ब्राह्मणस्य - अकार. पु ष एक
विजानतः - तकार. पु ष एक

पदार्थः

यावान् - यावत्परिमाणः
अर्थः - फलम्
उदपाने - परिच्छिन्नोदके
सर्वतः - सर्वतः
सम्प्लुतोदके - निर्भरितोदके
तावान् - तावत्परिमाणः
सर्वेषु - सर्वेषु
वेदेषु - वेदोक्तेषु
ब्राह्मणस्य - संन्यासिनः
विजानतः - आत्मस्वरूपविदः

अन्वयः

सर्वतः संप्लुतोदके उदपाने यावान् अर्थः तावान् विजानतः ब्राह्मणस्य सर्वेषु वेदेषु (भवति) ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षड्चत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः अर्जुनाय आत्मानात्मविवेकम् धर्माधर्मविवेकम् च उपदिष्टवान् । अस्मिन्

Downloaded from www.omkaravidya.com

श्लोके भगवान् श्रीकृष्णः "यथा सर्वतः सांप्लुतोदके उदपाने प्रयोजनम् तथा सर्वेषु वेदेषु विजानतः ब्राह्मणस्य अनात्मानन्दः आत्मानन्दे अन्तर्भवति | यतः ज्ञानकाण्डस्य प्रयोजनं पूर्णं परन्तु कर्मकाण्डस्य प्रयोजनम् अपूर्णम् । एवम् अवदत् |

व्याकरणम्

सन्धिः

यावानर्थः + उदपाने - विसर्गलोपः

कृदन्तः

विजानतः - वि+ जा + शतृप्रत्ययः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन |
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥॥ 2.47॥

पदच्छेदः

कर्मणि एव अधिकारः ते मा फलेषु कदाचन मा कर्मफलहेतुः भूः मा ते सङ्गः: अस्तु अकर्मणि

पदपरिचयः

कर्मणि - नकार. नपु. स एक

एव - अव्ययम्

Downloaded from www.omkaravidya.com

अधिकारः - अकार. पु. प्र एक
ते - दकार. त्रि ष एक
मा - अव्ययम्
फलेषु - अकार. नपु. स बहु
कदाचन - अव्ययम्
कर्मफलहेतुः - अकार. पु. प्र एक
मा – अव्ययम्
सङ्गः - अकार. पु. प्र एक
अकर्मणि - नकार. नपु. स एक

पदार्थः
कर्मणि - क्रियायाम्
एव - एव
अधिकारः - अधिकारः
ते - तव
मा-मा
फलेषु - फलेषु
कदाचन - कदाचन
मा-मा
कर्मफलहेतुः - कर्मफलस्य हेतुः
मा - अव्ययम्
भूः - लुङ मपु एक
ते - दकार. त्रि च एक
अस्तु - लोट् मपु एक
ते - तुभ्यं
सङ्गः - आशा
अस्तु - अस्तु अकर्मणि -अकरणे

Downloaded from www.omkaravidya.com

अन्वयः

ते कर्मणी एव अधिकारः | कदाचन फलेषु (अधिकारः) मा | कर्मफलहेतुः मा भूः | अकर्मणि ते सङ्गः मा अस्तु |

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तचत्वारिंशत्तमः श्लोकः | अयं श्लोकतः त्रयपञ्चाशत्तमः श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान् । अस्मिन् श्लोके हे अर्जुन ! तव कर्मणि एव अधिकारः | परन्तु कर्मफलेषु न अधिकारः। कदाचिदपि कर्मफलतृण्णा मा भूत् | यदि कर्मफलं इच्छसि तर्हि तत् अनुभवितुं पुनः पुनः जन्म प्राप्तव्यम् | यदि कर्मफलं न ईष्यते तर्हि कर्मणा किं प्रयोजनम् एवं चिन्तयित्वा अकरणे प्रीतिः मा भूत् । एवम् अवदत्

व्याकरणम्

सन्धिः

कर्मणि + एव - यण्सन्धिः

एव + अधिकारः - सवर्णदीर्घसन्धिः

अधिकारः + ते - विसर्गसकारः

कर्मफलहेतुः + भूः - विसर्गरेफः

भूः + मा - विसर्ग रेफः

सङ्गः + अस्तु - विसर्गउकारः पूर्वरूपसन्धिः

अस्तु + अकर्मणि - यण्सन्धिः

समासः

कर्मणः फलम् - कर्मफलम्

कर्मफलस्य हेतुः - षष्ठी तत्पुरुषः

अकर्मणि - न कर्मणि - नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ 2.48॥

पदच्छेदः
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय सिद्ध्यसिदध्योः समः भूत्वा समत्वं योगः उच्यते

पदपरिचयः
योगस्थः - अकार. पु प्र एक
कुरु - लोट् मपु एक
कर्माणि - नकार.नपु द्वि बहु
सङ्गं - अकार. पु द्वि एक
त्यक्त्वा - अव्ययम्
धनञ्जय - अकार. पु सं प्र एक

सिद्ध्यसिद्ध्योः - ईकार. स्त्री स. द्वि
भूत्वा - अव्ययम्
योगः - अकार. पु प्र एक
समः - अकार. पु प्र एक
समत्वं - अकार. नपु प्र एक
उच्यते - लट् प्रपु एक

पदार्थः
योगस्थः - योगनिष्ठः

Downloaded from www.omkaravidya.com

कुरु - कुरु
कर्माणि - क्रियाः
सङ्गं - अभिमानम्
त्यक्त्वा - परित्यज्य
धनञ्जय - अर्जुन
सिद्ध्यसिद्ध्योः - फलं प्राप्ताप्राप्तौ
समः - समः
भूत्वा - भूत्वा
समत्वं - साम्यम्
योगः - योगः
उच्यते - कथ्यते

अन्वयः
हे धनञ्जय ! (त्वम्) योगस्थः सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा कर्माणि कुरु। समत्वं योगः (इति) उच्यते।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये अष्टाचत्वारिंशत्तमः श्लोकः। सप्तचत्वारिंशत्तमः श्लोकतः त्रयपञ्चाशत्तमः श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान्। अस्मिन् श्लोके हे धनञ्जय ! समभावेन ईश्वरार्पणबुद्ध्या कर्माणि कुरु। अत ईश्वरः मम कर्मणि तुष्यतु इति आशा परित्यज्य कर्माणि कुरु। फलतृष्णा विहाय क्रियमाणे कर्मणि सत्त्वशुद्धिः प्राप्य ज्ञानप्राप्तिलक्षणा सिदिः। ज्ञानप्राप्ति न भवति चेदपि सिद्ध्यसिद्ध्योः समानभावेन तव कर्माणि कुरु। सिद्ध्यसिद्ध्योः समत्वमेव योगः इति उच्यते। एवम् अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
समः + भूत्वा - विसर्ग उकारः
योगः +उच्यते - विसर्ग लोपः

समासः
सिद्धिः  च असिद्धिः च - इतरेतरद्वन्द्वसमासः

कृदन्तः
भू + क्तवा प्रत्ययः- भूत्वा
त्यज् + क्तवा प्रत्ययः - त्यक्तवा

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥2.49॥

पदच्छेदः
दूरेण हि अवरं कर्म बुद्धियोगात् धनञ्जय बुद्धौ शरणम् अन्विच्छ कृपणाः फलहेतवः

पदपरिचयः
दूरेण - अकार. नपु तू एक
हि - अव्ययम्

Downloaded from www.omkaravidya.com

अवरं - अकार. नपु प्र एक
कर्म - नकार. नपु प्र एक
बुद्धियोगात् - अकार. पु प एक
धनञ्जय - अकार. पु सं प्र एक
बुद्धौ - इकार. स्त्री स एक
शरणम् - अकार. नपु द्वि एक
अन्विच्छ - लोट् मपु एक
कृपणाः - अकार. पु प्र बहु
फलहेतवः - अकार. पु प्र बहु

पदार्थः
दूरेण - अतिविप्रकर्षेण
हि - हि
अवरं - निकृष्टम्
कर्म - क्रिया
बुद्धियोगात् - समत्वबुद्धियोगात्
धनञ्जय - अर्जुन
बुद्धौ - योगबुद्धौ
शरणम् - आश्रयम्
अन्विच्छ - अन्विच्छ
कृपणाः - दीनाः
फलहेतवः - फलाश्रयाः

अन्वयः
हे धनञ्जय ! बुद्धियोगात् कर्म दूरेण अवरम् हि । बुद्धौ शरणं अन्विच्छ ।
फलहेतवः कृपणाः ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवचत्वारिंशत्तमः श्लोकः । सप्तचत्वारिंशत्तमः श्लोकतः त्रयपञ्चाशत्तमः श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान् । अस्मिन् श्लोके हे धनञ्जय ! समत्व बुद्धियोगात् कृतानि कर्माणि श्रेष्ठम् । फलाश्रयितुं क्रियमाणानि कर्माणि पुनः पुनः जन्महेतवः भवति तस्मात् कारणात् तानि निकृष्टानि एव । अतः कर्मयोगे बुद्धिं आश्रयतु । फलतृष्णाप्रयुक्ताः दीनाः इति उच्यते । एवम् अवदत् ।

व्याकरणम्
सन्धिः
हि + अवरम् - यण्सन्धिः
बुद्धियोगात् + धनञ्जयः - जश्त्वसन्धिः

समासः
अवरम् - न वरम् - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

बुदियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥2.50॥

पदच्छेदः
बुद्धियुक्तः जहाति इह उभे सुकृतदुष्कृते तस्मात् योगाय युज्यस्व योगः कर्मसु कौशलम्

Downloaded from www.omkaravidya.com

पदपरिचयः

बुद्धियुक्तः - अकार पु. प्र एक

जहाति -लट् प्रपु एक

इह - अव्ययम्

उभे - अकार नपु. द्वि द्वि

सुकृतदुष्कृते - अकार नपु. द्वि द्वि

तस्मात् - दकार त्रि प एक

योगाय - अकार पु. च एक

युज्यस्व - लोट् मपु एक

**arse:** - अकार पु. प्र एक

कर्मसु - नकार नपु.स बहु

कौशलम् - अकार नपु. प्र एक

पदार्थः

बुद्धियुक्तः - समत्वविषयबुद्धया युक्तः

जहाति - परित्यजति

इह - इह

उभे - द्वे

सुकृतदुस्कृते - पुण्यपापे

तस्मात् - अतः

योगाय - योगाय

युज्यस्व - प्रयत्नं कुरु

योगः - योगः

कर्मसु - स्वधर्मकर्मसु

कौशलम् - कुशलभावः

Downloaded from www.omkaravidya.com

अन्वयः

हे धनञ्जय! बुद्धियुक्तः इह उभे सुकृतदुष्कृते जहाति । तस्मात् योगाय युज्यस्व । योगः कर्मसु कौशलम् (इति उच्यते) ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चाशत्तमः श्लोकः । सप्तचत्वारिंशत्तमः श्लोकतः त्रयपञ्चाशत्तमः श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान् । अस्मिन् श्लोके "अस्मिन् लोके समत्वविषयबुद्ध्या युक्तः सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण पुण्यपापे जहाति । तस्मात् समत्वबुद्धियोगात् युज्यस्व । ईश्वरार्पितचेतसा तया क्रियमाणानि स्वधर्मकर्माणि एव कौशलम् इति उच्यते । एवम् अवदत् ।

व्याकरणम्

सन्धिः

बुद्धियुक्तः + जहाति - विसर्गउकारः

जहाति + इह - सवर्णदीर्घसन्धिः

तस्मात् + योगाय - जश्त्वसन्धिः

समासः

सुकृतं च दुषकृतं च - सुकृतदुष्कृतेः - इतरेतरद्वन्द्वसमासः

कुशलस्य भावः कौशलम्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

कर्मजं बुद्धियुक्ता हि फलं त्यक्तवा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ 2.51॥

पदच्छेदः
कर्मजं बुद्धियुक्ताः हि फलं त्यक्तवा मनीषिणः जन्मबन्धविनिर्मुक्ताः पदं गच्छन्ति अनामयम्

पदपरिचयः
कर्मजं - अकार. नपु द्वि एक
बुद्धियुक्ताः - अकार. पु प्र बहु
हि - अव्ययम्
फलम् - अकार. नपु द्विएक
त्यक्तवा - अव्ययम्
मनीषिणः - नकार. पु प्र बहु
जन्मबन्धविनिर्मुक्ताः - अकार. पु प्र बहु
पदं - अकार. नपु द्वि एक
गच्छन्ति - लट् प्रषु बहु
अनामयम् - अकार. न पु द्वि एक

पदार्थः
कर्मजं - कर्मभ्यः जातम्
बुद्धियुक्ताः - समत्वबुद्धियुक्ताः
हि - हि
फलं - कर्मफलम्

Downloaded from www.omkaravidya.com

त्यक्तवा - परित्यज्य
मनीषिणः - विवेकिनः
जन्मबन्धविनिर्मुक्ताः - ज्ञानिनः
पदं - स्थितिम्
गच्छन्ति - प्राप्नुवन्ति
अनामयम् - दुःखरहितः

अन्वयः
बुद्धियुक्ताः मनीषिणः कर्मजं त्यक्तवा जन्मबन्धविनिर्मुकताः अनामयं पदं गच्छन्ति हि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये एकपञ्चाशत्तमः श्लोकः । सप्तचत्वारिंशत्तमः श्लोकतः त्रयपञ्चाशत्तमः शल्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान् । अस्मिन् श्लोके कर्मजम् इष्टानिष्टदेहप्राप्तिः भवति । समत्वबुदियुकताः कर्मफलं परित्यज्य ज्ञानिनः भूत्वा जन्मबन्धविनिर्मुक्ताः अनामयं विष्णोः मोक्षाख्यं पदं गच्छन्ति । एवम् अवदत् ।

व्याकरणम्
सन्धिः
बुद्धियुक्ताः + हि - विसर्गलोपः
गच्छन्ति + अनामयम् - यण्सन्धिः

समासः
जन्म एव बन्धः इति जन्मबन्धः अवधारणापूर्वपदकर्मधारयसमासः
जन्मबन्धात् विनिर्मुक्ताः - पञ्चमितत्पुरुषः
अनामयम् - न आमयम् - नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ 2.52॥

पदच्छेदः
यदा ते मोहकलिलं बुद्धिः व्यतितरिष्यति तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च

पदपरिचयः
यदा - अव्ययम्
ते - दकार. त्रि ष. एक
मोहकलिलं - अकार. नपु द्वि एक
बुद्धिः - इकार. स्त्री प्र एक
व्यतितरिष्यति - लृट् प्रपु एक
तदा - अव्ययम्
गन्तासि - लुट् मपु एक
निर्वेदं - अकार. पु द्वि एक
श्रोतव्यस्य - अकार. नपु ष. एक
श्रुतस्य - अकार. नपु ष एक
च - अव्ययम्

पदार्थः
यदा - यस्मिन्काले
ते - तव
मोहकलिलं -अज्ञानदोषम्

Downloaded from www.omkaravidya.com

बुद्धिः – बुद्धिः
व्यतितरिष्यति - व्यतिक्रमिष्यति
तदा - तस्मिन्काले
गन्तासि - प्राप्स्यसि
निर्वेदं - वैराग्यम्
श्रोतव्यस्य - श्रवणीयस्य
श्रुतस्य - श्रुतस्य

अन्वयः
यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा श्रोतव्यस्य श्रुतस्य निर्वेदं गन्तासि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्वापञ्चाशत्तमः श्लोकः । सप्तचत्वारिंशत्तमः श्लोकतः त्रयपञ्चाशत्तमः श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान् । अस्मिन् श्लोके योगानुष्ठानप्राप्तसत्त्वशुदबुद्धिः कदा प्राप्यते इति उच्यते । यस्मिन्काले तव देहमेव आत्मा इति अज्ञानदोषं तरिष्यति तस्मिन्काले तव बुद्धिः शुद्धिं प्राप्स्यसि । अतः वैराग्यं प्राप्स्यस्ति । वेदान्तविचारं विहाय अन्यविषयान् श्रोतव्यस्य श्रुतस्य च निष्फलं प्रतिपद्यते । एवम् अवदत् ।

व्याकरणम्
सन्धिः
बुद्धिः + व्यतितरिष्यति - विसर्गरेफः

समासः
मोहः एव कलिलम् - मोहकलिलम् - अवधारणापर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावाचला बुद्धिस्तदा योगमावाप्स्यसि ॥ 2.53॥

पदच्छेदः
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधौ अचला बुद्धिः तदा योगम् अवाप्स्यसि

पदपरिचयः
श्रुतिविप्रतिपन्ना - आ. स्त्री प्र एक
ते - द. त्रि ष एक
यदा - अव्ययम्
स्थास्यति - लृट् प्रपु एक
निश्चला - आ. स्त्री प्र एक
समाधौ - इ. पु प्र एक
अचला - आ. स्त्री प्र एक
बुद्धिः - इ. स्त्री प्र एक
तदा - अव्ययम्
योगम् - आ. पु द्वि एक
अवाप्स्यसि - लृट् मपु एक

पदार्थः
श्रुतिविप्रतिपन्ना -अनेक श्रुतिभिः श्रवणयोः विप्रपन्ना
ते - तव
यदा - यस्मिन् काले

Downloaded from www.omkaravidya.com

स्थास्यति - स्थास्यति
निश्चला - विक्षेपचलनवर्जिता
समाधौ - आत्मा
अचला - चलनरहिता
बुद्धिः - अन्तःकरणम्
तदा - तदा
योगम् - ज्ञानयोगम्
अवाप्स्यसि - प्राप्स्यसि

अन्वयः
यदा श्रुतिविप्रतिपन्ना बुद्धिः अचला समाधौ निश्चला स्थास्यति तदा योगम् अवाप्स्यसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये त्रयपञ्चाशत्तमः श्लोकः । सप्तचत्वारिंशत्तमः श्लोकतः अयं श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान् । अस्मिन् श्लोके परमार्थयोगं कदा अवाप्स्यसि इति उच्यते । अनेक साध्यसाधनसबन्धप्रकाशन श्रुतिभिः श्रवणः विप्रतिपन्ना यदा तव बुद्धिः निश्चला आत्मनी अचला समाधौ स्थास्यति तदा ज्ञानयोगात् मोक्षम् प्राप्स्यसि । एवम् अवदत् ।

व्याकरणम्
सन्धिः
समाधौ + अचला – यान्तवान्तदेशसन्धिः
बुद्धिः + तदा - विसर्ग सकारः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

अर्जुन उवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।

स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥2.54॥

पदच्छेदः

अर्जुन उवाच स्थितप्रजस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किम् आसीत व्रजेत किम्

पदपरिचयः

अर्जुनः - अकार पु प्र एक

उवाच - लिट् प्रपु एक

स्थितप्रज्ञस्य - अकार पु ष एक

का - दकार स्त्री प्र एक

भाषा - आकार स्त्री प्र एक

समाधिस्थस्य - अकार पु षएक

केशव - अकार पु सं प्र एक

स्थितधीः - ईकार पु प्र एक

किं - दकार नपु प्र एक

प्रभाषेत - विधि प्रपु एक

किम् - दकार नपु प्र एक

आसीत - विधि प्रपु एक

व्रजेत - विधि प्रपु एक

किम् - दकार नपु प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

अर्जुनः - अर्जुनः
उवाच - अवदत्
स्थितप्रज्ञस्य – स्थितज्ञानप्राप्तस्य
का-का
भाषा - लक्षणम्
समाधिस्थस्य - समाधौ स्थितस्य
केशव - कृष्ण
स्थितधीः - स्थितप्रज्ञः
किं - किम्
प्रभाषेत - वदिष्यति
किम् - किम्
आसीत - उपविशेत्
व्रजेत - चलेत्
किम् - किम्

अन्वयः
अर्जुन उवाच
हे केशव ! समाधिस्तस्य स्थितप्रज्ञस्य भाषा का? स्थितधीः किं प्रभाषेत किम् आसीत किं व्रजेत ?

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये चतुर्षञ्चाशत्तमः श्लोकः।
सप्तचत्वारिंशत्तमः श्लोकतः त्रयपञ्चाशत्तमः श्लोकपर्यन्तं भगवान् श्रीकृष्णः अर्जुनाय कर्मयोगः कर्मयोगस्य फलम् च बोधितवान्। अस्मिन् श्लोके अर्जुनः स्थितप्रजस्य लक्षणं जिज्ञासा अपृच्छत्। हे केशव समाधौस्थितस्य लक्षणं किं? स्वयं सः किं प्रभाषेत कथम् उपविशति कथं भावयति कथं गच्छति।
एवम् पृष्टवान् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
समासः
स्थिता प्रज्ञा यस्य सः - स्थितप्रजः - समानाधिकरणबहुव्रीहिः
समाधौ तिष्ठति इति समाधिस्थः उपपदसमासः
स्थिता धीः यस्य सः समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

श्री भगवानुवाच
प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ 2.55॥

पदच्छेदः
श्री भगवान् उवाच
प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् आत्मनि एव आत्मना तुष्टः
स्थितप्रज्ञः तदा उच्यते

पदपरिचयः
प्रजहाति - लट् प्रपु एक
यदा - अव्ययम्
कामान् - अकार. पु द्वि बहु
सर्वान् - अकार. पु द्वि बहु
पार्थ - अकार. पु सं प्र एक

Downloaded from www.omkaravidya.com

मनोगतान् अकार. पु द्वि एक
आत्मनि - नकार. पु स एक
एव - अव्ययम्
आत्मना - नकार. पु तृ एक
तुष्टः - अकार. पु प्र एक
स्थितप्रज्ञः अकार. पु प्र एक
तदा - अव्ययम्
उच्यते - लट् प्रपु एक

पदार्थः
प्रजहाति - परित्यजति
यदा - यस्मिन्काले
कामान् - इष्टभेदान्
सर्वान् - समस्तान्
पार्थ - अर्जुन
मनोगतान् - मनसि प्रविष्टवान्
आत्मनि - आत्मानि
एव - एव
आत्मना - स्वेन
तुष्टः- सन्तोषः
स्थितप्रज्ञः - स्थितधीः
तदा - तदा
उच्यते - उच्यते

अन्वयः
हे पार्थ! यदा मनोगतान् सर्वान् कामान् प्रजहाति आत्मनि एव आत्मना तुष्टः तदा स्थितप्रज्ञः (इति) उच्यते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चपञ्चाशत्तमः श्लोकः । पूर्वश्लोके अर्जुनः स्थितप्रज्ञस्य लक्षणं अपृच्छत् । अस्मिन् श्लोके भगवान् श्रीकृष्णः हे पार्थ यस्मिन्काले श्रुतिप्रविष्टान् सर्वान् इष्टभेदान् परित्यजति प्रत्यागात्मस्वरूपे एव स्वेन बाह्यलाभनिरपेक्षः सन्तुष्टः भवति तदा सः ज्ञानी इति उच्यते । यः पुत्र धनं लोकः त्यजति सः आत्मरामः आत्मक्रीडः स्थितप्रज्ञः इति उच्यते । एवम् अवदत् ।

व्याकरणम्
सन्धिः
आत्मनि + एव - यण्सन्धिः
तदा + उच्यते - वृद्धिसन्धिः

समासः
स्थितः प्रज्ञा यस्य सः स्थितप्रज्ञः - समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥2.56॥

पदच्छेदः
दुःखेषु अनुद्विग्नमनाःः सुखेषु विहतस्पृहः वीतरागभयक्रोधः स्थितधीः मुनिः उच्यते

Downloaded from www.omkaravidya.com

पदपरिचयः
दुःखेषु - अकार. नपु. स. बहु
अनुद्विग्नमनाः - सकार. पु. प्र एक
सुखेषु - अकार. नपु. स बहु
विगतस्पृहः - अकार. पु. प्र एक
वीतरागभयक्रोधः - अकार. पु. प्र एक
स्थितधीः - ईकार. पु. प्र एक
मुनिः - इकार. पु. प्र एक
उच्यते लट् प्रपु एक

पदार्थः
दुःखेषु - अनेक दुःखेषु
अनुद्विग्नमनाः - उद्विग्नं न प्रक्षुभितम् मनः
सुखेषु - प्राप्तेषु सुखेषु
विगतस्पृहः - विगतस्पृहः
वीतरागभयक्रोधः - विगतरागभयक्रोधः
स्थितधीः -स्थितप्रज्ञः
मुनिः - मुनिः
उच्यते - उच्यते

अन्वयः
दुःखेषु अनुद्विग्नमनाः सुखेषु विहतस्पृहः वीतरागभयक्रोधः मुनिः स्थितधीः (इति) उच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षट्पञ्चाशत्तमः श्लोकः। अर्जुनः स्थितप्रज्ञस्य लक्षणं अपृच्छत्। अस्मिन् श्लोके भगवान् श्रीकृष्णः त्रिणि दुःखानि सन्ति। ते आध्यात्मिकम् आधिभौधिकम् आधिदैवीकम् च । यः एतेषु

Downloaded from www.omkaravidya.com

प्राप्तेषु दुःखेषु न उद्विग्नं भवति स्नः अनुद्विग्नमनाः | यः प्राप्तेषु सुखेषु आशा न अनुविवर्धते सः विगतस्पृहः | अतः यः अनुद्विगनमनः विगतस्पृहः वीतरागभयक्रोधः च सः मुनिः स्थितधीः स्थितप्रज्ञः सन्यासि इति उच्यते | एवम् अवदत् ।

व्याकरणम्
सन्धिः
दुःखेषु + अनुद्विग्नमनाः - यण्सन्धिः
स्थितधीः + मुनिः - विसर्ग रेफः
मुनिः + उच्यते - विसर्ग रफः

समासः
न उद्विग्नम् - अनुद्विग्नम् - नञ् तत्पुरुषः
अनुद्विग्नं मनः यस्य सः अनुद्विग्नमनः ते अनुद्विग्नमनाः - समानाधिकरणबहुव्रीहिसमासः
वीताः रागः च भयं च क्रोधः च यस्मात् सः वीतरागभयक्रोधः - समानाधिकरणबहुव्रीहिसमासः
स्थिता धीः यस्य सः स्थितधीः समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् |
नाभिनन्दति न दवेष्टि तस्य प्रज्ञा प्रतिष्ठता ॥ 2.57॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यः सर्वत्र अनभिस्नेहः तत् तत् प्राप्य शुभाशुभम् न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।

पदपरिचयः
यः - दकार. पु प्र एक
सर्वत्र - अव्ययम्
अभिस्नेहः - अकार. पु प्र एक
तत् - दकार. नपु प्र एक
तत् - दकार. नपु प्र एक
प्राप्य - अव्ययम्
शुभाशुभम् - अकार. नपु द्विएक
न - अव्ययम्
अभिनन्दति - लट् प्रपु एक
न - अव्ययम्
दवेष्टि - लट् प्रपु एक
तस्य - दकार. पु ष एक
प्रज्ञा - आकार. स्त्री प्र एक
प्रतिष्ठिता - आकार.स्त्री प्र एक

पदार्थः
यः – यः
सर्वत्र - सर्वस्थितौ
अभिस्नेहः - अभिमानरहितः
तत् - तत्
तत् - तत्
प्राप्य - लब्ध्वा
शुभाशुभम् - इष्टानिष्टम्

Downloaded from www.omkaravidya.com

न-न

अभिनन्दति - हर्षति

न-न

द्वेष्टि - विषादति

तस्य -तस्य

प्रज्ञा -ज्ञानम्

प्रतिष्ठिता - प्रतिष्ठिता

अन्वयः

यः सर्वत्र अभिस्नेहः तत् तत् शुभाशुभम् प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तपञ्चाशत्तमः श्लोकः | अर्जुनः स्थितप्रज्ञस्य लक्षणं पृच्छवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः यः मुनिः सर्वत्र अभिमानरहितः अनेकविधः शुभम् अशुभं प्राप्य अपि न सन्तोषम् अनुभवति च दुःखम् न अनुभवति तस्य ज्ञानम् प्रतिष्ठितम् इति उच्यते | एवम् अवदत् |

व्याकरणम्

सन्धिः

अभिस्नेहः +तत् - विसर्ग सकारः

न + अभिनन्दति - सवर्णदीर्घसन्धिः

समासः

न अभिस्नेहः - अनभिस्नेहः - नञ्तत्पुरुषः

शुभं च अशुभम् च - शुभाशुभम् - समाहारद्वन्दवसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ 2.58॥

पदच्छेदः

यदा संहरते च अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्त्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता

पदपरिचयः
यदा - अव्ययम्
संहरते - लट् प्रपु एक
च - अव्ययम्
अयं - मकार. पु. प्र एक
कूर्मः - अकार. पु. प्र एक
अङ्गानि - अकार. नपु. द्वि बहु
इव - अव्ययम्
सर्वशः - अव्ययम्
इन्द्रियाणि - अकार.नपु. द्वि बहु
इन्द्रियार्थेभ्यः - अकार नपु प बहु
तस्य - दकार. पु. ष एक
प्रज्ञा - आकार. स्त्री. प्र एक
प्रतिष्ठिता - आकार. स्त्री प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

यदा - यस्मिन्काले
संहरते - संयग् उपसंहरते
च-च

अयं - एषः
कूर्मः - कूर्मः
अङ्गानि - अवयवानि
इव - इव
सर्वशः - सर्वतः
इन्द्रियाणि - इन्द्रियाणि
इन्द्रियार्थेभ्यः - सर्वविषयेभ्यः
तस्य - तस्य
प्रज्ञा - ज्ञानम्
प्रतिष्ठिता - प्रतिष्ठितम्

अन्वयः
यदा च अयं (यतिः) कूर्मः अङ्गानि ( संहरते) इव इन्दियाणि इन्द्रियार्देभ्यः सर्वशः संहरते। (तदा) तस्य प्रज्ञा प्रतिष्ठिता।

तात्पर्यम्.
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये अष्टपञ्चाशत्तमः श्लोकः। अस्मिन् श्लोके भगवान् श्रीकृष्णः यथा कूर्मः भयात् स्वानि अङ्गानि संहरति तथा ज्ञाननिष्ठायां प्रवृत्तः इन्द्रियाणि सर्वविषयेभ्यः उपसंहरते तदा तस्य ज्ञान प्रतिष्ठितम् भवति। एवम् अवदत्।

व्याकरणम्
सन्धिः
च + अयम् - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

कूर्मः + अङ्गानि - विसर्गउकारः पूर्वरूपसन्धिः
इन्द्रियाणि + इन्द्रियार्थे - सवर्णदीर्घसन्धिः

समासः
इन्द्रियाणाम् अर्थः - इन्द्रियार्थः - तेभ्यः इन्त्रियार्थेभ्यः षष्ठीतत्पुरुषः

## श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ 2.59 ॥

पदच्छेदः
विषयाः विनिवर्तन्ते निराहारस्य देहिनः रसवर्जं रसः अपि यस्य परं दृष्ट्वा निवर्तते

पदपरिचयः
विषयाः - अकार. पु. प्र एक
विनिवर्तन्ते - लट् प्रपु एक
निराहारस्य - अकार. पु. प्र एक
देहिनः - नकार. पु. ष एक
रसवर्ज - अव्ययम्
रसः - अकार. पु. प्र एक
अपि - अव्ययम्
यस्य - दकार. पु. ष एक

Downloaded from www.omkaravidya.com

परं - अकार. नपु. द्वि एक
दृष्ट्वा - अव्ययम्
निवर्तते - लट् प्रषु एक

पदार्थः
विषयाः - विषयानुभवाः
विनिवर्तन्ते - निवर्तन्ते
निराहारस्य - अहाररहितस्य
देहिनः - देहवतः

रसवर्ज - स्पृहां वर्जयित्वा
रसः - सुपृहाः
अपि - अपि
यस्य - स्थितप्रज्ञस्य
परं - परमात्मानम्
दृष्ट्वा - वीक्ष्य
निवर्तते - याति

अन्वयः
निराहारस्य देहिनः रसवर्जं विषयाः विनिवर्तन्ते । रसवर्जं परं दृष्ट्वा अस्य रसः अपि निवर्तते ।

तात्पर्यम्.
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवपञ्चाशत्तमः श्लोकः । अर्जुनः स्थितप्रज्ञस्य लक्षणं पृष्टवान् । भगवान् श्री कृष्णः अष्टपञ्चाशत्तमः श्लोकतः अष्टाषष्टितमः श्लोक पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् । अस्मिन् श्लोके

Downloaded from www.omkaravidya.com

भगवान् श्रीकृष्णः प्रथमोपायं दमः अथवा इन्द्रियनिग्रहम् । बाह्यसुखनिगृहितः देहवतः विषयाः स्पृहां वर्जयित्वा निवर्तन्ते । एताः स्पृहाः अपि तस्य ब्रह्मदृष्ट्या यान्ति । एवम् अवदत् ।

व्याकरणम्
सन्धिः
विषयाः + विनिवर्तन्ते - विसर्गलोपः
रसः: + अपि - विसर्ग उकारः पूर्वरूपसन्धिः
अपि + अस्य - यण्सन्धिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥2.60॥

पदच्छेदः
यततः हि अपि कौन्तेय पुरुषस्य विपश्चितः इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः

पदपरिचयः
यततः - तकार पु ष. एक
हि - अव्ययम्
अपि - अव्ययम्
कोन्तेय - अकार पु सं प्र एक
पुरुषस्य - अकार पु ष. एक

Downloaded from www.omkaravidya.com

विपश्चितः - तकार पु ष. एक
इन्द्रियाणि - अकार नपु प्र बहु
प्रमाथीनि - नकार नपु प्र बहु
हरन्ति - लट् प्रषु बहु
प्रसभं - अव्ययम्
मनः - सकार नपु द्वि एक

पदार्थः
यततः - प्रयत्नं कुर्वतः
हि - हि
अपि - अपि
कौन्तेय - अर्जुन
पुरुषस्य - पुरुषस्य
विपश्चितः - मेधाविनः
इन्द्रियाणि -इन्द्रियाणि
प्रमाथीनि -प्रमथशीलानि
हरन्ति - हरन्ति
प्रसभं - प्रसह्य
मनः - अन्तःकरणम्

अन्वयः
हे कौन्तेय ! यततः विपश्चितः पुरुषस्य मनः अपि प्रमाथीनि इन्द्रियाणि प्रसभं हरन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षोडशत्तमः श्लोकः । अष्टपञ्चाशत्तमः श्लोकतः अष्टाषष्ठीत्तमः श्लोकः पर्यन्तं स्थितप्रज्ञाय उपायम् उपदिष्टवान् । अस्मिन्

Downloaded from www.omkaravidya.com

श्लोके भगवान् श्रीकृष्णः हे कुन्तिपुत्र शास्त्रज्ञः जानि प्रयत्नं कुर्वतः अपि व्यवह्रियते | प्रमथशीलानि विषयाभिमुखं इन्द्रियानि प्रयत्नं कुर्वतः अन्तःकरणं अकुलीकुर्वन्ति बिक्षोपयन्ति च । एवम् अवदत् |

व्याकरणम्
सन्धिः
यततः + अपि - विसर्गउकारः
हि + अपि - यण्सन्धिः

तद्धितान्ताः
कुन्त्याः अपत्यं पुमान् कौन्तेयः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

तानि सर्वाणि संयम्य युक्त आसीत मत्परः |
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥2.61॥

पदच्छेदः
तानि सर्वाणि संयम्य युक्तः आसीत मत्परः वशे हि यस्य इन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता

पदपरिचयः
तानि - दकार. नपु. द्वि बहु
सर्वाणि - अकार. नपु. द्वि बहु

Downloaded from www.omkaravidya.com

संयम्य - अव्ययम्
युक्तः - अकार. पु. प्र एक
आसीत - विधि प्रपु एक
मत्परः - अकार. पु. प्र एक
वशे - अकार. पु. स एक
हि - अव्ययम्
यस्य - दकार. पु.ष एक
इन्द्रियाणि - अकार. नपु. प्र बहु
तस्य - दकार. पु. ष एक
प्रज्ञा - आकार. स्त्री प्र एक
प्रतिष्ठिता - आकार.स्त्री प्र एक

पदार्थः
तानि - तानि
सर्वाणि - सकलानि
संयम्य -संयमनं कृत्वा
युक्तः - समाहितः
आसीत - उपविशेत
मत्परः - मत्परः
वशे - वशे
हि - हि
यस्य - यस्य
इन्द्रियाणि - इन्द्रियाणि
तस्य - स्थितप्रज्ञस्य
प्रज्ञा - ज्ञानम्
प्रतिष्ठिता - प्रतिष्ठितम्

अन्वयः

Downloaded from www.omkaravidya.com

युक्तः तानि सर्वाणि संयम्य मत्परः आसीत यस्य वशे इन्द्रियाणि हि (सन्ति) तस्य प्रज्ञा प्रतिष्ठिता ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये एकषष्ठीत्तमः श्लोकः । अस्मिन् श्लोके "तानि सर्वाणि वशीकृत्य युक्तः सन् अहमेव ब्रह्मन् तस्मात् अहं न अन्यः न भिन्नः इति अर्थः । यः सन्यासी एवम् इन्द्रियाणि अभ्यासबलेन वर्तते तस्य ज्ञानं प्रतिष्ठितम्" । एवम् अवदत् ।

व्याकरणम्

सन्धिः

युक्तः + आसीत - विसर्गलोपः

यस्य + इन्द्रियाणि - गुणसन्धिः

समासः

अहं वासुदेवः परः यस्य सः समानाधिकरणबहुव्रीहिः

कृदन्ताः

संयम्य - सम् + यम् + ल्यप्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोभिजायते ॥2.62॥

क्रोधाद् भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥2.63॥

पदच्छेदः
ध्यायतः विषयान् पुंसः सङ्गः तेषु उपजायते सङ्गात् संजायते कामः कामात् क्रोधः संमोहात् स्मृतिविभ्रमः स्मृतिभ्रंशात् बुद्धिनाशः अभ्रिजायते क्रोधाद् भवति संमोहः बुद्धिनाशात् प्रणश्यति

पदपरिचयः
ध्यायतः - तकार. पु ष एक
विषयान् - अकार. पु द्वि बहु
सङ्गः - अकार. पु प्र एक
उपजायते - लट्प्रपु एक
संजायते - लट् प्रपह एक
कामात् - अकार. पु प एक
अभिजायते - लट् प्रषु एक
भवति - लट् प्रपु एक
संमोहात् - अकार. पु प एक
स्मृतिभ्रंशात् - अकार. पु प एक
बुद्धिनाशात् - अकार. पु प एक
पुंसः - सकार. पु ष एक

Downloaded from www.omkaravidya.com

तेषु - दकार. पु स बहु
सङ्गात् - अकार. पु प एक
कामः - अकार. पु प्र एक

क्रोधः - अकार. पु प्र एक
क्रोधात् - अकार. पु प एक
संमोहः - अकार. पु प्र एक
स्मृतिविभ्रमः - अकार. पु प्र एक
बुद्धिनाशः - अकार. पु प्र एक
प्रणश्यति - लट् प्रपु एक

पदार्थः
ध्यायतः - चिन्तयतः
विषयान् -शब्दादिविषयान्
सङ्गः - प्रीतिः
उपजायते - जायते
संजायते - संजायते
कामात् - आशायाः
अभिजायते - जायते
पुंसः - पुरुषस्य
तेषु - विषयेषु
सङ्गात् - प्रीतेः
कामः -आशा
क्रोधः - कोपः
क्रोधात् - कोपात्
भवति - भवति
संमोहः - अविवेकः
संमोहात् - अविवेकात्

Downloaded from www.omkaravidya.com

स्मृतिविभ्रमः - स्मृतिविभ्रमः
स्मृतिभ्रंशात् - स्मृतिभ्रंशात्
बुद्धिनाशः - बुद्धिनाशः
बुद्धिनाशात् - बुद्धिनाशात्
प्रणश्यति - नश्यति

अन्वयः
विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते | सङ्गात् कामः सञ्जायते । कामात् क्रोधः अभिजायते | क्रोधात् संमोहः भवति । संमोहात् स्मृतिविभ्रमः (भवति) | स्मृतिभ्रंशात् बुद्धिनाशः (भवति) | बुद्धिनाशात् प्रणश्यति |

तात्पर्यम्.
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्वाषष्टितमः त्रयःषष्टितमः श्लोकौ च | अर्जुनः स्थितप्रज्ञस्य लक्षणम् पृष्टवान्। अस्मिन् श्लोकतः अष्टाषष्टितमः श्लोकः पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः हे अर्जुन ! सर्वान् विषयान् ध्यायतः पुरुषस्य तेषु प्रीतिः उपजायते | अतः प्रीतेः कामः तृष्णः समुत्पद्यते | कामाप्राप्ते कश्चित् विघ्नः भवति चेत् क्रोधः अभिजायते | यदा पुरुषः क्रोधेन पीडयति तदा सः अविवेकः प्राप्स्यति। अविवेककारणेन सः कार्याकार्यान् विषयान् करोति | क्रोधेन सः गुरुन् अपि आक्रुध्यति | संमोहात् स्मृतेः विभ्रमः भवति। स्मृतिविभ्रंशात् तस्य बुद्धिः नाशं भवति | बुद्धेः नाशेन तस्य पुरुषार्थयोग्यं नश्यति।

व्याकरणम्
सन्धिः
ध्यायतः विषयान् - विसर्गउकारः
सङ्गः + ते - विसर्ग सकारः
क्रोधः + अभिजायते - विसर्गउकारः पूर्वरूपसन्धिः
बुद्धिनाशः + बुद्धिनाशात् - विसर्गउकारः

Downloaded from www.omkaravidya.com

क्रोधात् + भवति - जश्त्वसन्धिः
स्मृतिभ्रंशात् + बुद्धिनाशः - जश्त्वसन्धिः

समासः
स्मृतेः विभ्रमः स्मृतिविभ्रमः षष्ठीतत्पुरुषः
बुद्धेः नाशः - बुद्धिनाशः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ 2.64॥

पदच्छेदः
रागद्वेषवियुक्तैः तु विषयान् इन्द्रियैः चरन् आत्मवश्यैः विधेयात्मा प्रसादम् अधिगच्छति

पदपरिचयः
रागद्वेषवियुक्तैः - अकार. न. तृ बहु
तु - अव्ययम्
विषयान् - अकार. पु. द्वि बहु
इन्द्रियैः - अकार. न. तृ बहु
चरन् - तकार. पु प्र एक
आत्मवश्यैः - अकार. न. तृ बहु
विधेयात्मा - नकार. पु. प्र एक

Downloaded from www.omkaravidya.com

प्रसादम् - अकार. पु. द्वि एक
अधिगच्छति - लट् प्रपु एक

पदार्थः
रागद्वेषवियुक्तैः - रागद्वेषरहितैः
विषयान् - विषयान्
इन्द्रियैः – इन्द्रियैः
चरन् -अनुभवन्
आत्मवश्यैः- स्वधीनैः
विधेयात्मा - वश्यमनस्कः
प्रसादम् - प्रसन्नता
अधिगच्छति - प्राप्नोति

अन्वयः
रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः तु विषयान् चरन् विधेयात्मा प्रसादम् अधिगच्छति।

तात्पर्यम्.
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये चतुःषष्टितमः श्लोकः। | भगवान् अष्टाषष्टितमः श्लोकः पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः रागश्च द्वेषश्च रागद्वेषौ । रागद्वेषयोः कारणेन इन्द्रियाणां प्रवृत्तिः भवति | परन्तु मुमुक्षुः मनः स्वाधीनं कृत्वा अन्तकरणस्य प्रसादं प्राप्नोति | एवम अवदत् ।

व्याकरणम्
सन्धिः
आत्मवश्यैः + विधेयात्मा - विसर्गरेफः
रागद्वेषवियुक्तैः + तु – विसर्गसकारः इन्द्रियैः + चरन् - विसर्गसकारः

Downloaded from www.omkaravidya.com

समासः
रागश्च द्वेषश्च = रागद्वेषौ - इतरेतरद्वन्द्वसमासः
रागद्वेषाभ्याम् वियुक्तैः रागस्वेषवियुक्तः तस्मात् पञ्चमीतत्पुरुषसमासः
आत्मनः वश्यानि- आत्मवश्यैः- द्वितीयातत्पुरुषसमासः
विधेयः आत्मा यस्य सः - समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ **2.65**॥

पदच्छेदः
प्रसादे सर्वदुःखानां हानिः अस्य उपजायते प्रसन्नचेतसः हि आशु बुद्धिः पर्यवतिष्ठते

पदपरिचयः
प्रसादे - अकार. पु स. एक
सर्वदुःखानां - अकार. नपु ष बहु
हानिः - ईकार. स्त्री प्र एक
अस्य - मकार. पु ष एक
उपजायते - लट् प्रपु एक
प्रसन्नचेतसः - सकार. नपु ष. एक
हि - अव्ययम्
आशु - अव्ययम्

Downloaded from www.omkaravidya.com

बुद्धिः - ई स्त्री प्र एक
पर्यवतिष्ठते - लट् प्र एक

पदार्थः
प्रसादे - चित्तनेर्मल्ये
सर्वदुःखानां - सकल सुखदुःखानाम्
हानिः - विनाशः
अस्य - एतस्य
उपजायते - संभवति
प्रसन्नचेतसः - अवस्मथितबुद्धेः
हि - हि
आशु - शीघ्रम्
बुद्धिः - बुद्धिः
पर्यवतिष्ठते - अवतिष्ठते

अन्वयः
प्रसादे अस्य सर्वदुःखानां हानिः उपजायते प्रसन्नचेतसः बुद्धिः आशु पर्यवतिष्ठते |

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये पञ्चषष्टितमः श्लोकः | भगवान् अष्टाषष्टितमः श्लोकः पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः अस्य यतेः चित्तप्रसादे आध्यात्मिकादीनां हानिः विनाशः उपजायते | प्रसन्नचेतसः बुद्धिः शीघ्रम् स्थिरेण तिष्ठति | एवं प्रसन्नचेतसः कृतकृत्याः भवन्ति | यतः तस्मात् रागद्वेषवियुक्तैः इन्द्रियैः शास्त्राविरुद्धेषु अवर्जनीयेषु युक्तः समाचरेत् | एवम अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
हानिः + अस्य - विसर्गरेफः
अस्य + उपजायते - गुणसन्धिः
प्रसन्नचेतसः + हि - विसर्गउकारः
हि+ आशु - यण्सन्धिः

समासः
सर्वाणि दुःखानि सर्वदुःखानि- विशेषणपूर्वपदकर्मधारय समासः
प्रसन्नं चेतः यस्य सः प्रसन्नचेताः - समानाधिकरणबहुव्रीहि समासः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥2.66॥

पदच्छेदः
न अस्ति बुद्धिः अयुक्तस्य न च अयुक्तस्य भावना न च अभावयतः शान्तिः अशान्तस्य कुतः सुखम्

पदपरिचयः
न - अव्ययम्
अस्ति - लट् प्रपु एक
बुद्धिः - इकार. स्त्री प्र एक
अयुक्तस्य - अकार पु ष. एक

Downloaded from www.omkaravidya.com

न - अव्ययम्
च - अव्ययम्
अयुक्तस्य - अकार पु ष. एक
भावना - अःशकार स्त्री प्र एक
न - अव्ययम्
च - अव्ययम्
अभावयतः: तकार पु ष. एक
शान्तिः - इकार स्त्री प्र एक
अशान्तस्य - अकार पु ष. एक
कुतः - अव्ययम्
सुखम् - अकार नपु प्र एक

पदार्थः
न-न
अस्ति - अस्ति
बुद्धिः - धीः
अयुक्तस्य - इन्द्रियस्वाधीनरहितस्य
च-च
अयुक्तस्य - इन्त्रियस्वाधीनरहितस्य
भावना - चिन्तना
न-न
च-च
अभावयतः - आत्मध्यानरहितस्य
शान्तिः - शान्तिः
अशान्तस्य - शान्तिविहीनस्य
कुतः - कथं संभवति
सुखम् - आनन्दः

Downloaded from www.omkaravidya.com

अन्वयः
अयुक्तस्य बुद्धिः नास्ति । अयुक्तस्य भावना च न (अस्ति)।
अभावयतः शान्तिः न च (अस्ति) । अशान्तस्य कुतः सुखम् च ?

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये षष्टषष्टितमः श्लोकः। भगवान् अष्टाषष्टितमः श्लोकः पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् । अस्मिन् श्लोके भगवान् श्रीकृष्णः “यः स्वस्य मनः इन्द्रियानि च न जयति तस्मै निश्चयबुद्धिः नास्ति । निश्चयबुद्धिरहितस्य अन्तः करणे आत्मध्यानमपि न सिध्यति । आत्मध्यानरहितस्य शान्तिः अपि नास्ति । यः अशान्तः तस्य सुखं कुतः भवति ? “ एवम् अवदत् ।

व्याकरणम्
सन्धिः
न + अस्ति - सवर्णदीर्घसन्धिः
बुद्धिः + अयुक्तस्य - विसर्गरेफः
च+ अयुक्तस्य -सवर्णदीर्घसन्धिः
च + अभावयतः -सवर्णदीर्घसन्धिः
शान्तिः + अशान्तस्य - विसर्गरेफः

समासः
अयुक्तः - न विद्यते युक्तिः यस्य सः - नञ्तत्पुरुषः
अभावयतः: - न विदयते भावना यस्य सः - नञ्तत्पुरुषः
अशान्तः - न विद्यते शान्तिः यस्य सः - नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ 2.67॥

पदच्छेदः
इन्द्रियाणां हि चरतां यत् मनः अनुविधीयते तत् अस्य हरति प्रज्ञां वायुः नावम् इव अम्भसि

पदपरिचयः.
इन्द्रियाणां - अकार. नपु. ष. बहु
हि - अव्ययम्
चरतां - तकार. नपु. ष. बहु
यत् - दकार. पु प्र एक
मन: - सकार. नपु प्र एक
अनुविधीयते - अनु + वि + था धातुः लट् कर्मणि प्रपु एक
तत् - दकार. नपु प्र एक
अस्य - अकार. पु ष.एक
हरति - लट् प्रपु एक
प्रज्ञां - आकार. स्त्री. द्वि एक
वायुः - उकार. पु प्र एक
नावम् -औकार. स्त्री द्वि एक
इव - अव्ययम्
अम्भसि - सकार. नपु. स एक

पदार्थः

Downloaded from www.omkaravidya.com

इन्द्रियाणां -इन्द्रियाणां
हि - हि
चरतां - प्रवर्तमानाम्
यत् - यत्
मनः - अन्तः करणम्
अनुविधीयते - प्रवृत्यते
तत् - तत्
अस्य - अस्य
हरति - नाशयति
प्रज्ञां - आतमनात्मविवेकज़ज्ञानम्
वायुः - मरुत्
नावम् - नौकाम्
इव - इव
अम्भसि - जल्न

अन्वयः
चरताम् इन्द्रियाणां यत् मनः अनुविधीयते तत् अस्य प्रज्ञां वायुः अम्भसि नावम् इव हरति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्तषष्टितमः श्लोकः। भगवान् अष्टाषष्टितमः श्लोकः पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् । अस्मिन् श्लोके भगवान् श्रीकृष्णः "यस्मात् चरताम् इन्द्रियाणां हि यत् मनः अनुप्रवर्तते इन्द्रियविषयविकल्पने प्रवृत्तं तत् मनः यतेः आत्मानात्मविवेकजांज्ञां प्रजां नाशयति । यथा वायुः जिगमिषतां मार्गात् उद्धृत्य उन्मार्गे नावं प्रवर्तयति तथा मनः आत्मविषया प्रजां हृत्वा विषयाविषयां करोति । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
यत् + मनः - अनुनासिकासन्धिः
मनः + अनुविधीयते - विसर्गउकारः पूर्वरूपसन्धिः
तत् + अस्य - जश्त्वसन्धिः
वायुः नावाम् - विसर्ग रेफः
इव + अम्भसि - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ 2.68॥

पदच्छेदः
तस्मात् यस्य महाबाहो निगृहीतानि सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता

पदपरिचयः
तस्मात् - दकार. पु प एक
यस्य - दकार. पु ष एक
महाबाहो - उकार. पु सं प्र
निगृहीतानि - अकार. नपु प्र बहु
सर्वशः - अव्ययम्
इन्द्रियाणि - अकार. नपु प्र बहु
इन्द्रियार्थेभ्यः अकार. नपु प बहु

Downloaded from www.omkaravidya.com

तस्य - अकार. पु ष. एक
प्रजा - आकार. स्त्री प्र एक
प्रतिष्ठिता - आकार. स्त्री प्र एक

पदार्थः
तस्मात् - ततः
यस्य - यस्य
महाबाहो - अर्जुन
निगृहीतानि - नियन्त्रितानि
सर्वशः - सर्वशः
इन्द्रियाणि - इन्द्रियाणि
इन्त्रियार्थेभ्यः - इन्त्रियार्थेभ्यः
तस्य -तस्य
प्रज्ञा - ज्ञानम्
प्रतिष्ठिता - स्थिरा

अन्वयः
हे महाबाहो ! तस्मात् यस्य इन्द्रियाणि सर्वशः इन्द्रियार्थेभ्यः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता ।

तात्पर्यम्
अयं श्लोकः: श्रीमद्भगवद्गीतायां द्वितीयोध्याये अष्टाषष्टितमः श्लोकः। भगवान् अस्मिन् श्लोकः पर्यन्तं स्थितप्रज्ञस्य उपायम् उपदिष्टवान् | अस्मिन् श्लोके भगवान् श्रीकृष्णः " हे महाबाहो! तस्मात् यस्य इन्द्रियाणि सर्वेभ्यः विषयेभ्यः निगृहितानि तस्य प्रज्ञा प्रतिष्ठिता" | एवम् अवदत् |

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
तस्मात् + यस्य - जश्त्वसन्धिः
इन्द्रियाणि + इन्द्रियार्थेभ्यः - सवर्णदीर्घसन्धिः
इन्द्रियार्थभ्यः + तस्य - विसर्गसकारः

समासः
महान्तौ बाहूः यस्य सः महाबाहौ - समानधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥2.69॥

पदच्छेदः
या निशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः

पदपरिचयः
या - दकार. स्त्री प्र एक
निशा- आकार. स्त्री प्र एक
सर्वभूतानां - अकार. नपु ष बहु
तस्यां - दकार. स्त्री स एक
जागर्ति - लट् प्रपु एक

Downloaded from www.omkaravidya.com

संयमी - नकार पु प्र एक
यस्यां - दकार. स्त्री स एक
जाग्रति - लट् प्रपु बहु
भूतानि - अकार. नपु प्र बहु
सा - दकार. स्त्री प्र एक
निशा - आकार. स्त्री प्र एक
पश्यतः - तकार पु. ष. एक
मुनेः - इकार. पु ष. एक

पदार्थः
या-या
निशा - रात्रिः
सर्वभूतानाम् - सर्वप्राणिनाम्
तस्यां - तस्याम्
जागर्ति - जागर्ति
संयमी - योगी
यस्यां - यस्याम्
जाग्रति - जाग्रति
भूतानि - प्राणिनः
सा-सा
निशा - रात्रिः
पश्यतः - ईक्षमाणस्य
मुनेः - योगिनः

अन्वयः
सर्वभूतानां या निशा तस्यां संयमि जागर्ति यस्यां भूतानि जाग्रति सा पश्यतः मुनेः निशा (न भवति) ।

Downloaded from www.omkaravidya.com

तात्पर्यम्.
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये नवषष्टितमः श्लोकः। अस्मिन् श्लोके भगवान् श्रीकृष्णः “यस्मिन सर्वप्राणिनः न प्रवर्तन्ते तस्मिन् ब्रह्मणि योगी सर्वदा प्रवर्तते । लोके विषयेषु सर्व प्राणिनः प्रवर्तन्ते । तेषु विषयेषु योगी अनासक्तः भवति । एवम् अवदत् ।

व्याकरणम्.
सन्धिः
पश्यतः + मुनेः - विसर्गउकारः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥2.70॥

पदच्छेदः
आपूर्यमाणम् अचलप्रतिष्ठं समुद्रम् आपः प्रविशन्ति यद्वत् तद्वत् कामाः यं प्रविशन्ति सर्वे सः शान्तिम् आप्नोति न कामकामी

पदपरिचयः
आपूर्यमाणम् - अकार. पु. द्वि एक
अचलप्रतिष्ठं - अकार. पु द्वि एक
समुद्रम् - अकार. पु. द्वि एक

Downloaded from www.omkaravidya.com

आपः - पकार स्त्री प्र बहु
प्रविशन्ति - लट् प्रपु बहु
यद्वत् - अव्ययम्
तद्वत् - अव्ययम्
कामाः - अकार. पु प्र बहु
यं - दकार. पु द्वि एक
प्रविशन्ति - लट् प्रपु बहु
सर्वे - अकार. पु प्र बहु
सः दकार. पु प्र एक
शान्तिम् - ई स्त्री द्वि एक
आप्नोति - लट् प्रपु एक
न - अव्ययम्
कामकामी - नकार. पु. प्र एक

पदार्थः
आपूर्यमाणम् - जलेनपूर्यमाणम्
अचलप्रतिष्ठं - स्थिरस्थितम्
समुद्रम् - सागरम्
आपः - जलम्
प्रविशन्ति - प्राप्नोति
यद्वत् - यथा
तद्वत् - तथा
कामाः - आशाः
यं-यम्
प्रविशन्ति - प्रविशन्ति
सर्वे - सकलाः
सः -सः
शान्तिम् - शान्तिम्

Downloaded from www.omkaravidya.com

आप्नोति - प्राप्नोति
न-न
कामकामी - विषय इच्छुकः

अन्वयः
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रम् यद्वत् प्रविशन्ति तद्वत् सर्वेकामाः यं प्रविशन्ति सः शान्तिम् आप्नोति । कामकामी न (आप्नोति) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये सप्ततितमः श्लोकः। अस्मिन् श्लोके भगवान् श्रीकृष्णः " सर्वाः नद्याः समुद्रम् आप्नोति । एवमेव ज्ञानी परिपूर्णः । सर्वविषयाः तस्मिन् किञ्चितपि विकल्पं न कुर्वन्ति । अतः सः स्वरूपमेव तिष्ठति । परन्तु कामकामी स्वरूपमेव न तिष्ठति" । एवम् अवदत् ।

व्याकरणम्;
सन्धिः
कामाः + यम् - विसर्गलोपः

समासः
अचला प्रतिष्ठिता यस्य सः समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ 2.71॥

Downloaded from www.omkaravidya.com

पदच्छेदः
विहाय कामान् यः सर्वान् पुमान् चरति निःस्पृहः निर्ममः निरहङ्कारः स शान्तिम् अधिगच्छति

पदपरिचयः
विहाय - ल्यप् अव्ययम्
कामान् - अकार पु द्वि बहु
यः - दकार पु प्र एक
सर्वान् - अकार पु द्वि बहु
पुमान् - सकार पु प्र एक
चरति -लट् प्रपु एक
निःस्पृहः - अकार पु प्र एक
निर्ममः - अकार पु प्र एक
निरहङ्कारः -अकार पु प्र एक
सः - दकार पु प्र एक
शान्तिम् - इ स्त्री द्वि एक
अधिगच्छति - लट् प्रपु एक

पदार्थः
विहाय - परित्यज्य
कामान् - इच्छाः
यः - यः
सर्वान् - अनेकान्
पुमान् - नरः
चरति - वर्तते
निःस्पृहः - निराशः
निर्ममः - ममतारहितः
निरहङ्कारः - अहङ्काररहितः

Downloaded from www.omkaravidya.com

सः - सः
शान्तिम् - शान्तिम्
अधिगच्छति - प्राप्नोति

अन्वयः
यः पुमान् सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः चरति सः शान्तिम् अधिगच्छति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये एकसप्तति श्लोकः। अस्मिन् श्लोके भगवान् श्रीकृष्णः "यः सन्यासी सर्वान् कामान अशेषतः विहाय चरति च शरीरजीवनमात्रे अपि निस्पृहः निर्ममः निरहङ्कारः च अस्ति सः स्थितप्रज्ञ: | सर्वं संसारदुः खेभ्यः शान्तिं प्राप्नोति | सः ब्रहमभूतः भवति" | एवम अवदत् |

व्याकरणम्
सन्धिः
पुमान् + चरति - सत्वसन्धिः

समासः
निर्ममः निर्गतः ममता यस्मात् सः - नञ्बहुव्रीहिः
निस्पृहः - निर्गता स्पृहा यस्मात् सः - नञ्बहुव्रीहिः
निरहङ्कारः - निर्गतः अहङ्कारः यस्मात् सः - नञ्बहुव्रीहिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ 2.72॥

पदच्छेदः
एषा ब्राह्मी स्थितिः पार्थ न एनां प्राप्य विमुह्यति स्थित्वा अस्याम् अन्तकाले अपि ब्रह्मनिर्वाणम् ऋच्छति

पदपरिचयः
एषा - दकार. स्त्री प्र एक
ब्राहमी - ईकार. स्त्री प्र एक
स्थितिः - इकार. स्त्री प्र एक
पार्थ - अकार. पु सं प्र
न - अव्ययम्
एनां - दकार. स्त्री द्वि एक
प्राप्य - ल्यप् अव्ययम्
विमुह्यति - लट् प्रपु एक
स्थित्वा - अव्ययम्
अस्याम् - मकार. स्त्री स एक
अन्तकाले - अकार. पु. स एक
अपि - अव्ययम्
ब्रहमनिर्वाणम् - अकार. नपु. द्वि एक
ऋच्छति - लट् प्रपु एक

पदार्थः

Downloaded from www.omkaravidya.com

एषा - इयम्
ब्राहमी - ब्राहमी
स्थितिः - निष्टा
पार्थ - अर्जुन
न-न
एनां - एताम्
प्राप्य - लब्ध्वा
विमुह्यति - मोहं प्राप्नोति
स्थित्वा - स्थित्वा
अस्याम् - एतस्याम्
अन्तकाले - मरणकाले
अपि - अपि
ब्रह्मनिर्वाणम् - ब्रहमनिर्वाणम्
ऋच्छति - लभते

अन्वयः
हे पार्थ एषा ब्राह्मी स्थिति:। एनां प्राप्य न विमुह्यति । अन्तकाले अपि अस्याम् स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां द्वितीयोध्याये द्वासप्ततितमः श्लोकः। अस्मिन् श्लोके भगवान् श्रीकृष्णः "इयं ब्राह्मी स्थितिः इति उच्यते । यः एनां स्थितं प्राप्नोति सः न मोहं प्राप्नोति । अन्तकाले अपि एतस्याम् स्थितौ वर्तित्वा मोक्षं प्राप्नोति" । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
न + एनाम् - वृद्धिसन्धिः
अन्तकाले + अपि - पूर्वरूपसन्धिः
स्थित्वा + अस्याम् - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः - साङ्ख्ययोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगः नाम द्वितीयः अध्यायः

पदपरिचयः.
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रहमविद्यायां - आकार. स्त्री ष.बहु
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक

Downloaded from www.omkaravidya.com

साङ्ख्ययोगः अकार. पु प्र. एक
नाम - नकार.नपु. प्र एक
द्वितीयः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
साङ्ख्ययोगः - साङ्ख्ययोगः
नाम - नाम
द्वितीयः : - द्वितीयः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगनामः द्वितीयः अध्यायः (संपूर्णम् भवति)।

तात्पर्यम्.
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगः नामः द्वितीयः अध्यायः (संपूर्णम् भवति) ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

सदिति - सत् + इति - जश्त्वसन्धिः

श्रीमद्भगवद्गीतासूपनिषत्सु - श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः

योगो नाम - योगः + नामः - विसर्गउकारः

द्वितीयोऽध्यायः - द्वितीयः + अध्यायः - विसर्गउकारः गुणसन्धिः पूर्वरूपसन्धिः

समासः

ब्रह्मविद्यायां - ब्रह्म इति विद्या - कर्मधारयः

कृदन्तः

ॐ - अव् + मन् प्रत्ययः

उपनिषद् - उप + नि + षद्

॥ श्री कृष्णार्पणमस्तु ॥

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# तृतीयोऽध्यायः
# कर्मयोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः
अर्जुन उवाच
ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥३.१॥

पदच्छेदः
ज्यायसी चेत् कर्मण: ते मता बुद्धिः जनार्दन तत् किम् कर्मणि घोरे मां नियोजयसि केशव

पदपरिचयः
ज्यायसी - सकार स्त्री प्र एक
चेत् - अव्ययम्
कर्मणः - नकार नपु प एक
ते -दकार पु ष एक
मता - आकार स्त्री प्र एक
बुद्धिः - इकार स्त्री प्र एक
जनार्दन - अकार पुसं प्र
तत् - दकार नपु प्र एक
किम् - मकार नपु प्र एक
कर्मणि - नकार नपु स. एक
घोरे - अकार नपु स एक
मां - दकार त्रि द्वि एक
नियोजयसि - लट् मपु एक
केशव - अकार पु सं प्र

पदार्थः

Downloaded from www.omkaravidya.com

ज्यायसी - श्रेयसी
चेत् - चेत्
कर्मणः - कर्मणः
ते - तव
मता - संमतम्
बुद्धिः - जानम्
जनार्दन - कृष्ण
तत् - तत्
किम् - किम्
कर्मणि - कर्मणि
घोरे – प्राणिहिंसकरे
नियोजयसि - नियोजयसि
मां - माम्
केशव - कृष्ण

अन्वयः
हे जनार्दन! कर्मण: बुद्धिः ज्यायसी । ते मता चेत् हे केशव तत् घोरे कर्मणि मां किं
नियोजयसि ?

तात्पर्यम्
अयं श्लोकः श्रीमद्भगगवद्गीतायां तृतीयोध्याये प्रथमः श्लोकः। अर्जुनः श्रीकृष्णम् अपृच्छत् । "हे जनार्दन! यदि कर्मणः साकाशात् जानं श्रेयसी तव मता चेत् तर्हि हे केशव! किं कारणेन प्राणिहिसकरे घोरे कर्मणि मां नियोजयसि ?" ।

व्याकरणम्
सन्धिः
कर्मण: + ते - विसर्गसकारः
बुद्धिः + जनार्दनः - विसर्गरेफः
नियोजयसि - नि + युज् + णिच्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥३.२॥

पदच्छेदः
व्यामिश्रेण इव वाक्येन बुद्धि मोहयसि इव मे तत् एकं वद निश्चित्य येन श्रेयः
अहम्
आप्नुयाम्

पदपरिचयः
व्यामिश्रेण - अकार. नपु तृ एक
इव - अव्ययम्
वाक्येन - अकार. नपु तृ एक
बुद्धिं - इकार. स्त्री द्वि एक
मोहयसि - लट् मपु एक
इव - अव्ययम्
मे - दकार त्रि ष एक
तत् - दकार नपु द्वि एक
वद - लोट् मपु एक
येन - दकार. पु तृ एक
अहम् - दकार पु प्र एक
एकं - अकार नपु द्वि एक
निश्चित्य - ल्यप् अव्ययम्
श्रेयः - सकार नपु द्वि एक
आप्नुयाम् - विधि उपु एक

Downloaded from www.omkaravidya.com

पदार्थः

व्यामिश्रेण - व्यामिश्रेण

इव - इव

वाक्येन - वचनेन

बुद्धिं - बुद्धिं

मोहयसि - मोहयसि

इव - इव

मे - मम

तत् - तत्

एकं - एकम्

वद - कथय

निश्चित्य - निर्धार्य

येन - येन

श्रेयः - आप्तिः

अहम् - अहम्

आप्नुयाम् - प्राप्नुयाम्

अन्वयः

व्यामिश्रेण इव वाक्येन मे बुद्धिं मोहयसि । येन श्रेयः अहम् आप्नुयाम् ।
तत् एकं निश्चित्य वद।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये द्वितीयः श्लोकः। अर्जुनः श्रीकृष्णम् एवम् अपृच्छत् । "यद्यपि विविक्ताभिधायी भगवान् तथापि मम मन्दबुद्धेः व्यामिश्रम् इव प्रतिभाति । तेन कारणेन मम बुद्धिं मोहयसि इव । त्वम् येन मार्गेण अहं मोक्षम् आप्नुयाम् तदेकम् एव निश्चित्य वद ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
तत् + एकम् - जश्त्वसन्धिः
श्रेयः + अहम् - विसर्ग उकारः पूर्वरूपसन्धिः
मोहयसि + इव – सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अथ तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

श्री भगवानुवाच
लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥3.3॥

पदच्छेदः
लोके अस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया अनघ ज्ञानयोगेन साङ्ख्यानां
कर्मयोगेन
योगिनाम्

पदपरिचयः
लोके - अकार. पु स. एक
अस्मिन् - दकार. पु स. एक
द्विविधा - आकार स्त्री प्र एक
निष्ठा - आकार स्त्री प्र एक
पुरा - अव्ययम्
प्रोक्ता - आकार स्त्री प्र एक

Downloaded from www.omkaravidya.com

मया - दकार त्रि तृ एक
अनघ - अकार. पु सं प्र
ज्ञानयोगेन - अकार. पु तृ एक
साङ्ख्यानां - अकार पु ष. बहु
कर्मयोगेन - अकार. पु तृ एक
योगिनाम् - अकार पु ष. बहु

पदार्थः
लोके - प्रपञ्चे
अस्मिन् - अस्मिन्
द्विविधा - द्विप्रकारः
निष्ठा - स्थितिः
पुरा - पूर्वम्
प्रोक्ता - वर्णिता
मया - मया
अनघ - पापरहित
ज्ञानयोगेन - कर्माचरणेन
साङ्ख्यानां - संन्यासिनाम्
कर्मयोगेन - कर्मयोगेन
योगिनाम् - योगिनाम्

अन्वयः
हे अनघ! पुरा अस्मिन् लोके ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् (इति ) द्विविधा
निष्ठा मया प्रोक्ता ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये तृतीयः श्लोकः। श्री भगवान् कृष्णः "हे पापरहितः! साङ्ख्यानां कृते ज्ञानमार्गः योगिनाम् कृते कर्ममार्गः च इति द्विविधः मार्गः मया प्राग् एव प्रोक्ता । इति अवदत् ।

व्याकरणम्
सन्धिः
लोके + अस्मिन् - पूर्वरूपसन्धिः
मया + अनघ - सवर्णदीर्घसन्धिः

समासः
ज्ञानयोगेन - ज्ञानम् एव योगः तेन - अवधारणापूर्वपदकर्मधारयसमासः
कर्मयोगेन - कर्म एव योगः तेन - अवधारणापूर्वपदकर्मधारयसमासः
अनघः - न विद्यते अघं यस्य सः - नञ् बहुव्रीहिः

कृदन्ताः
प्रोक्ता – प्र+ वच् +क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - अथ तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः
न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥३.४॥

Downloaded from www.omkaravidya.com

पदच्छेदः
न कर्मणाम् अनारम्भात् नैष्कर्म्यं पुरुषः अश्नुते न च संन्यसनात् एव सिद्धिं समधिगच्छति

पदपरिचयः
न - अव्ययम्
कर्मणाम् - नकार. पु. ष. एक
अनारम्भात् - अकार. पु. प. एक
नैष्कर्म्यम् - अकार. पु. द्वि एक
पुरुषः - अकार. पु प्र एक
अश्नुते - लट् प्रपु एक
न - अव्ययम्
च - अव्ययम्
संन्यसनात् - सकार.नपु प एक
एव - अव्ययम्
सिद्धिं - इकार. स्त्री द्वि एक
समधिगच्छति - सं+ अधि+ लट् प्रपु एक

पदार्थः
न-न
कर्मणाम् - क्रियाणाम्
अनारम्भात् - अप्रारम्भात्
नैष्कर्म्यम् - ज्ञानम्
पुरुषः - नरः
अश्नुते - प्राप्नोति
न-न
च-च
संन्यसनात् - कर्मपरित्यागात्

Downloaded from www.omkaravidya.com

एव - एव
सिद्धिं - मोक्षम्
समधिगच्छति - प्राप्नोति
अन्वयः
पुरुषः कर्मणाम् अनारम्भात् नैष्कर्म्यं न अश्नुते । संन्यसनात् एव सिद्धिं न च समधिगच्छति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये चतुर्थः श्लोकः । भगवान् श्रीकृष्णः “पुरुषः कर्मणाम् अनारम्भात् ज्ञानं न प्राप्नोति । कर्मत्यागेन मोक्षं न प्राप्नोति । इति अवदत् ।

व्याकरणम्
सन्धिः
अनारम्भात् + नैष्कर्म्यम् - ङमुडागमनसन्धिः
पुरुषः + अश्नुते - विसर्गउकारः पूर्वरूपसन्धिः
संन्यसनात् + एव - जश्त्वसन्धिः

समासः
अनारम्भात् - अनारम्भम् - न आरम्भम् - तस्मात् नञ्तत्पुरुषः

तद्धितान्तः
निष्कर्मणः भावः नैष्कर्म्यम्

Downloaded from www.omkaravidya.com

मूलश्लोकः

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥३.५॥

पदच्छेदः
न हि कश्चित् क्षणम् अपि जातु तिष्ठति अकर्मकृत् कार्यते हि अवशः कर्म सर्वः प्रकृतिजैः
गुणैः

पदपरिचयः
न - अव्ययम्
हि - अव्ययम्
कश्चित् - अव्ययम्
क्षणम् - अकार. पु द्वि एक
अपि - अव्ययम्
जातु -अव्ययम्
तिष्ठति लट् प्रपु एक
अकर्मकृत् - तकार पु प्र एक
कार्यते लट् प्रपु एक
हि - अव्ययम्
अवशः - अकार पु प्र एक
कर्म - नकार नपु प्र एक
सर्वः - अकार पु प्र एक
प्रकृतिजैः - अकार पु तृ बहु
गुणैः अकार पु तृ बहु

Downloaded from www.omkaravidya.com

पदार्थः
न-न
हि- हि
कश्चित् - कोपि
क्षणम् - क्षणम्
अपि - अपि
जातु - कदापि
तिष्ठति - वर्तते
अकर्मकृत् - कर्मरहितः
कार्यते - चोद्यते
हि-हि
अवशः - अवशः
कर्म - कर्म
सर्व: - सकलः
प्रकृतिजैः - प्रकृतिजैः
गुणैः - गुणैः

अन्वयः
कश्चित् जातु क्षणम् अपि अकर्मकृत् नहि तिष्ठति हि । सर्वः प्रकृतिजैः गुणैः
अवशः कर्म
कार्यते।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये पञ्चमः श्लोक:। भगवान् श्रीकृष्णः "नरः सर्वदा कार्यं करोति क्षणमपि अकर्मकृत् इव न तिष्ठति । सर्वः प्रकृतिजैः गुणैः अवशः कर्म कार्यते ।" एवम् अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
तिष्ठति + अकर्मकृत् - यण्सन्धिः
हि+ अवशः - यण्सन्धिः

समासः
अकर्मकृत् - न कर्मकृत् - नञ् तत्पुरुषः
प्रकृतिजः प्रकृत्यां जनयति इति – उपपदसमासः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥३.६॥

पदच्छेदः
कर्मेन्द्रियाणि संयम्य यः आस्ते मनसा स्मरन् इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते

पदपरिचयः
कर्मेन्द्रियाणि - अकार. नपु द्वि बहु
संयम्य - अव्ययम्
यः - दकार. पु प्र एक
आस्ते - लट् प्रपु एक
मनसा - सकार नपु. तृ एक
स्मरन् - तकार. पु प्र एक

Downloaded from www.omkaravidya.com

इन्द्रियार्थान् - अकार. पु द्वि बहु
विमूढात्मा - नकार पु प्र एक
मिथ्याचारः - अकार पु प्र एक
सः - दकार. पु प्र एक
उच्यते - लट् प्रपु एक

पदार्थः
कर्मेन्द्रियाणि - कर्मेन्द्रियाणि
संयम्य - निरुध्य
यः - यः
आस्ते - वर्तते
मनसा -अन्तःकरणेन
स्मरन् - चिन्तयन्
इन्द्रियार्थान् - इन्द्रियार्थान्
विमूढात्मा - अविवेकी
मिथ्याचारः - मृषाचारः
सः - सः
उच्यते - अवदत्

अन्वयः
कर्मेन्द्रियाणि संयम्य यः मनसा इन्द्रियार्थान् स्मरन् आस्ते सः विमूढात्मा मिथ्याचारः (इति) उच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये षष्ठः श्लोकः। भगवान् श्रीकृष्णः "यः हस्तादीनि इन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा चिन्तयन् आस्ते सः विमूढात्मा मिथ्याचारः पापाचारः च इति उच्यते।“ इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
यः + आस्ते - विसर्गलोपः
सः + उच्यते - विसर्गलोपः

समासः
मिथ्या आचारः यस्य सः मिथ्याचारः - बहुव्रीहिः
विमूढः आत्मा यस्य सः विमूढ़ात्मा- बहुव्रीहिः
कर्मणः इन्द्रियाणि - कर्मेन्द्रियाणि - षष्ठीतत्पुरुषः
इन्द्रियाणाम् अर्थः तान् - इन्द्रियार्थान् षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥३.७॥

पदच्छेदः
यः तु इन्द्रियाणि मनसा नियम्य आरभते अर्जुन कर्मेन्द्रियैः कर्मयोगम् असक्तः सः विशिष्यते

पदपरिचयः
यः - दकार. पु प्र एक
तु - अव्ययम्
इन्द्रियाणि - अकार. नपु द्वि बहु

Downloaded from www.omkaravidya.com

मनसा - सकार. नपु तृ एक
नियम्य - अव्ययम्
आरभते - लट् प्रपु एक
अर्जुन - अकार. पु सं प्र
कर्मेन्द्रियैः अकार. नपु तृ बहु
कर्मयोगम् - अकार. पु द्वि एक
असक्तः - अकार. पु प्र एक
सः - दकार. पु प्र एक
विशिष्यते - लट् प्रपु एक

पदार्थः
यः - यः
तु – तु
इन्द्रियाणि - ज्ञानेन्द्रियाणि
मनसा - अन्तः करणेन
नियम्य - नियम्य
आरभते - आरम्भं करोति
अर्जुन - अर्जुन!
कर्मेन्द्रियैः - कर्मेन्द्रियैः
कर्मयोगम् - कर्मयोगम्
असक्तः - फलेषु इच्छारहितः
सः -सः
विशिष्यते - श्रेष्ठः भवति

अन्वयः
अर्जुन! यः तु इन्द्रियाणि मनसा नियम्य कर्मेन्द्रियैः कर्मयोगम् असक्तः आरभते सः विशिष्यते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये सप्तमः श्लोकः। भगवान् श्रीकृष्णः "हे अर्जुन! यः इन्द्रियाणि विवेकबुद्धया नियम्य कर्मेन्द्रियैः कर्मयोगम् असक्तः आरम्भं करोति सः श्रेष्ठः भवति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
यः + तु - विसर्ग सकारः
तु + इन्द्रियाणि - यण्सन्धिः
नियम्य+ आरभते - सवर्णदीर्घसन्धिः
आरभते + अर्जुन - पूर्वरूपसन्धिः
सः + विशिष्यते - विसर्गलोपः

कृदन्ताः

नियम्य – नि +यम् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिदध्येदकर्मणः॥३.८॥

पदच्छेदः
नियतं कुरु कर्म त्वं कर्म ज्यायो हि अकर्मणः शरीरयात्रा अपि च ते न प्रसिदध्येत् अकर्मणः

Downloaded from www.omkaravidya.com

पदपरिचयः
नियतम् - अकार. नपु द्वि एक
कुरु - लोट् मपु एक
कर्म - नकार. नपु द्वि एक
त्वम् - दकार पु प्र एक
कर्म- नकार. नपु द्वि एक
ज्यायः सकार. नपु प्र एक
हि - अव्ययम्
अकर्मणः - नकार. नपु प एक
शरीरयात्रा - आकार. स्त्री प्र एक
अपि - अव्ययम्
ते - दकार. पु ष. एक
प्रसिद्ध्येत् - विधि प्रपु एक
च - अव्ययम्
न - अव्ययम्
अकर्मणः- नकार. पु प. एक

पदार्थः
नियतम् - नित्यम्
कुरु - कुरु
कर्म - क्रिया
त्वं - त्वम्
कर्म - क्रिया
ज्यायः - श्रेष्ठः
हि - हि
अकर्मणः - कर्मरहितात्
शरीरयात्रा - शरीरसंरक्षणम्
अपि - अपि

Downloaded from www.omkaravidya.com

च-च

ते -तव न-न

प्रसिद्ध्येत् - सिद्धिं भवेत्

अकर्मणः - अकर्मणः

अन्वयः

त्वम् नियतं कर्म कुरु। कर्म हि अकर्मणः ज्यायः। अकर्मणः ते शरीरयात्रा अपि न च प्रसिद्ध्येत्।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये अष्टमः श्लोकः। भगवान् श्रीकृष्णः "त्वम् नित्यं कर्म कुरु। कर्म हि अकर्मणः ज्यायः। अकर्मणः ते शरीरयात्रा अपि न च प्रसिद्ध्येत्।" इति अवदत्।

व्याकरणम्

सन्धिः

ज्यायः + हि - विसर्ग उकारः

हि+ अकर्मणः - यण्सन्धिः

शरीरयात्रा + अपि - सवर्णदीर्घसन्धिः

प्रसिद्ध्येत् + अकर्मणः - जश्त्वसन्धिः

समासः

शरीरस्य यात्रा - शरीरयात्रा - षष्ठी तत्पुरुषः

अकर्म - न कर्म - नञ्तत्पुरुषः

कृदन्ताः

नियतम् – नि+यम्+क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः
यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥३.९॥

पदच्छेदः
यज्ञार्थात् कर्मणः अन्यत्र लोकः अयं कर्मबन्धनः तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर

पदपरिचयः
यज्ञार्थात् - अकार. नपु प. एक
कर्मणः - नकार. नपु प. एक
अन्यत्र - अव्ययम्
लोकः - अकार. पु प्र. एक
अयं - मकार. पु प्र एक
कर्मबन्धनः - अकार. पु प्र. एक
तदर्थं - अव्ययम्
कर्म - नकार नपु द्वि एक
कोन्तेय - अकार. पु सं प्र. एक
मुक्तसङ्गः - अकार. पु प्र. एक
समाचर - लोट् मपु एक

पदार्थः
यज्ञार्थात् - यज्ञकारणात्
कर्मणः - कार्यात्
अन्यत्र - अन्यकर्म
लोकः - जनाः अयं - अयम्

Downloaded from www.omkaravidya.com

कर्मबन्धनः - कर्मणाबन्धनः
तदर्थं - तदर्थं
कर्म -क्रिया
कौन्तेय - कुन्तिपुत्र
मुक्तसङ्गः - कर्म समाचर
समाचर - कुरु

अन्वयः
हे कौन्तेय! यज्ञार्थात् कर्मणः अन्यत्र अयं लोकः कर्मबन्धनः तदर्थं कर्म मुक्तसङ्गः समाचर ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये नवमः श्लोकः। भगवान् श्रीकृष्णः "यज्ञो वै विष्णुः" एवं तैत्तीरीय संहिते अस्ति । अतः यत् यज्ञार्थे कर्म क्रियते तत् श्रेष्टः अयं लोके अन्यैः कर्मभिः जनाः कर्मबन्धनाः भवन्ति। अत्र न ज्ञानार्थम् । हे कौन्तेय! अतः कर्मफलसङ्गवर्जितः सन् यज्ञार्थं कर्म समाचर ।" इति अवदत् ।

व्याकरणम्
सन्धिः
कर्मणः + अन्यत्र - विसर्ग उकारः
लोकः + अयम् - विसर्ग उकारः पूर्वरूपसन्धिः

समासः
यज्ञाय इदम् यज्ञार्थः चतुर्थीतत्पुरुषः
कर्म बन्धनं यस्य सः – कर्मबन्धनः बहुव्रीहिसमासः
मुक्तः सङ्गः यस्य सः- मुक्तसङ्गः बहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ ३.१०॥

पदच्छेदः
सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच प्रजापतिः अनेन प्रसविष्यध्वम् एषः वः अस्तु इष्टकामधुक्

पदपरिचयः
सहयज्ञाः - आकार. स्त्री द्वि बहु
प्रजाः - आकार. स्त्री द्वि बहु
सृष्ट्वा - अव्ययम्
पुरा - अव्ययम्
उवाच - लिट् प्रपु एक
प्रजापतिः - इकार. पु प्र एक
अनेन - मकार पु तृ एक
प्रसविष्यध्वम् - आशी मपु बहु
एषः - दकार. पु. प्र एक
वः दकार. पु . ष बहु
अस्तु - लोट् मपु एक
इष्टकामधुक् - अकार पु प्र एक

पदार्थः
सहयज्ञाः - यज्ञेन सह
प्रजाः- जनान्

Downloaded from www.omkaravidya.com

सृष्ट्वा - उत्पाद्य
पुरा -पूर्वकाले
उवाच - अवदत्
प्रजापतिः - ब्रह्मा
अनेन - यज्ञेन
प्रसविष्यध्वम् - वृद्धिं भवतु
एषः - यज्ञः
वः - युष्माकम्
अस्तु - अस्तु
इष्टकामधुक् - इष्टकामधुक्

अन्वयः
प्रजापतिः सहयज्ञाः प्रजाः पुरा सृष्ट्वा  अनेन प्रसविष्यध्वम् एषः वः इष्टकामधुक् अस्तु ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीये अध्याये दशमः श्लोकः। “पुरा ब्रह्मा यज्ञसहिताः प्रजाः उत्पाद्य यज्ञेन वृद्धिः ताम् कुरुध्वम् इति उक्तवान् । एषः यज्ञः युष्माकम् इष्टान् कामान् ददाति ।“ एवं च उक्तवान्

व्याकरणम्
सन्धिः
पुरा + उवाच - गुणसन्धिः
वः + अस्तु - विसर्गसकारः पूर्वरूपसन्धिः
अस्तु + इष्टकामधुक्व- यण्सन्धिः

Downloaded from www.omkaravidya.com

समासः
यज्ञेन सह वर्तते इति सहयज्ञः - सहपूर्वपदकर्मधारयसमासः
प्रजानां पतिः प्रजापतिः - षष्ठीतत्पुरुषः
इष्टाः कामाः इष्टकामाः कर्मधारयः

कृदन्ताः
सृज् + क्त्वा प्रत्ययः - सृष्ट्वा

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

देवान्भावयतानेन ते देवा भावयन्तु वः |
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ३.११॥

पदच्छेदः
देवान् भावयत अनेन ते देवाः भावयन्तु वः परस्परं भावयन्तः श्रेयः परम् अवाप्स्यथ

पदपरिचयः
देवान् - अकार. पु द्वि बहु
भावयत - लोट् मपु बहु
अनेन - मकार पु तृ एक
ते - दकार. पु प्र बहु
देवाः अकार. पु प्र बहु

Downloaded from www.omkaravidya.com

भावयन्तु - लोट् प्रपु बहु
वः - दकार त्रि द्वि बहु
परस्परम् - अव्ययम्
भावयन्तः - तकार. पु प्र बहु
श्रेयः - सकार. नपु द्वि एक
परम् - अकार नपु द्वि एक
अवाप्स्यथ - लृट् मपु बहु

पदार्थः
देवान् - इन्द्रादीन्
भावयत - वर्धयत
अनेन - यज्ञेन
ते- ते
देवाः - देवाः
भावयन्तु - भावयन्तु
वः - युष्मान्
परस्परम् - अन्योन्यम्
भावयन्तः - वर्धमानाः
श्रेयः- श्रेयः
परम् - परम्
अवाप्स्यथ - अवाप्स्यथ

अन्वयः
अनेन देवान् भावयत । ते देवा: वः भावयन्तु । परस्परं भावयन्तः परम् श्रेयः अवाप्स्यथ ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीये अध्याये एकादशः श्लोकः। भगवान् श्री कृष्णः “इन्द्रावीन् देवान् अनेन यज्ञेन वर्धत्वम् | ते देवाः युष्मान् वृष्ट्यादीन् वर्धन्ताम् । एवं परस्परं भावयन्तः परं श्रेयः |” इति अवदत् |

व्याकरणम्
सन्धिः
भावयत + अनेन - सवर्णदीर्घसन्धिः
देवाः + भावयन्तु - विसर्गलोपः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः |
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥३.१२॥

पदच्छेदः
इष्टान् भोगान् हि वः देवाः दास्यन्ते यज्ञभाविताः तैः दत्तान् अप्रदाय एभ्यः यः भुङ्क्ते स्तेनः एव सः

पदपरिचयः
इष्टान् - अकार. पु द्वि बहु
भोगान् - अकार. पु द्वि बहु
हि - अव्ययम्

Downloaded from www.omkaravidya.com

वः - दकार. त्रि चतु. बहु
देवाः - अकार. पु प्र बहु
दास्यन्ते - लृट् प्रपु बहु
यजभाविताः - अकार. पु प्र बहु
तैः - दकार. पु तृ बहु
दत्तान् - अकार. पु द्वि बहु
अप्रदाय - ल्यबन्तम् अव्ययम्
एभ्यः - मकार. पु च बहु
यः - दकार. पु प्र एक
भुङ्क्ते - लट् प्रषु एक
स्तेनः - अकार. पु प्र एक
एव - अव्ययम्
सः - दकार. पु प्र एक

पदार्थः
इष्टान् - इच्छाः
भोगान् - भोगान्
हि-हि
वः - युष्मभ्यम्
देवाः - सुराः
दास्यन्ते - दास्यन्ते
यजभाविताः - यज्ञैः वर्धिताः
तैः - देवैः
दत्तान् - दत्तान्
अप्रदाय - अदत्तवा
एभ्यः - देवेभ्यः
यः -यः
भुङ्क्ते - भुङ्क्ते

Downloaded from www.omkaravidya.com

स्तेनः - चोरः
एव -एव
सः - सः

अन्वयः
यज्ञभाविताः देवाः वः इष्टान् भोगान् दास्यन्ते । तैः दत्तान् एभ्यः अप्रदाय यः भुङ्क्ते सः स्तेनः एव।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीये अध्याये द्वादशः श्लोकः। भगवान् श्रीकृष्णः "यज्ञभाविताः देवाः युष्मभ्यम् स्त्री पशु पुत्रः इत्यादीन् दास्यन्ते। तैः देवैः दत्तान् भोगान् एभ्यः देवेभ्यः अदत्वा यः भुङ्क्ते सः चोरः एव"। इति अवदत् ।

व्याकरणम्
सन्धिः
वः + देवाः - विसर्गउकारः
देवाः + दास्यन्ते - विसर्गलोपः
तैः + दत्तान् - विसर्गरेफः
अप्रदाय + एभ्यः - वृद्धिसन्धिः
यः + भुङ्क्ते - विसर्गउकारः
स्तेनः + एव - विसर्गलोपः

समासः
अप्रदाय - न प्रदाय - नञ्तत्पुरुषः
यज्ञभाविताः - यज्ञेन भाविताः तैः तृतीयातत्पुरुषः

कृदन्ताः
अप्रदाय- अ+ प्र+ दा + ल्यप्

Downloaded from www.omkaravidya.com

मूलश्लोकः

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ ३.१३॥

पदच्छेदः

यज़अशिष्टाशिनः सन्तः मुच्यन्ते सर्वकिल्बिषैः भुञ्जते ते तु अघं पापाः ये पचन्ति आत्मकारणात्

पदपरिचयः
यज्ञशिष्टाशिनः - नकार. पु प्र बहु
सन्तः - तकार. पु प्र बहु
मुच्यन्ते लट् प्रपु बहु
सर्वकिल्बिषैः अकार. नपु तृ बहु
भुञ्जते - लट् प्रपु बहु
ते - दकार. पु प्र बहु
तु - अव्ययम्
अघं - अकार. पु द्वि एक
पापाः - अकार. पु प्र बहु
ये - दकार. पु प्र बहु
पचन्ति - लट् प्र बहु
आत्मकारणात् - अकार.नपु प एक

पदार्थः
यज्ञशिष्टाशिनः - यज्ञशेषभोजिनः

Downloaded from www.omkaravidya.com

सन्तः - सत्पुरुषाः
मुच्यन्ते - मुच्यन्ते
सर्वकिल्बिषैः - सकलपापैः
भुञ्जते - खादन्ति
ते -ते
तु-तु
अघं - पापम्
पापाः - पापिनः
ये-ये
पचन्ति - पाकं निर्वर्तयन्ति
आत्मकारणात् - आत्महेतोः

अन्वयः
यज्ञशिष्टाशिनः सन्तः सर्वकिल्बिषैः मुच्यन्ते । ये आत्मकारणात् पचन्ति ते पापाः (भवन्ति) । (ते) अघं तु भुञ्जते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये त्रयोदशः श्लोकः। भगवान् श्रीकृष्णः "देवयज्ञादीन् निवर्तय तच्छिष्टं अमृतं खादितुं यज्ञश्रेष्ठाः सन्तः सर्वकिल्बिषैः (पञ्च सूनाः ) मुच्यन्ते । पञ्च सूनाः च स्मृतौ उक्ताः

कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी ।
पञ्चसूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ॥

ये आत्मकारणात् पाकं कुर्वन्ति ते पापाः भवन्ति । ते अघम् एव भुञ्जते। इति अवदत् ।

व्याकरणम्
सन्धिः
सन्तः + मुच्यन्ते - विसर्गउकारः
पापाः + ये - विसर्गलोपः
पचन्ति + आत्मकारणात् - यण्सन्धिः

Downloaded from www.omkaravidya.com

समासः
यज्ञस्य शिष्टम् - यज्ञशिष्टम् - षष्ठीतत्पुरुषः
यज्ञशिष्टम् अशितुम् शीलम् येषां ते - यज्ञशिष्टाशिनः - उपपदसमासः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥३.१४॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ ३.१५॥

पदच्छेदः
अन्नात् भवन्ति भूतानि पर्जन्यात् अन्नसम्भवः यज्ञात् भवति पर्जन्यः यज्ञः कर्मसमुद्भवः कर्म ब्रह्मोद्भवं विद्धि ब्रह्म अक्षरसमुद्भवम् तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्

पदपरिचयः
अन्नात् - अकार. नपु. प एक
भवन्ति - लट् प्रपु बहु
भूतानि - अकार. नपु . प्र बहु
पर्जन्यात् - अकार. पु . प एक
अन्नसम्भवः - अकार. पु . प्र एक
यज्ञात् - अकार. पु . प एक

Downloaded from www.omkaravidya.com

भवति - लट् प्रपु एक
पर्जन्यः - अकार. पु . प्र एक
यज्ञः - अकार. पु . प्र एक
कर्मसमुद्भवः -अकार. पु . प्र एक
कर्म - नकार नपु द्वि एक
ब्रह्मोद्भवं - अकार नपु द्वि एक
विद्धि - लोट् मपु एक
ब्रह्म - नकार नपु द्वि एक
अक्षरसमुद्भवम् - अकार नपु द्वि एक
तस्मात् - अव्ययम्
सर्वगतं - अकार. नपु . प्र एक
ब्रह्म - नकार. नपु . प्र एक
नित्यं - अव्ययम्
यज्ञे - अकार. पु . स एक
प्रतिष्ठितम् - अकार. नपु. प्र एक

पदार्थः
अन्नात् - अन्नरसात्
भवन्ति - उत्पन्नाः
भूतानि - शरीराणि
पर्जन्यात् - वृष्टेः
अन्नसम्भवः: - अन्नसम्भवः
यज्ञात् - यज्ञात्
भवति - उद्भवति
पर्जन्यः - वृष्टिः
यज्ञः – यज्ञः
कर्मसमुद्भवः - कर्मसमुद्भवः
कर्म - क्रिया

Downloaded from www.omkaravidya.com

ब्रह्मोद्भवं - ब्रह्मणः उद्भवः
विद्धि - जानीहि
ब्रह्म - वेद
अक्षरसमुद्भवम् - अक्षरसमुद्भवम्
तस्मात् - तस्मात्
सर्वगतं - सर्वव्यापितम्
ब्रह्म - वेदः
नित्यं - नित्यम्
यज्ञे - यज्ञे
प्रतिष्ठितम् - प्रतिष्ठितम्

अन्वयः
अन्नात् भूतानि भवन्ति | पर्जन्यात् अन्नसम्भवः (भवति) | यज्ञात् पर्जन्यः भवति | यज्ञः कर्मसमुद्भवः (भवति) । कर्म ब्रह्मोद्भवं विद्धि । ब्रह्म अक्षरसमुद्भवम् (भवति) | तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् (भवति)।

तात्पर्यम्
इमौ श्लोकौ: श्रीमद्भगवदगीतायां तृतीयोऽध्याये चतुर्दशः पञ्चदशः च श्लोकौ | भगवान् श्रीकृष्णः "सर्वाणि शरीराणि अन्नात् भवन्ति । अन्नम् पर्जन्यात् भवति । वृष्टेः अन्नस्य सम्भवः भवति | अस्मात् यज्ञात् पर्जन्यः भवति | यज्ञः अपूर्वम् । यज्ञः कर्मसमुद्भवः | कर्मोत्पन्नकारणं वेदः इति जानीहि | अयं वेदरूप ब्रह्म अक्षरात् समुद्भवः | तस्मात् ब्रह्म सर्वगतम् | वेदः नित्यं यज्ञे प्रतिष्ठितम् |" इति अवदत् |

व्याकरणम्
सन्धिः
अन्नात् + भवन्ति - जश्त्वसन्धिः
पर्जन्यात् + अन्नसम्भवः - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

यज्ञात् + भवति - जश्त्वसन्धिः
पर्जन्यः + यज्ञः - विसर्ग उकारः
ब्रह्म + उद्भवम् - गुणसन्धिः
ब्रह्म + अक्षरसमुद्भवम् - सवर्णदीर्घसन्धिः

समासः

अन्नस्य सम्भवः अन्नसम्भवः - षष्ठीतत्पुरुषः
ब्रह्मणः उद्भवः - पञ्चमीतत्पुरुषः
सर्वं गतम् - सर्वगतम् - द्वितीयातत्पुरुषः
अक्षरं समुद्भवः कारणं यस्य तत् अक्षरसमुद्भवम् - बहुव्रीहिः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥३.१६॥

पदच्छेदः
एवं प्रवर्तितं चक्रं न अनुवर्तयति इह यः अघायुः इन्द्रियारामः मोघं पार्थ सः जीवति

पदपरिचयः
एवम् - अव्ययम्
प्रवर्तितं - अकार नपु द्वि एक
चक्रम् - अकार नपु द्वि एक
न - अव्ययम्

Downloaded from www.omkaravidya.com

अनुवर्तयति - अनु+ वृत् + शप् + णिच् + ति
इह - अव्ययम्
यः - दकार पु प्र एक
अघायुः - सकार नपु प्र एक
इन्द्रियारामः - अकार पु प्र एक
मोघं - अव्ययम्
पार्थ - अकार.पु सं प्र
सः - दकार. पु प्र एक
जीवति - लट् प्रपु एक

पदार्थः
एवं - एवम्
प्रवर्तितं - प्रवर्तितम्
चक्रम् - जगच्चक्रम्
न-न
अनुवर्तयति - अनुसरति
इह - अत्र
यः - यः
अघायुः- पापजीवनः
इन्द्रियारामः - इन्द्रियैः रमति
मोघं - वृथा
पार्थ - अर्जुन
सः - सः
जीवति - जीवति

अन्वयः
हे पार्थ! एवं प्रवर्तितं चक्रं इह यः न अनुवर्तयति सः अघायुः इन्द्रियारामः मोघं जीवति ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये षोडशः श्लोकः। भगवान् श्रीकृष्णः "हे पार्थ ! "एवम् ईश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितम् यः न अनुवर्तयति सः पापजीवनः सः इन्द्रियेषु सदा रमति । सः वृथा जीवति इति जानीहि" । इति अवदत् ।

व्याकरणम्
सन्धिः
न + अनुवर्तयति - सवर्णदीर्घसन्धिः
अनुवर्तयति + इह - सवर्णदीर्घसन्धिः
अघायुः+ इन्द्रियारामः - विसर्गरेफः
इन्द्रियारामः + मोघम् - विसर्गउकारः
सः + जीवति – विसर्गलोपः

समासः
इन्द्रियारामः - इन्द्रियैः आरामः - तृतीयातत्पुरुषः
अघायुः - अघम् आयुः यस्य सः - समानधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - अथ तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ ३.१७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यः तु आत्मरतिः एव स्यात् आत्मतृप्तः च मानवः आत्मनि एव च सन्तुष्टः तस्य कार्यं न विद्यते

पदपरिचयः
यः - दकार. पु प्र एक
तु - अव्ययम्
आत्मरतिः - इकार. पु प्र एक
एव - अव्ययम्
स्यात् - विधि प्रपु एक
आत्मतृप्तः - अकार. पु प्र एक
च - अव्ययम्
मानवः - अकार. पु प्र एक
आत्मनि - नकार. पु स एक
एव - अव्ययम्
च - अव्ययम्
सन्तुष्टः - अकार. पु प्र एक
तस्य - दकार. पु ष एक
कार्यं - अकार. नपु प्र एक
न - अव्ययम्
विद्यते - लट् प्रपु एक

पदार्थः
यः- यः
तु - तु
आत्मरतिः - आत्मनि एव रतिः
एव - एव
स्यात् - भवेत्

Downloaded from www.omkaravidya.com

आत्मतृप्तः - आत्मना एव तृप्तः
च-च
मानवः - नरः
आत्मनि - स्वस्मिन्
एव - एव
च-च
सन्तुष्टः - सम्प्रीतः
तस्य - तस्य
कार्य - क्रिया
न-न
विद्यते - अस्ति

अन्वयः
तु यः मानवः आत्मरतिः एव आत्मतृप्तः च आत्मनि एव सन्तुष्टः च स्यात् तस्य कार्यं न विद्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये सप्तदशः श्लोकः। भगवान् श्रीकृष्णः "यः आत्मनि एव रतिः सः आत्मरतिः । यः आत्मना एव तृप्तः सः आत्मतृप्तः । यः आत्मनि एव सन्तुष्टः सः आत्मसन्तुष्ठः । यः आत्मरतिः आत्मतृप्तः आत्मसन्तुष्टः च भवति तस्य करणीयम् कार्यम् नास्ति । इति अवदत् ।

व्याकरणम्
सन्धिः
यः + तु - विसर्गसकारः
तु + आत्मनि - यण्सन्धिः
आत्मरतिः + एव - विसर्गरेफः
कार्यम् + न - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

स्यात् + आत्मतृप्तः - जश्त्वसन्धिः
आत्मतृप्तः + च - विसर्गसकारः
आत्मनि + एव - यण्सन्धिः
सन्तुष्टः + तस्य - विसर्ग सकारः

समासः
आत्मरतिः - आत्मनि रतिः यस्य सः - व्यधिकरणबहुव्रीहिः
आत्मतृप्तः - आत्मना तृप्तः - तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥३.१८॥

पदच्छेदः

न एव तस्य कृतेन अर्थः न अकृतेन इह कश्चन न च अस्य सर्वभूतेषु कश्चित् अर्थव्यपाश्रयः

पदपरिचयः
न - अव्ययम्
एव - अव्ययम्
तस्य - दकार. पु ष एक
कृतेन - अकार. पु तृ एक
अर्थः - अकार. पु प्र एक
न - अव्ययम्

Downloaded from www.omkaravidya.com

अकृतेन - अकार. पु तृ एक
इह - अव्ययम्
कश्चन - अव्ययम्
न - अव्ययम्
च - अव्ययम्
अस्य - मकार. पु ष एक
सर्वभूतेषु - अकार. पु स बहु
कश्चित् - अव्ययम्
अर्थव्यपाश्रयः - अकार. पु प्र एक

पदार्थः
न-न
एव - एव
तस्य – आत्मतृप्तस्य
कृतेन - कृतेन
अर्थः - प्रयोजनम्
न - नास्ति
अकृतेन - अकृतेन
इह - इह
कश्चन - कश्चन
न - नास्ति
च-च
अस्य - आत्मतृप्तस्य
सर्वभूतेषु - सर्वप्राणिषु
कश्चित् - कश्चित्
अर्थव्यपाश्रयः - प्रयोजनसम्बन्धः

अन्वयः
इह तस्य कृतेन अर्थः न (अस्ति) एव । अकृतेन कश्चन (अर्थः) न (अस्ति) । अस्य सर्वभूतेषु कश्चित् अर्थव्यपाश्रयः च न (अस्ति) ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये अष्टादशः श्लोकः। भगवान् श्रीकृष्णः "आत्मतृप्तस्य इह लोके कृतेन प्रयोजनम् नास्ति । कार्यम् अकृतेन अपि कश्चन दोषः नास्ति। अस्य सर्वभूतेषु किमापि प्रयोजनम् नास्ति।" इति अवदत्।

व्याकरणम्

सन्धिः

न + एव - वृद्धिसन्धिः

कृतेन + अर्थः -सवर्णदीर्घसन्धिः

अर्थः + न - विसर्गउकारः

न + अकृतेन - सवर्णदीर्घसन्धिः

अकृतेन + इह - गुणसन्धिः

च + अस्य - सवर्णदीर्घसन्धिः

कश्चित् + अर्थव्याश्रयः -जश्त्वसन्धिः

समासः

अकृतेन – न कृतम् तेन - नञ्तत्पुरुषः

सर्वभूतेषु - सर्वाणि च तानि भूतानि च तेषु - कर्मधारयः

अर्थव्यपाश्रयः - अर्थः व्यपाश्रयः येन सः समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥३.१९॥

Downloaded from www.omkaravidya.com

पदच्छेदः
तस्मात् असक्तः सततम् कार्यम् कर्म समाचर असक्तः हि आचरन् कर्म परम् आप्नोति पूरुषः

पदपरिचयः
तस्मात् - दकार. पु प. एक
असक्तः - अकार. पु. प्र एक
सततम् - अव्ययम्
कार्यम् - अकार. नपु द्वि एक
कर्म - नकार. नपु द्वि एक
समाचर - लोट् मपु एक
असक्तः - अकार. पु. प्र एक
हि - अव्ययम्
आचरन् - तकार पु प्र एक
कर्म - नकार. नपु द्वि एक
परम् - अकार नपु द्वि एक
आप्नोति - लट् प्रपु एक
पूरुषः- अकार. पु प्र एक

पदार्थः
तस्मात् - तस्मात्
असक्तः - सङ्गवर्जितः
सततम् - सर्वदा
कार्यम् - कर्तुम् योग्यम्
कर्म - क्रिया
समाचर -कुरु / निर्वर्तय
असक्तः- सङ्गवर्जितः
हि-हि

Downloaded from www.omkaravidya.com

आचरन् - कुर्वन्
कर्म - क्रिया
परम् -मोक्षम्
आप्नोति - प्राप्नोति
पूरुषः - पूरुषः

अन्वयः
तस्मात् असक्तः सततम् कार्यम् कर्म समाचर असक्तः हि कर्म आचरन् पूरुषः परमाप्नोति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये नवदशः श्लोकः । भगवान् श्रीकृष्णः "तस्मात् त्वम् सङ्गवर्जितः सर्वदा कर्तव्यं कार्यं समाचर । यतः चेत् सङ्गवर्जितः ईश्वरार्थं कर्म आचरन् सत्वशुद्धिद्वारेण मोक्षं प्राप्नोति । इति अवदत् ।

व्याकरणम्
सन्धिः
तस्मात् + असक्तः - जश्त्वसन्धिः
असक्तः + हि - विसर्ग उकारः
हि + आचरन् - यण्सन्धिः

समासः
असक्तः - न सक्तः - नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ ३.२०॥

पदच्छेदः
कर्मणा एव हि संसिद्धिम् आस्थिताः जनकादयः लोकसङ्ग्रहम् एव अपि संपश्यन् कर्तुम् अर्हसि

पदपरिचयः

कर्मणा - नकार. नपु तृ एक
एव- अव्ययम्
हि - अव्ययम्
संसिद्धिम् - इकार स्त्री द्वि एक
आस्थिताः - क्त पु प्र बहु
जनकादयः - तकार. पु प्र बहु
लोकसङ्ग्रहम् - अकार. पु द्वि एक
एव - अव्ययम्
अपि - अव्ययम्
संपश्यन् - तकार. नपु प्र एक
कर्तुम् - तुमुनन्तम्
अर्हसि - लट् मपु एक

पदार्थः
कर्मणा - कर्मणा

Downloaded from www.omkaravidya.com

एव - एव
हि-हि
संसिद्धिम् - मोक्षयतिम्
आस्थिताः - प्राप्तवन्तः
जनकादयः - जनकादयः
लोकसंङ्ग्रहम् - लोकसंङ्ग्रहम्
एव - एव
अपि - अपि
संपश्यन् - चिन्तयन्
कर्तुम् - कर्तुम्
अर्हसि -अर्हसि

अन्वयः
जनकादयः कर्मणा एव हि संसिद्धिम् आस्थिताः। लोकसंङ्ग्रहम् एव अपि संपश्यन् कर्तुम् अर्हसि
।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये विंशतितमः श्लोकः।
भगवान् श्रीकृष्णः "पूर्वं जनकः अश्वपतिः आदयः कर्मद्धारा चित्तशुद्धिं प्राप्य ज्ञानेन मोक्षं प्राप्तवन्तः। त्वं लोकसङ्ग्रहं चिन्तयित्वा कर्म कर्तुमर्हसि।" इति अवदत्।

व्याकरणम्
सन्धिः
कर्मणा + एव - वृद्धिसन्धिः
एव + अपि - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

समासः
लोकसङ्ग्रहः - लोकानाम् सङ्ग्रहः तम् षष्ठी तत्पुरुषः

कृदन्ताः
आस्थिताः - आ + स्था + क्त प्रत्ययः
कर्तुम् - कृ + तुमुन् प्रत्ययः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूल श्लोकः

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।३.२१॥

पदच्छेदः
यत् यत् आचरति श्रेष्ठः तत् तत् एव इतरः जनः सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते

पदपरिचयः
यत् - दकार. नपु. प्र एक
यत् - दकार. नपु. प्र एक
आचरति - लट् प्रपु एक
श्रेष्ठः - अकार. पु प्र एक
तत् - दकार. नपु. प्र एक
तत् - दकार. नपु. प्र एक
एव - अव्ययम्
इतरः - अकार. पु प्र एक
जनः - अकार. पु प्र एक

Downloaded from www.omkaravidya.com

सः - दकार. पु. प्र एक
यत् - दकार. नपु. प्र एक
प्रमाणं - अकार. नपु प्र एक
कुरुते - लट् प्रपु एक
लोकः - अकार. पु प्र एक
तत् - दकार. नपु. प्र एक
अनुवर्तते - लट् प्रपु एक

पदार्थः
यत् - यत्
यत् - यत्
आचरति - करोति
श्रेष्ठः - ज्ञानी / प्रशस्तः
तत् - तत्
एव – एव
जनः: - नरः
तत् - तत्
इतरः - अन्यः
सः - सः
यत् - यत्
प्रमाणं - प्रमाणशास्त्रम्
कुरुते - करोति
लोकः - लोकः
तत् - तत्
अनुवर्तते - अनुसरति

अन्वयः
श्रेष्ठः यत् यत् आचरति तत् तत् एव इतरः जनः (आचरति) । सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये एकविंशतितमः श्लोकः | श्रेष्ठः यत् यत् कर्म आचरति तत् तत् एव इतरः जनः आचरति | सः श्रेष्ठः लौकिकं वैदिकम् वा यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते | अन्य जनाः तदेव प्रमाणी कुर्वन्ति । इति अवदत् ।

व्याकरणम्

सन्धिः

यत् + यत् - जश्त्वसन्धिः

यत् + आचरति - जश्त्वसन्धिः

श्रेष्ठः + तत् - विसर्गसकारः

तत् + एव -जश्त्वसन्धिः

एव + इतरः - गुणसन्धिः

इतर: + जनः - विसर्गउकारः

सः + यत् - विसर्गलोप:

लोक: + तत् - विसर्गसकारः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोग:

मूलश्लोकः

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।

नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥३.२२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
न मे पार्थ अस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन न अनवाप्तम् अवाप्तव्यं वर्ते एव च कर्मणि

पदपरिचयः
न - अव्ययम्
मे - दकार पु ष. एक
पार्थ - अकार पु सं प्र
अस्ति - लट् प्रपु एक
कर्तव्यं - अकार नपु प्र एक
त्रिषु -अकार. पु. स. बहु
लोकेषु - अकार. पु. स. बहु
किञ्चन - अव्ययम्
न - अव्ययम्
अनवाप्तम् - अकार नपु प्र एक
अवाप्तव्यं - अकार नपु प्र एक
वर्ते - लट् उपु एक
एव - अव्ययम्
च - अव्ययम्
कर्मणि - नकार नपु स. एक

पदार्थः
न-न
मे - मम
पार्थ - अर्जुन
अस्ति - अस्ति
कर्तव्यं - करणीयम्
त्रिषु - त्रिषु

Downloaded from www.omkaravidya.com

लोकेषु - लोकेषु
किञ्चन - किञ्चन
न-न
अनवाप्तम् - अप्राप्तम्
अवाप्तव्यं - प्राप्तव्यम्
वर्ते - वर्ते
एव - एव
च -च
कर्मणि - कर्मणि

अन्वयः
हे पार्थ ! मे कर्तव्यं नास्ति । त्रिषु लोकेषु अनवाप्तम् अवाप्तव्यं किञ्चन नास्ति च कर्मणि वर्ते एव ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये द्वाविंशतितमः श्लोकः। भगवान् श्रीकृष्णः हे पार्थ मह्यं त्रिषु लोकेषु किञ्चन कर्तव्यम् नास्ति । मम अप्राप्तम् प्रापणीयम् च नास्ति । तथापि अहं कर्मणि वर्ते एव । इति अवदत् ।

व्याकरणम्
सन्धिः
पार्थ + अस्ति - सवर्णदीर्घसन्धिः
न+ अनवाप्तम् - सवर्णदीर्घसन्धिः

समासः
अनवाप्तम् - न अवाप्तम् - नञ् तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ३.२३॥

पदच्छेदः
यदि हि अहं न वर्तेयं जातु कर्मणि अतन्द्रितः मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः

पदपरिचयः
यदि - अव्ययम्
हि - अव्ययम्
अहं - दकार. त्रि प्र एक
न - अव्ययम्
वर्तेयं - विधि उपु एक
जातु - अव्ययम्
कर्मणि - नकार. नपु स. एक
अतन्द्रितः - अकार. पु प्र एक
मम - दकार. पु ष एक
वर्त्म - नकार. नपु द्वि एक
अनुवर्तन्ते - लट् प्रपु बहु
मनुष्याः - अकार. पु प्र बहु
पार्थ - अकार पुसं प्र
सर्वशः - अव्ययम्

पदार्थः

Downloaded from www.omkaravidya.com

यदि - यदि
हि-हि
न-न
वर्तेयं - भवेयम्
जातु - जातु
कर्मणि - क्रियायाम्
अतन्द्रितः - अनलसः
मम - मम
वर्त्म - मार्गम्
अनुवर्तन्ते - अनुसरन्ति
मनुष्याः - जनाः
पार्थ - अर्जुन
सर्वशः - सर्वप्रकारैः

अन्वयः
हे पार्थ! यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम् (तदा) सर्वशः मनुष्याः मम वर्त्म अनुवर्तन्ते हि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये त्रयोविंशतितमः श्लोकः। भगवान् श्री कृष्णः हे पार्थ! यदि कदाचित् कर्मणि अनलसः न भवेयम् चेत् तर्हि सर्वे मनुष्याः मम श्रैष्टकर्मयोगम् अनुवर्तन्ते इति अवदत् ।

व्याकरणम्
सन्धिः
हि + अहम् -यण्सन्धिः
कर्मणि + अतन्द्रितः यण्सन्धिः
वर्त्म + अनुवर्तन्ते - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोक

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥24॥

पदच्छेदः
उत्सीदेयुः इमे लोकाः न कुर्यां कर्म चेत् अहम् सङ्करस्य च कर्ता स्याम् उपहन्याम् इमाः प्रजाः

पदपरिचयः
उत्सीदेयुः - विधि प्रपु बहु
इमे - मकार पु प्र बहु
लोकाः - अकार. पु प्र बहु
न - अव्ययम्
कुर्यां - विधि उपु एक
कर्म - नकार नपु द्वि एक
चेत् - अव्ययम्
अहम् - दकार. त्रि प्र एक
सङ्करस्य - अकार. पु ष एक
च - अव्ययम्
स्याम् - विधि उपु एक
इमाः - मकार स्त्री द्वि बहु

पदार्थः
उत्सीदेयुः - विनश्येयुः

Downloaded from www.omkaravidya.com

लोकाः - जनाः
कुर्यां - कुर्याम्
चेत् - चेत्
कर्ता - ऋकार पु प्र एक
उपहन्याम् - विधि उपु एक
प्रजाः - आकार स्त्री द्वि बहु
इमे - सर्वे
न-न
कर्म - क्रिया
अहम् - अहम्
सङ्करस्य - सङ्करस्य
च-च
कर्ता - कर्ता
स्याम् - स्याम्
उपहन्याम् - विनाशयेयम्
इमाः - इमे
प्रजाः - जनाः

अन्वयः
अहम् कर्म अकर्यां चेत् इमे लोकाः उत्सीदेयुः सङ्करस्य च कर्ता स्याम् इमाः प्रजाः उपहन्याम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये चतुर्विंशतितमः श्लोकः। भगवान् श्रीकृष्णः अहं कर्म न कुर्यां चेत् डमे सर्वे लोकाः विनश्येयुः। किञ्च अहं सङ्करस्य कर्ता स्याम्। तेन कारणेन प्रजानाम् अनुग्रहाय प्रवृत्तः तद् उपहितम् उपहननं कुर्याम् डत्यर्थः। मम ईश्वरस्य अनुरूपम् आपद्येत। एवम् अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
उत्सीदेयुः + इमे - विसर्गरेफः
लोकाः + न - विसर्गलोपः
चत् + अहम् - जश्त्वसन्धिः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ ३.२५॥

पदच्छेदः
सक्ताः कर्मणि अविद्वांसः यथा कुर्वन्ति भारत कुर्यात् विद्वान् तथा असक्तः चिकीर्षुः लोकसङ्ग्रहम्

पदपरिचयः
सक्ताः - अकार पु प्र बहु
कर्मणि - नकार नपु स एक
अविदवांसः - सकार पु प्र बहु
यथा - अव्ययम्
कुर्वन्ति - लट् प्रपु बहु
भारत - अकार पु सं प्र
कुर्यात् - विधि प्रपु एक
विद्वान् - सकार पु प्र एक
तथा - अव्ययम्

Downloaded from www.omkaravidya.com

असक्तः - अकार पु प्र एक
चिकीर्षुः - कृ+ सन् उकार पु प्रपु एक
लोकसङ्ग्रहम् - अकार पु द्वि एक

पदार्थः
सक्ताः - सक्ताः
कर्मणि - क्रियः
अविद्वांसः - आत्मज्ञानरहिताः
यथा - यथा
कुर्वन्ति - आचरन्ति
भारत - अर्जुन
कुर्यात् - भवेत्
विद्वान् - आत्मज्ञानी
तथा -तथा
असक्तः - फलेषु इच्छा रहितः
चिकीर्षुः - कर्तुम् इच्छुः
लोकसङ्ग्रहम् - लोकसङ्ग्रहम्

अन्वयः
हे भारत ! अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् असक्तः
लोकसङ्ग्रहम्
चिकीर्षुः कुर्यात् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये पञ्चविंशतितमः श्लोकः। भगवान् श्रीकृष्णः हे भारत! आत्मज्ञानरहिताः कर्मफलेषु इच्छवः यथा कार्यं कुर्वन्ति तथा विद्वान् फलेषु इच्छां विना लोकोद्धाराय कार्यं कुर्यात् । इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

कर्मणि + विद्वांसः - यण्सन्धिः

विद्वांसः + यथा - विसर्गउकारः

कुर्यात् + विद्वांसः - जश्त्वसन्धिः

विद्वान् + तथा - सत्वसन्धिः

तथा + असक्तः - सवर्णदीर्घसन्धिः

असक्तः: + चिकीर्षुः - विसर्ग सकारः श्चुत्वसन्धिः

चिकीर्षुः + लोकसङ्ग्रहम् - विसर्ग रेफः

समासः

अविद्वांसः - न विद्वांसः - नञ्तत्पुरुषः

लोकसङ्ग्रहम् - लोकस्य सङ्ग्रहम् - षष्ठी तत्पुरुषः

## श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥३.२६॥

पदच्छेदः

न बुद्धिभेदं जनयेत् अज्ञानां कर्मसङ्गिनाम् जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्

पदपरिचयः

न - अव्ययम्

Downloaded from www.omkaravidya.com

बुद्धिभेदं - अकार. पु द्वि एक
जनयेत् - विधि प्रपु एक
अज्ञानां - अकार. पु ष बहु
कर्मसङ्गिनाम् - नकार. पु ष बहु
जोषयेत् - विधि प्रपु एक
सर्वकर्माणि - नकार नपु द्वि बहु
विद्वान् - सकार पु. प्र एक
युक्तः - अकार पु. प्र एक
समाचरन् - सम् + आ + चर् + शतृ

पदार्थः
न-न
बुद्धिभेदं - बुद्धेः भेदम्
जनयेत् - उत्पादयेत्
अजानां - अविवेकिनाम्
कर्मसङ्गिनाम् - कर्मसु असक्तानाम्
जोषयेत् - कारयेत्
सर्वकर्माणि - सकलकर्तव्यानि
विद्वान् - ज्ञानी
युक्तः - युक्तः
समाचरन् - कुर्वन्

अन्वयः
विद्वान् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत् । युक्तः समाचरन् सर्वकर्माणि जोषयेत् ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीय अध्याये षड्विंशतितमः श्लोकः। भगवान् श्रीकृष्णः विद्वान् कर्मसक्तानाम् बुद्धिभेदं न उत्पादयेत् | स्वयं सत्कर्माणि कुर्वन् कर्मासक्तान् अपि कारयेत् । इति अवदत् ।

व्याकरणम्

जनयेत् + अज्ञानाम् - जश्त्वसन्धिः

समासः

बुद्धेः भेदः - बुद्धि भेदः तम् षष्ठितत्पुरुषः
कर्माणि सङ्गः - कर्मसङ्गः - सप्तमि तत्पुरुषः
सर्वाणि कर्माणि - सर्वकर्माणि - कर्मधारयः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः |
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥३.२७॥

पदच्छेदः

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहङ्कारविमूढात्मा कर्ता अहम् इति मन्यते

पदपरिचयः

प्रकृतेः - इकार. स्त्री ष. एक
क्रियमाणानि - नकार. नपु प्र बहु

Downloaded from www.omkaravidya.com

गुणैः - अकार. पु तृ बहु
कर्माणि - नकार नपु प्र बहु
सर्वशः - अव्ययम्
अहङ्कारविमूढ़ात्मा - नकार पु प्र एक
कर्ता - ऋकार पु प्र एक
अहम् - दकार पु प्र एक
इति - अव्ययम्
मन्यते - लट् प्रपु एक

पदार्थः
प्रकृतेः - प्रकृतेः
क्रियमाणानि -क्रियमाणानि
गुणैः -सत्वरजस्तमोभिः गुणैः
कर्माणि -कर्माणि
सर्वशः - सर्वप्रकारैः
अहङ्कारविमूढात्मा - अहङ्कारवशात्मा
कर्ता -कारकः अहम् - अहम्
इति – इति मन्यते - चिन्तयति

अन्वयः
प्रकृतेः गुणैः सर्वशः क्रियमाणानि कर्माणि अहङ्कारविमूढ़ात्मा अहम् कर्ता इति मन्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये सप्तविंशतितमः श्लोकः। भगवान् श्रीकृष्णः प्रकृतेः गुणैः अनेकविधानि क्रियमाणानि कर्माणि अहङ्कारविमूढात्मा "अहमेव करोमि" इति मन्यते। इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
कर्ता + अहम् - सवर्णदीर्घसन्धिः

समासः
विमूढः - विगतः मूढः यस्मात् सः - बहुव्रीहिः
अहङ्कारविमूढः - अहङ्कारेण विमूढः तृतीयातत्पुरुषः
अहङ्कारविमूढः आत्मा यस्य सः - बहुव्रीहिः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥३.२८॥

पदच्छेदः
तत्त्ववित् तु महाबाहो गुणकर्मविभागयोः गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते

पदपरिचयः
तत्त्ववित् - दकार पु प्र एक
तु - अव्ययम्
महाबाहो - उकार पु सं प्र
गुणकर्मविभागयोः: - अकार पु ष द्वि
गुणाः - अकार पुप्र बहु

Downloaded from www.omkaravidya.com

गुणेषु - अकार पु स बहु
वर्तन्ते - वृत् धातु लट् प्रपु बहु
इति - अव्ययम्
मत्वा - अव्ययम्
न - अव्ययम्
सज्जते - लट् प्रपु एक

पदार्थः
तत्त्ववित् - ज्ञाता
तु-तु
महाबाहो - अर्जुन
गुणकर्मविभागयोः - इन्द्रियाणां क्रियाणां च विभागयोः
गुणाः - गुणाः
गुणेषु - विषयात्मकेषु
वर्तन्ते - विद्यन्ते
इति – इति
मत्वा - ज्ञात्वा
न-न
सज्जते - सक्तिं करोति

अन्वयः
हे महाबाहो! गुणकर्मविभागयोः तत्त्ववित् तु गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये अष्टाविंशतितमः श्लोकः। भगवान् श्रीकृष्णः हे महाबाहो ! गुणा : के तेषां क्रियाः काः इति ज्ञात्वा आत्मा तेभ्यः भिद्यते इति यः विजानाति सः तत्त्ववित् | गुणाः विषयात्मकेषु वर्तन्ते परन्तु आत्मा न इति ज्ञात्वा अभिमानं न करोति | इति अवदत् |

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
गुणाः + गुणेषु - विसर्गलोपः
वर्तन्ते + इति - यान्तावान्तदेशसन्धिः य लोपः

समासः
तत्त्वं वेत्ति इति तत्त्ववित् - उपपदसमासः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥ ३.२९॥

पदच्छेदः
प्रकृतेः गुणसम्मूढाः सज्जन्ते गुणकर्मसु तान् अकृत्स्नविदः मन्दान् कृत्स्नवित् न विचालयेत्

पदपरिचयः
प्रकृतेः - इकार. स्त्री ष एक
गुणसम्मूढाः - अकार पु प्र बहु
सज्जन्ते - लट् प्रषु बहु
गुणकर्मसु - नकार नपु. स बहु
तान् - दकार पु द्वि बहु
अकृत्स्नविदः - दकार पु द्वि बहु
मन्दान् - अकार पु द्वि बहु

Downloaded from www.omkaravidya.com

कृत्स्नवित् - दकार पु प्र एक
न - अव्ययम्
विचालयेत् - विधि प्रपु एक

पदार्थः
प्रकृतेः - मायायाः
गुणसम्मूढाः- गुणैः सम्मोहिताः
सज्जन्ते - अभिमानं कुर्वन्ति
गुणकर्मसु - गुणानां कर्मसु
तान् - तान्
अकृत्स्नविदः -कर्मसङ्गिनः
मन्दान् - मन्दप्रज्ञान्
कृत्स्नवित् - आत्मवित्
न-न
विचालयेत् - भ्रामयेत्

अन्वयः

प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते । अकृत्स्नविदः मन्दान् तान् कृत्स्नवित् न विचालयेत् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये नवविंशतितमः श्लोकः । भगवान् श्रीकृष्णः प्रकृतेः गुणैः सम्मोहिताः सन्तः गुणानां कर्मसु सक्ताः भवन्ति तथापि ज्ञानी सक्तान् तान् कदापि क्रियातः न विचालयेत् । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
प्रकृतेः + गुणसम्मूढ़ाः - विसर्गरेफः
कृस्त्नवित् + न - इमुडागमनसन्धिः

समासः
गुणानां कर्माणि - गुणकर्माणि - षष्ठीतत्पुरुषः
कृत्स्नं वेत्ति इति कृत्स्नविद् - उपपदसमासः
गुणसम्मूढः - गुणैः सम्मूढः - तृतीयातत्पुरुषः
अकृत्स्नविद् - न कृत्स्नविद् - नञ् तत्पुरुषः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३.३०॥

पदच्छेदः
मयि सर्वाणि कर्माणि सन्न्यस्य अध्यात्मचेतसा निराशीः निर्ममः भूत्वा युध्यस्व विगतज्वरः

पदपरिचयः
मयि - दकार. स एक
सर्वाणि - अकार नपु द्वि बहु
कर्माणि - नकार नपु द्वि बहु

Downloaded from www.omkaravidya.com

सन्नस्य - सन् + नि+ अस्+ल्यप्
अध्यात्मचेतसा - सकार नपु तृ एक
निराशी: - ईकार. स्त्री प्र एक
निर्ममः - अकार. पु प्र एक
भूत्वा - अव्ययम्
युध्यस्व - लोट् मपु एक
विगतज्वरः - अकार. पु प्र एक

पदार्थः
मयि - वासुदेवे
सर्वाणि - सकलानि
कर्माणि - कर्तव्यानि
सन्न्यस्य - निक्षिप्य
अध्यात्मचेतसा - विवेकबुद्धया
निराशी: - त्यक्ताशीः
निर्मम: - ममकाररहितः
भूत्वा - भूत्वा
युध्यस्व - युद्धम् कुरु
विगतज्वरः - विगतशोकः

अन्वयः
सर्वाणि कर्माणि मयि सन्न्यस्य अध्यात्मचेतसा निराशीः निर्ममः भूत्वा
विगतज्वरः युध्यस्व ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये त्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः त्वं मयि (वासुदेवे परमेश्वरे) सर्वाणि कर्माणि निक्षिप्य विवेकबुद्ध्या अहं कर्ता

Downloaded from www.omkaravidya.com

ईश्वरस्य भृत्यवत् करोमि इति भावेन त्यक्ताशीः निर्ममः विगतशोकः भूत्वा युद्धं कुरु । इति अवदत् ।

व्याकरणम्
सन्धिः
सन्न्यसय + अध्यात्मचेतसा - सवर्णदीर्घसन्धिः
निराशीः + निर्ममः - विसर्गरेफः
निर्ममः + भूत्वा - विसर्गउकारः

समासः
निर्गता आशीः यस्मात् सः – बहुव्रीहिः
निर्गतः जवरः यसमात् सः - बहुव्रीहिः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥३.३१॥

पदच्छेदः
ये मे मतम् इदम् नित्यम् अनुतिष्ठन्ति मानवाः श्रद्धावन्तः अनसूयन्तः मुच्यन्ते ते अपि
कर्मभिः

पदपरिचयः
ये - दकार.पु प्र बहु
मे - दकार. त्रिषु ष एक

Downloaded from www.omkaravidya.com

मतम् - अकार.नपु द्वि एक
इदम् - मकार. नपु द्वि एक
नित्यम् - अव्ययम्
अनुतिष्ठन्ति - अनु + स्था + लट् प्रपु एक
मानवाः - अकार. पु प्र बहु
श्रद्धावन्तः - तकार. पु प्र बहु
अनसूयन्तः - दकार.पु प्र बहु
मुच्यन्ते - मुच् लट् कर्मणि प्रपु बहु
ते - दकार.पु प्र बहु
अपि - अव्ययम्
कर्मभिः - नकार. नपु तृ बहु

पदार्थः
ये-ये
मे - मम
मतम् - उपदेशम्
इदम् - इदम्
नित्यम् - नित्यम्
अनुतिष्ठन्ति - अनुवर्तन्ते
मानवा: - नराः
श्रद्धावन्तः - श्रद्धावन्तः
अनसूयन्तः - अनुसूयन्तः
मुच्यन्ते – मुच्यन्ते
ते -ते
अपि – अपि
कर्मभिः - कर्मभिः

अन्वयः
ये मानवाः श्रद्धावन्तः अनसूयन्तः मे इदं मतं नित्यम् अनुतिष्ठन्ति ते अपि कर्मभिः मुच्यन्ते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये एकत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः ये मानवाः श्रद्धावन्तः अनसूयन्तः च मम उपदेशं नित्यम् अनुतिष्ठन्ति ते अपि पापपुण्यकर्मभिः मुच्यन्ते । इति अवदत् ।

व्याकरणम्
सन्धिः
श्रद्धावन्तः + अनुसूयन्तः - विसर्गउकारः पूर्वरूपसन्धिः
अनसूयन्तः + मुच्यन्ते - विसर्गउकारः
ते + अपि - पूर्वरूपसन्धिः

समासः
अनसूयन्तः - न असूयन्तः नञ् तत्पुरुषः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३.३२॥

पदच्छेदः
ये तु एतत् अभ्यसूयन्तः न अनुतिष्ठन्ति मे मतम् सर्वज्ञानविमूढान् तान् विद्धि नष्टान् अचेतसः

Downloaded from www.omkaravidya.com

पदपरिचयः

ये -दकार. पु प्र बहु

तु - अव्ययम्

एतत् - दकार. नपु द्वि बहु

अभ्यसूयन्तः - तकार. पु प्र बहु

न - अव्ययम्

अनुतिष्ठन्ति - अनु+ स्था + लट् प्रपु बहु

मे - दकार पु ष एक

मतम् - अकार. नपु द्वि एक

सर्वजानविमूढान् -अकार.पु द्वि बहु

तान् - दकार. पु द्वि बहु

विद्धि - लोट् मपु एक

नष्टान् - अकार. पु द्वि बहु

अचेतसः - सकार. पु द्वि बहु

पदार्थः

ये-ये

तु - परन्तु

एतत् - एतत्

अभ्यसूयन्तः - असूयाविष्टाः

न-न

अनुतिष्ठन्ति - अनुसरन्ति

मे - मम

मतम् - मतम्

सर्वज्ञानविमूढान् - अज्ञानमूढान्

तान् - तान्

विद्धि - जानीहि

नष्टान् - नष्टान्

अचेतसः - अविवेकिनः

Downloaded from www.omkaravidya.com

अन्वयः
ये तु अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति । (त्वं) सर्वज्ञानविमूढान् अचेतसः तान् नष्टान् विद्धि ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये द्वात्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "परन्तु ये अभ्यसूयन्तः मे मतं न अनुतिष्ठन्ति त्वं तान् सर्वज्ञानविमूढात्मान् अचेतसः च इति विद्धि " इति अवदत् ।

व्याकरणम्
सन्धिः
तु + एतत् - यण्सन्धिः
एतत् + अभ्यसूयन्तः - जश्त्वसन्धिः
अभ्यसूयन्तः + न - विसर्गउकारः
न + अनुतिष्ठन्ति - सवर्णदीर्घसन्धिः
सर्वज्ञानविमूढात्मान् + तान् - सत्वसन्धिः

समासः
अभ्यसूयन्तः प्रादिसमासः
सर्वज्ञानविमूढान् – बहुव्रीहिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३.३३॥

पदच्छेदः
सदृशं चेष्टते स्वस्याः प्रकृतेः ज्ञानवान् अपि प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति

पदपरिचयः
सदृशं - अव्ययम्
चेष्टते - चेष्ट् धातुः लट् प्रपु एक
स्वस्याः - आकार. स्त्री ष. एक
प्रकृतेः - इकार. स्त्री ष. एक
ज्ञानवान् - तकार. पु प्र एक
अपि - अव्ययम्
प्रकृतिं - इकार. स्त्री द्वि एक
यान्ति - लट् प्रपु बहु
भूतानि - अकार नपु प्र एक
निग्रहः - अकार पु प्र एक
किं - दकार नपु द्वि एक
करिष्यति - लुट् प्रपु बहु

पदार्थः
सदृशं - अनुरूपम्
चेष्टते - करोति

Downloaded from www.omkaravidya.com

स्वस्याः - स्वकीयायाः
प्रकृतेः - स्वभावस्य
ज्ञानवान् - विवेकी
अपि - अपि
प्रकृतिं - प्रकृतिं
यान्ति - उपगच्छन्ति
भूतानि - भूतानि
निग्रहः - निग्रहः

किं - किम्
करिष्यति - करिष्यति

अन्वयः
ज्ञानवान् अपि स्वस्याः प्रकृतेः सदृशं चेष्टते । भूतानि प्रकृतिं यान्ति । निग्रहः किं करिष्यति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये त्रयस्त्रिंशत्तमः श्लोकः। भगवान् श्री कृष्णः ज्ञानवानपि स्वस्याः पूर्वकृतधर्माधर्मादि संस्कारस्य फलेन चेष्टते ।भूतानि प्रकृतिं यान्ति । निग्रहः किं करिष्यति इति अवदत् ।

व्याकरणम्
सन्धिः
प्रकृतेः + ज्ञानवान् - विसर्गरेफः

Downloaded from www.omkaravidya.com

मूलश्लोकः

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३.३४॥

पदच्छेदः
इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तयोः न वशम् आगच्छेत् तौ हि अस्य परिपन्थिनौ

पदपरिचयः
इन्द्रियस्य - अकार. नपु ष. एक
इन्द्रियस्य - अकार. नपु ष. एक
अर्थे - अकार. पु स एक
रागद्वेषौ - अकार पु प्र द्वि
व्यवस्थितौ - अकार पु प्र द्वि
तयोः - दकार. पु ष. द्वि
न - अव्ययम्
वशम् - अकार पु द्वि एक
आगच्छेत् - विधि प्रपु एक
तौ - दकार पु प्र द्वि
हि - अव्ययम्
अस्य - मकार पु षः एक
परुपन्थिनौ - नकार पु प्र द्वि

पदार्थः
इन्द्रियस्य - इन्द्रियस्य

Downloaded from www.omkaravidya.com

इन्द्रियस्य - इन्द्रियस्य
अर्थे - शब्दादि विषये
रागद्वेषौ - आशा च द्वेषः च
व्यवस्थितौ - स्तः

| | |
|---|---|
| तयोः - रागद्वेषौ | न-न |
| वशम् - स्वाधीनम् | आगच्छेत् - आगच्छेत् |
| तौ - रागद्वेषौ | हि- हि |
| अस्य - अस्य | परिपन्थिनौ -विघ्नकर्तारौ |

अन्वयः
इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ । तयोः वशं न आगच्छेत् । तौ अस्य परिपन्थिनौ हि।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोध्याये चतुस्त्रिंशत्तमः श्लोकः। भगवान् श्री कृष्णः सर्वेन्द्रियाणाम् शब्दादिविषये इष्टविषये रागः आनिष्टविषये द्वेषः इति प्रतीन्द्रियार्थे रागाद्वेषयोः अवश्यम् भवतः । शासत्रार्थे यः प्रवृत्तः पूर्वमेव रागद्वेषयोः वशं न आगच्छेत् । एतौ रागद्वेषौ पुरुषस्य श्रेयमार्गे विघ्नकर्तारौ चोरौ च इति अवदत् ।

व्याकरणम्
सन्धिः
इन्द्रियस्य + इन्द्रियस्य - गुणसन्धिः
तयोः + न – विसर्गरेफः        हि + अस्य - यण्सन्धिः

समासः
रागः च द्वेषः च - रागद्वेषौ - द्वन्द्व समासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३.३५॥

पदच्छेदः
श्रेयान् स्वधर्मः विगुणः परधर्मात् स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मः भयावहः

पदपरिचयः
श्रेयान् - सकार पु. प्र एक
स्वधर्मः - अकार पु. प्र एक
विगुणः - अकार पु. प्र एक
परधर्मात् - अकार पु. प एक
स्वनुष्ठितात् - अकार पु. प एक
स्वधर्मे - अकार पु. स एक
निधनं - अकार नपु. प्र एक
श्रेयः - सकार नपु. प्र एक
परधर्मः - अकार पु. प्र एक
भयावहः - अकार पु. प्र एक

पदार्थः
श्रेयान् - प्रशस्यतरः
स्वधर्मः - स्वधर्मः
विगुणः -गुणरहितः

Downloaded from www.omkaravidya.com

परधर्मात् - अन्यधर्मात्
स्वनुष्ठितात् - स्वनुष्ठितात्
स्वधर्मे - स्वस्यधर्मे
निधनं - नाशम्
श्रेयः - श्रेयः
परधर्मः - अन्यधर्मः
भयावहः - भयजातः

अन्वयः
स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान् | स्वधर्मे निधनं श्रेयः | परधर्मः भयावहः |

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये पञ्चत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "स्वनुष्ठितात् अन्यधर्मात् गुणरहितस्वधर्मः श्रेयान् | स्वधर्मे स्थितस्य मरणमपि श्रेयः ।अन्यधर्मः अनर्तजातः।" इति अवदत् |

व्याकरणम्
सन्धिः
स्वधर्मः + विगुणः - विसर्गउकारः
परधर्मः + भयावहः- विसर्गउकारः

समासः
स्वस्य धर्मः - स्वधर्मः - षष्ठितत्पुरुषः
परस्य धर्मः - परधर्मः - षष्ठितत्पुरुषः
भयस्य आवहः - भयावहः षष्ठितत्पुरुषः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

अर्जुन उवाच
अथ केनप्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥36॥

पदच्छेदः
अर्जुन उवाच अथ केन प्रयुक्तः अयं पापं चरति पूरुषः अनिच्छन् अपि वार्ष्णेय बलात् इव नियोजितः

पदपरिचयः
अर्जुनः - अकार. पु प्र एक
उवाच - लिट् प्रपु एक
अथ - अव्ययम्
केन - मकार नपु तृ एक
प्रयुक्तः - अकार. पु प्र एक
अयं - मकार. पु प्र एक
पापम् - अकार. नपु द्वि एक
चरति - लट् प्रपु एक
पूरुषः - अकार. पु प्र एक
अनिच्छन् - तकार. पु प्र एक
अपि - अव्ययम्
वार्ष्णेय - अकार. पु सं प्र एक
बलात् - अकार. नपु प एक
इव - अव्ययम्
नियोजितः - अकार. पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः

अर्जुनः - कुन्त्याः पुत्रः

उवाच- अवदत्

अथ - अथ

केन - केन

प्रयुक्तः - प्रेरितः

अयम् - अयम्

पापं - पापम्

चरति - करोति

पूरुषः - पुरुषः

अनिच्छन् - अनभिलषन्

अपि - अपि

वार्ष्णेय - वृष्णिकुलप्रसूत

बलात् - बलात्

इव – इव

नियोजितः - प्रवर्तितः

अन्वयः

अर्जुन उवाच

हे वार्ष्णेय! अथ अयं पूरुषः अनिच्छन् अपि बलात् नियोजितः इव केन प्रयुक्तः पापं चरति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये षट्त्रिंशत्तमः श्लोकः। अस्मिन् श्लोके अर्जुनः भगवान् कृष्णं प्रति एवम् अवदत् । अथ पुरुषः केन हेतुभूतेन प्रयुक्तः सन् राज्ञा इव भृत्यः अयं पापं कर्म आचरति । हे वृष्णिकुलप्रसूत ! स्वयम् अनिच्छन् अपि बलात् इव नियोजितः ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

अर्जुनः + उवाच - विसर्ग लोपः

प्रयुक्तः + अयम् - विसर्ग उकारः

बलात् + इव - जश्त्वसन्धिः

अनिच्छन् + अपि – ङमुडागमनसन्धिः

समासः

अनिच्छन् – न इच्छन् – नञ्तत्पुरुषः

तद्धितान्तः

वार्ष्णेयः - वृष्णेः गोत्रापत्यम् पुमान्

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

श्री भगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भवः ।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३.३७॥

पदच्छेदः

कामः एषः क्रोधः एषः रजोगुणसमुद्भवः महाशनः महापाप्मा विद्धि एनम् इह वैरिणम्

Downloaded from www.omkaravidya.com

पदपरिचयः

कामः - अकार पु प्र एक

एषः - दकार पु प्र एक

क्रोधः - अकार पु प्र एक

एषः - दकार पु प्र एक

रजोगुणसमुद्भवः - अकार पु प्र एक

महाशनः - अकार पु प्र एक

महापाप्मा - नकार पु प्र एक

विद्धि - विद् धातुः लोट् मपु एक

एनम् - मकार पु द्वि एक

इह - अव्ययम्

वैरिणम् - नकार पु दवि एक

पदार्थः

कामः - अभिलाषः

एषः - अयम्

क्रोधः - कोपः

एषः - अयम्

रजोगुणसमुद्भवः - रजोगुणात् जातः

महाशनः - महान् अशनः

महापाप्मा - महापाप्मा

विद्धि - जानीहि

एनम् - एनम्

इह - इह

वैरिणम् - शत्रुम्

अन्वयः

एषः कामः एषः क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा च (अस्ति) । (तेन) इह एनं वैरिणम् विद्धि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये सप्तत्रिंशत्तमः श्लोकः। भगवान् श्री कृष्णः एषः कामः सर्वलोकशत्रुः । एषः कामः केनचित् कारणेन क्रोधत्वेन परिणमति | कामः रजोगुणसमुद्भवः । कामः रजः प्रवर्तयन् पुरुषं प्रवर्तयति | कामः महाशनः अतः एषः महापाप्मा | अतः एनं कामम् इह संसारे वैरिणम् इति जानीहि | एवम् अवदत् |

व्याकरणम्

सन्धिः

कामः + एषः - विसर्गलोपः

एषः + क्रोधः - विसर्गलोपः

क्रोधः + एषः - विसर्गलोपः

एषः +रजोगुणसमुद्भवः - विसर्गलोपः

महाशनः + महापाप्मा - विसर्गउकारः

विद्धि + एनम् - यण्सन्धिः

समासः

रजः इति गुणः - रजोगुणः संभावनापूर्वपदकर्मधारयः

रजोगुणात् समुद्भवः - पञ्चमीतत्पुरुषः

महाशनः - महत् अशनम् यस्य सः - समानाधिकरणबहुव्रीहिः

महापाप्मा – महान् पाप्मा यस्य सः - समानाधिकरणबहुव्रीहिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३.३८॥

पदच्छेदः
धूमेन आव्रियते वह्निः यथा आदर्शः मलेन च यथा उल्बेन आवृतः गर्भः तथा तेन इदम् आवृतम्

पदपरिचयः
धूमेन - अकार.पु तृ एक
आव्रियते - लट् प्रपु एक
वह्निः - इकार. पु प्र एक
यथा - अव्ययम्
आदर्शः - अकार. पु प्र एक
मलेन - अकार. पु तृ एक
च - अव्ययम्
यथा - अव्ययम्
उल्बेन - अकार. नपु तृ एक
आवृत्तः - आ+ वृ+ क्त गर्भः - अकार. पु प्र एक
तथा - अव्ययम्
तेन - दकार. पु तृ एक
इदम् - मकार. नपु प्र एक
आवृतम् - अकार. नपु प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

धूमेन - धूमेन
आव्रियते - आव्रियते
वह्निः - अग्निः
यथा - यथा
आदर्शः - दर्पणः
मलेन - अशुद्धेन
च-च
यथा -यथा
उल्बेन - उल्बेन
आवृतः - आच्छादितः
गर्भः - गर्भः
तथा - तथा
तेन - आशया
इदम् - इदम्
आवृतम् - आवृतम्

अन्वयः
यथा वह्निः धूमेन आव्रियते आदर्शः मलेन (आव्रियते) यथा गर्भः उल्बेन आवृतः च तथा इदम् तेन (आशया) आवृतम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये अष्टात्रिंशत्तमः श्लोकः। यथा प्रकाशात्मकः वह्निः सहजेन धूमेन अप्रकाशात्मकेन आव्रियते यथा दर्पणः मलेन आव्रियते यथा उल्बेन गर्भ आव्रियते तथा कामेन इदम् ज्ञानम् आवृतम् इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः

धूमेन + आगव्रियते - सवर्णदीर्घसन्धिः
वह्निः + यथा - विसर्गरेफः
यथा + आदर्शः - सवर्णदीर्घसन्धिः
आदर्शः + मलेन - विसर्गउकारः
यथा + उल्बेन - गुणसन्धिः
आवृतः + गर्भः - विसर्गउकारः
गर्भः + तथा - विसर्गसकारः
तेन + इदम - गुणसन्धिः

कृदन्ताः
आवृतः - आ +वृ धातुः + क्त प्रत्ययः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरुपेण कौन्तेय दुष्पुरेणानलेन च ॥ ३.३९॥

पदच्छेदः
आवृतं ज्ञानम् एतेन ज्ञानिनः नित्यवैरिणा कामरुपेण कौन्तेय दुष्पुरेण अनलेन च

Downloaded from www.omkaravidya.com

पदपरिचयः

आवृतं - अकार नपु प्र एक

ज्ञानम् - अकार नपु प्र एक

एतेन - दकार नपु तृ एक

ज्ञानिनः - नकार पु ष एक

नित्यवैरिणा - नकार पु तृ एक

कामरुपेण - अकार पु तृ एक

कौन्तेय - अकार पु. सं प्र

दुष्पुरेण - अकार पु तृ एक

अनलेन -अकार पु तृ एक

च - अव्ययम्

पदार्थः

आवृतं - आच्छादितम्

ज्ञानम् - आत्मज्ञानम्

एतेन - एतेन

ज्ञानिनः - सर्वज्ञस्य

नित्यवैरिणा - नित्यरिपुणा

कामरुपेण - आशा स्वरूपेण

कौन्तेय - अर्जुन

दुष्पुरेण - अपूर्णेन

अनलेन - अग्निना

च-च

अन्वयः

हे कौन्तेय! ज्ञानिनः नित्यवैरिणा दुष्पुरेण अनलेन कामरुपेण च एतेन जानम् आवृतम् ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये नवत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः हे कौन्तेय ! एतेन कामेन विवेकः आवृतः। विवेकिनः आशा शत्रुः । मूर्खः तृष्णाकाले कामं मित्रमिव पश्यन् तत् कार्येण दुःखे प्राप्ते सति "अहं तृष्णयाः कष्टम् अनुभवामि" इति जानाति | कामः अनेकरुपात्मकं भवति | कामाग्निः विषयान् पूरयितुं अशक्यः | कामः ज्ञानम् आवृत्य वर्तते अतः कामः एव अनलः | एवम् अवदत् |

व्याकरणम्

सन्धिः

ज्ञानिनः + नित्यवैरिणा - विसर्गउकारः

दुष्पुरेण +अनलेन - सवर्णदीर्घसन्धिः

समासः

अनलः - न अलं इति वर्तते - नञ्तत्पुरुषः

नित्यवैरिणः - नित्यं च असौ वैरिणः च – कर्मधारयः

कामरूपः - कामं रूपं यस्य सः - बहुव्रीहिः

दुष्पूरः - दुराचारेण पूरः - प्रादि समासः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोगः

मूलश्लोकः

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते |
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥३.४०॥

Downloaded from www.omkaravidya.com

पदच्छेदः
इन्द्रियाणि मनः बुद्धिः अस्य अधिष्ठानम् उच्यते एतैः विमोहयति एषः ज्ञानम् आवृत्य देहिनम्

पदपरिचयः
इन्द्रियाणि - अकार. नपु प्र बहु
मनः - सकार. नपु प्र एक
बुद्धिः इकार स्त्री प्र एक
अस्य - मकार. पु ष एक
अधिष्ठानम् - अकार. नपु प्र एक
उच्यते - वच् धातुः लट् प्रपु एक
एतैः - दकार नपु तृ बहु
विमोहयति - लट् प्रपु एक
एषः - दकार पु प्र एक
ज्ञानम् - अकार नपु द्वि एक
आवृत्य - ल्यबन्तम्
देहिनम् - नकार पु द्वि एक

पदार्थः
इन्द्रियाणि - इन्द्रियाणि
मनः - अन्तःकरणम्
बुद्धिः - धीः
अस्य - कामस्य
अधिष्ठानम् - आश्रय
उच्यते - कथ्यते
एतैः - एभिः
विमोहयति - विमोहयति
एषः - अयम्

Downloaded from www.omkaravidya.com

ज्ञानम् - आत्मज्ञानम्
आवृत्य - आच्छाद्य
देहिनम् - शरीरम्

अन्वयः
इन्द्रियाणि मनः बुद्धिः अस्य अधिष्ठानम् उच्यते ।एषः एतेः ज्ञानम् आवृत्य देहिनम् विमोहयति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये चत्वारिंशत्तमः श्लोकः। भगवान् श्री कृष्णः इन्द्रियाणि मनः बुद्धि च कामस्य अधिष्ठानम् इति उच्यते । एषः कामः एतेः ज्ञानम् आच्छाद्य शरीरिणम् एतेः इन्द्रियादिभिः आश्रयैः विमोहयति । इति अवदत् ।

व्याकरणम्
सन्धिः
मनः + बुद्धिः - विसर्गउकारः
बुद्धिः + अस्य - विसर्गरेफः
अस्य + अधिष्ठानम् - सवर्णदीर्घसन्धिः
विमोहयति + एषः - यण् सन्धि
एषः + ज्ञानम् - विसर्गलोपः

कृदन्ता
आवृत्य - आ + वृ + ल्यप्
विमोहयति - वि + मुह् धातुः + णिच् + शप् +तिङ्

Downloaded from www.omkaravidya.com

मूलश्लोकः

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ३.४१॥

पदच्छेदः
तस्मात् त्वम् इन्द्रियाणि आदौ नियम्य भरतर्षभ पाप्मानं प्रजहि हि एनम् ज्ञानविज्ञाननाशनम्

पदपरिचयः
तस्मात् - दकार पु प एक
त्वम् - दकार त्रिषु प्र एक
इन्द्रियाणि - अकार नपु द्वि बहु
आदौ - इकार पु स एक
नियम्य - ल्यबन्तम्
भरतर्षभ - अकार पु सं प्र एक
पाप्मानं - नकार पु द्वि एक
प्रजहि - लोट् मपु एक
हि - अव्ययम्
एनम् - दकार पु द्वि एक
ज्ञानविज्ञाननाशनम् - अकार नपु द्वि एक

पदार्थः
तस्मात् - तस्मात्
त्वम् - त्वम्
इन्द्रियाणि - इन्द्रियाणि

Downloaded from www.omkaravidya.com

आदौ - पूर्वम्
नियम्य - वशीकृत्य
भरतर्षभ - भरतकुल श्रेष्ठ
पाप्मानं - पापाचारम्
प्रजहि - परित्यज
हि-हि
एनम् - इमम्
ज्ञानविज्ञाननाशनम् - ज्ञानविज्ञाननाशनम्

अन्वयः
हे भरतर्षभ! तस्मात् त्वम् आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनम् पाप्मानं एनं प्रजहि हि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां तृतीयोऽध्याये एकचत्वारिंशत्तमः श्लोकः। भगवान् श्री कृष्णः हे भरतर्षभ ! तस्मात् त्वं प्रथमम् इन्द्रियाणि वशीकृत्य एनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनम् पापाचारं कामं परित्यज | ज्ञानं शास्त्रतः आचार्यतः च आत्मादीनाम् अवबोधः | विज्ञानं विशेषतः तदनुभवः । एवम् अवदत् ।

व्याकरणम्
सन्धिः
इन्द्रियाणि + आदौ - यण्सन्धिः
हि + एनम् - यण्सन्धिः

समासः
ज्ञानं च विज्ञानं च - इतरेतरद्वन्द्वसमासः
ज्ञानविज्ञानयोः नाशनम् - तत् षष्ठी तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्य परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धे परतस्तु सः॥३.४२॥

एवं बुद्धेः परं बुद्धा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥३.४३॥

पदच्छेदः
इन्द्रियाणि पराणि आहुः इन्द्रियेभ्यः परं मनः मनसः तु परा बुद्धि यः बुद्धेः परतः तु सः एवं बुद्धेः परं बुद्धा संस्तभ्य आत्मानम् आत्मना जहि शत्रुं महाबाहो कामरूपं दुरासदम्

पदपरिचयः
इन्द्रियाणि - अकार नपु द्वि बहु
पराणि - अकार नपु द्वि बहु
आहुः - लट् प्र पु बहु
इन्द्रियेभ्यः अकार पु प बहु
परं - अकार पु प्र एक
मनः - सकार नपु प्र एक
मनसः: - सकार नपु प एक
तु - अव्ययम्
परा -आकार स्त्री प्र एक
बुद्धिः - इकार स्त्री प्र एक
यः - दकार पु प्र एक
बुद्धेः - इकार स्त्री प एक

Downloaded from www.omkaravidya.com

परतः - अव्ययम्
तु - अव्ययम्
सः - दकार पु. प्र एक
एवं -अव्ययम्
बुद्धेः - इकार स्त्री प एक
परं - अकार नपु द्वि एक
बुद्ध्वा - अव्ययम्
संस्तभ्य - ल्यबन्तम्
आत्मानम् -नकार पु द्वि एक
आत्मना - नकार पु तृ एक
जहि - लोट् मपु एक
शत्रुं - उकार पु द्वि एक
महाबाहो - उकार पु सं प्र
कामरूपं - अकार पु द्वि एक
दुरासदम् - अकार पु द्वि एक

पदार्थः
इन्द्रियाणि - इन्द्रियाणि
पराणि - श्रेष्ठानि
आहुः - वदन्ति
इन्द्रियेभ्यः - इन्द्रियेभ्यः
परं - श्रेष्ठम्
मनः - अन्तःकरणम्
मनसः - अन्तःकरणात्
परा - श्रेष्ठा
बुद्धिः - धीः
यः- यः
बुद्धेः - धियः

Downloaded from www.omkaravidya.com

परतः - उत्कृष्टः
सः - आत्मा
एवं - इत्थम्
बुद्धेः – बुद्धेः
परं - उत्कृष्टम्
बुद्ध्वा - ज्ञात्वा
संस्तभ्य - सम्यक् स्तम्भनं कृत्वा
आत्मानम् - आत्मानम्
आत्मना - संस्कृतेन मनसा
जहि - नाशय
शत्रुं - रिपुम्
महाबाहो - अर्जुन
कामरूपं - कामस्वरूपम्
दुरासदम् - दुर्विज्ञानैकविशेषम्

अन्वयः
इन्द्रियाणि पराणि इन्द्रियेभ्यः मनः परं मनसः तु बुद्धिः परा आहुः। यः तु बुद्धेः परतः सः । हे महाबाहो एवं बुद्धेः  परं आत्मानं बुद्ध्वा आत्मना संस्तभ्य दुरासदम् कामरूपं शत्रुं जहि ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां तृतीये अध्याये द्वाचत्वारिंशत्तमः त्रयस्चत्वारिंशत्तमः च श्लोकौ | भगवान् श्रीकृष्णः पण्डिताः इन्द्रियाणि पराणि इन्द्रियेभ्यः मनः श्रेष्ठम् | मनसः बुद्धि श्रेष्ठा इति वदन्ति । यः बुद्धेः परतः तत् आत्मतत्वम् | एवम् बुद्धेः श्रेष्ठम् आत्मानं बुद्ध्वा निश्चयबुद्ध्या आत्मानं सम्यक् स्तम्भनं कृत्वा दुर्विज्ञानैकविशेषं कामरूपं शत्रु जहि । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

सन्धिः

पराणि + आहुः - यण्सन्धिः

आहुः + इन्द्रियेभ्यः - विसर्गरेफः

मनसः + तु - विसर्गसकारः

बुद्धिः + यः - विसर्गरेफः

परतः + तु - विसर्ग सकारः

संस्तभ्य + आत्मानम् - सवर्णदीर्घसन्धिः

समासा:

महाबहु: महान् माहु: यस्य स: - बहुव्रीहि:

दुरासदम् – दुराचारं आसदं – प्रादि समासः

श्रीमद्भगवद्गीता - तृतीयोऽध्यायः - कर्मयोग:

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मयोग: नाम तृतीय: अध्यायः

Downloaded from www.omkaravidya.com

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. प्र एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री ष बहु
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - - अकार. पु. स. एक
कर्मयोगः अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
तृतीयः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्मपाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
कर्मयोगः -कर्मयोगः
नाम - नाम
तृतीयः - तृतीयः

Downloaded from www.omkaravidya.com

अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे
कर्मयोगः नामः तृतीयः अध्यायः (संपूर्णम् भवति) ।

तात्पर्यम्
तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे
कर्मयोगः नामः तृतीयः अध्यायः संपूर्णम् भवति ।

व्याकरणम्
सन्धिः
सदिति - सत् + इति - जश्त्वसन्धिः
श्रीमद्गगवद्गीतासूपनिषत्सु - श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगो नाम - योगः + नामः - विसर्गउकारः
तृतीयोऽध्यायः - तृतीयः + अध्यायः - विसर्ग उकारः गुणसन्धिः पूर्वरूपसन्धिः

समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या कर्मधारयः

कृदन्तः
ॐ - अव् + मन् प्रत्ययः
उपनिषत् - उप + नि + षद्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता तृतीयोऽध्यायः संक्षेपः

अर्जुन् उवाच

हे जनार्दन! यदि कर्मणः साकाशात् ज्ञानं श्रेयसी तव मता चेत् तर्हि हे केशव! किं कारणेन प्राणिहिंसकरं घोरे कर्मणि माम् नियोजयसि ? यद्यपि विविक्ताभिधायी भगवान् तथापि मम मन्दबुद्धेः व्यामिश्रम् इव प्रतिभाति । तेन कारणेन मम बुद्धिं मोहयसि इव । त्वं येन मार्गेण अहं मोक्षम् आप्नुयां तदेकम् एव निश्चित्य वद ।

श्री भगवान् उवाच -

हे पापरहित! साङ्ख्यानां कृते ज्ञानमार्गः योगिनां कृते कर्ममार्गः च इति द्विविधः मार्गः मया प्राग् एव प्रोक्ता । पुरुषः कर्मणाम् अनारम्भात् ज्ञानं न प्राप्नोति । कर्मत्यागेन मोक्षं न प्राप्नोति । नरः सर्वदा कार्यं करोति क्षणमपि अकर्मकृत् इव न तिष्ठति । सर्वः प्रकृतिजैः गुणैः अवशः कर्म कार्यते । यः हस्तादीनि इन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा चिन्तयन् आस्ते सः विमूढात्मा मिथ्याचारः पापाचारः च इति उच्यते । हे अर्जुन! यः इन्द्रियाणि विवेकबुद्ध्या नियम्य कर्मेन्द्रियैः कर्मयोगम् असक्तः आरम्भं करोति सः श्रेष्ठः भवति । त्वम् नित्यं कर्म कुरु । कर्म हि अकर्मणः ज्यायः । अकर्मणः ते शरीरयात्रा अपि न च प्रसिद्ध्येत् ।

"यज्ञो वै विष्णुः" एवं तैत्तिरीय संहिते अस्ति । अतः यत् यज्ञार्थं कर्म क्रियते तत् कर्म श्रेष्ठः । अयं लोके अन्यैः कर्मभिः जनाः कर्मबन्धनाः भवन्ति । अत्र न ज्ञानार्थम् । हे कौन्तेय! अतः कर्मफलसङ्गवर्जितः सन् यज्ञार्थं कर्म समाचर । पुरा ब्रह्मा यज्ञसहिताः प्रजाः उत्पाद्य यज्ञेन वृद्धिः तां कुरुध्वम् इति उक्तवान् । एषः यज्ञः युष्माकम् इष्टान् कामान् ददाति । इन्द्रादीन् देवान् अनेन यज्ञेन वर्धत्वम् । ते देवाः युष्मान् वृष्ट्यादीन् द्वारा वर्धन्ताम् । एवं परस्परं भावयन्तः

Downloaded from www.omkaravidya.com

परं श्रेयः। यज्ञभाविताः देवाः युष्मभ्यं स्त्री पशु पुत्रः इत्यादीन् दास्यन्ते। तैः देवैः दत्तान् भोगान् एभ्यः देवेभ्यः अदत्वा यः भुङ्क्ते सः चोरः एव।

देवयज्ञादीन् निर्वर्तय तच्छिष्टं अमृतं खादितुं यजश्रेष्ठाः सन्तः सर्वकिल्बिषैः (पञ्च सूनाः) मुच्यन्ते। पञ्चसूनाः च स्मृतौ उक्ताः

कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी।
पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति॥

ये आत्मकारणात् पाकं कुर्वन्ति ते पापाः भवन्ति। ते अघम् एव भुञ्जते।

सर्वाणि शरीराणि अन्नात् भवन्ति। अन्नं पर्जन्यात् भवति । वृष्टेःअन्नस्य सम्भवः भवति। अस्मात् यज्ञात् पर्जन्यः भवति। यज्ञः अपूर्वम्। यज्ञः कर्मसमुद्भवः। कर्मोत्पन्नकारणं वेदः इति जानीहि। अयं वेदरूप ब्रह्म अक्षरात् समुद्भवः। तस्मात् ब्रह्म सर्वगतम्। वेदः नित्यं यज्ञे प्रतिष्ठितम् । हे पार्थ ! एवम् ईश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितं यः न अनुवर्तयति सः पापजीवनः सः इन्द्रियेषु सदा रमति। सः वृथा जीवति इति जानीहि ।

यः आत्मनि एव रतिः सः आत्मरतिः। यः आत्मना एव तृप्तः सः आत्मतृप्तः। यः आत्मनि एव सन्तुष्टः सः आत्मसन्तुष्टः। यः आत्मरतिः आत्मतृप्तः आत्मसन्तुष्टः च भवति तस्य करणीयं कार्यम् नास्ति। आत्मतृप्तस्य इह लोके कृतेन प्रयोजनं नास्ति । कार्यम् अकृतेन अपि कश्चन दोषः नास्ति । अस्य सर्वभूतेषु किमपि प्रयोजनम् नास्ति। तस्मात् त्वम् सङ्गवर्जितः सर्वदा कर्तव्यं कार्यं समाचर । यतः चेत् सङ्गवर्जितः ईश्वरार्थं कर्म आचरन् सत्वशुद्धिद्वारेण मोक्षं प्राप्नोति।

पूर्वं जनकः अश्वपतिः आदयः कर्मद्वारा चित्तशुद्धिं प्राप्य ज्ञानेन मोक्षं प्राप्तवन्तः । त्वं लोकसङ्ग्रहं चिन्तयित्वा कर्म कर्तुमर्हसि । श्रेष्ठः यत् यत् कर्म

Downloaded from www.omkaravidya.com

आचरति तत् तत् एव इतरः जनः आचरति । सः श्रेष्ठः लौकिकं वैदिकं वा यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते | अन्य जनाः तदेव प्रमाणी कुर्वन्ति |

हे पार्थ मह्यं त्रिषु लोकेषु किञ्चन कर्तव्यं नास्ति | मम अप्राप्तं प्रापणीयम् च नास्ति | तथापि अहं कर्मणि वर्ते एव । हे पार्थ! यदि कदाचित् कर्मणि अनलसः न भवेयम् चेत् तर्हि सर्वे मनुष्याः मम श्रेष्टकर्मयोगम् अनुवर्तन्ते | अहं कर्म न कुर्यां चेत् इमे सर्वे लोकाः विनश्येयुः | किञ्च अहं सङ्करस्य कर्ता स्याम् | तेन कारणेन प्रजानाम् अनुग्रहाय प्रवृत्तः तद् उपहितम् उपहननं कुर्याम् इत्यर्थः । मम ईश्वरस्य अनुरुपम् आपद्येत | हे भारत! आत्मज्ञानरहिताः कर्मफलेषु इच्छवः यथा कार्यं कुर्वन्ति तथा विद्वान् फलेषु इच्छां विना लोकोद्धाराय कार्यं कुर्यात् | विद्वान् कर्मसक्तानां बुद्धिभेदः न उत्पादयेत् | स्वयं सत्कर्माणि कुर्वन् कर्मासक्तान् अपि कारयेत् |

प्रकृतेः गुणैः अनेकविधानि क्रियमाणानि कर्माणि अहङ्कारविमूढात्मा "अहमेव करोमि" इति मन्यते। हे महाबाहो ! गुणाः के तेषां क्रियाः काः इति ज्ञात्वा आत्मा तेभ्यः भिद्यते इति यः विजानाति सः तत्त्ववित् | गुणाः विषयात्मकेषु वर्तन्ते परन्तु आत्मा न इति ज्ञात्वा अभिमानं न करोति । प्रकृतेः गुणैः सम्मोहिताः सन्तः गुणानां कर्मसु सक्ताः भवन्ति तथापि ज्ञानी सक्तान् तान् कदापि क्रियातः न विचालयेत् |

त्वं मयि (वासुदेवे, परमेश्वरे) सर्वाणि कर्माणि निक्षिप्य विवेकबुद्धया अहं कर्ता ईश्वरस्य भृत्यवत् करोमि इति भावेन त्यक्ताशीः निर्ममः विगतशोकः भूत्वा युद्धं कुरु | ये मानवाः श्रद्धावन्तः अनसूयन्तः च मम उपदेशं नित्यम् अनुतिष्ठन्ति ते अपि पापपुण्यकर्मभिः मुच्यन्ते | परन्तु ये अभ्यसूयन्तः मे मतं न अनुतिष्ठन्ति त्वं तान् सर्वज्ञानविमूढात्मान् अचेतसः च इति विद्धि | ज्ञानवानपि स्वस्याः पूर्वकृतधर्माधर्मादि संस्कारस्य फलेन चेष्टते । भूतानि प्रकृतिं यान्ति । निग्रहः किं करिष्यति । सर्वेन्द्रियाणाम् शब्दादिविषये इष्ट विषये रागः अनिष्ट विषये द्वेषः इति प्रतीन्त्रियार्थे रागाद्वेषयोः अवश्यं भवतः | शास्त्रार्थे यः प्रवृत्तः पूर्वमेव

Downloaded from www.omkaravidya.com

रागद्वेषयोः वशं न अगच्छेत् | एतौ रागद्वेषौ पुरुषस्य श्रेयमार्गे विघ्नकर्तारौ चोरौ इव | स्वनुष्ठितात् अन्यधर्मात् गुणरहितस्वधर्मः श्रेयान् | स्वधर्मे स्थितस्य मरणमपि श्रेयः। अन्यधर्मः अनर्तजातः |

अर्जुनः अवदत् |

हे वृष्णिकुलप्रसूत! अथ पुरुषः केन हेतुभूतेन प्रयुक्तः सन् राज्ञा इव भृत्यः अयं पापं कर्म आचरति । स्वयम् अनिच्छन् अपि बलात् इव नियोजितः ।

श्री भगवान् उवाच -

एषः कामः सर्वलोकशत्रु | एषः कामः केनचित् कारणेन क्रोधत्वेन परिणमति | कामः रजोगुणसमुद्भवः | कामः रजः प्रवर्तयन् पुरुषं प्रवर्तयति | कामः महाशनः अतः एषः महापाप्मा | अतः एनं कामम् इह संसारे वैरिणं इति जानीहि | यथा प्रकाशात्मकः वह्निः सहजेन धूमेन अप्रकाशात्मकेन आव्रियते यथा दर्पणः मलेन आव्रियते यथा उल्बेन गर्भः आव्रियते तथा कामेन इदं ज्ञानम् आवृतम् । हे कौन्तेय! एतेन कामेन विवेकः आवृतः। विवेकिनः आशा शत्रुः । मूर्खः तृष्णाकाले कामं मित्रमिव पश्यन् तत् कार्येण दुःखे प्राप्ते सति "अहं तृष्णयाः कष्टम् अनुभवामि" इति जानाति | कामः अनेकरूपात्मकं भवति ।कामाग्निः विषयान् पूरयितुं अशक्यः | कामः ज्ञानम् आवृत्य वर्तते अतः कामः एव अनलः |

इन्द्रियाणि मनः बुद्धिः च कामस्य अधिष्ठानम् इति उच्यते | एषः कामः एतैः ज्ञानम् आच्छाद्य शरीरिणम् एतैः इन्द्रियादिभिः आश्रयैः विमोहयति | हे भरतर्षभ ! तस्मात् त्वं प्रथमम् इन्द्रियाणि वशीकृत्य एनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं पापाचारं कामं परित्यज | ज्ञानं शास्त्रतः आचार्यतः च आत्मादीनाम् अवबोधः । विज्ञानं विशेषतः तदनुभवः | पण्डिताः इन्द्रियाणि पराणि इन्द्रियेभ्यः मनः श्रेष्ठम् | मनसः तु बुद्धिः श्रेष्ठा इति वदन्ति | यः बुद्धे परतः तत् आत्मतत्वम् | एवं

Downloaded from www.omkaravidya.com

बुद्धेः श्रेष्ठम् आत्मानं बुद्ध्वा निश्चय बुद्ध्या आत्मानं सम्यक् स्तम्भनं कृत्वा दुर्विज्ञानैकविशेषम् कामरूपं शत्रुं जहि ।

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोग नामः तृतीयः अध्यायः सपूर्णं भवति ॥

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# चतुर्थोऽध्यायः
# ज्ञानकर्मसंन्यासयोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - चतुर्थोऽध्यायः -  ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

श्री भगवानुवाच

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥४.१॥

पदच्छेदः
इमं विवस्वते योगं प्रोक्तवान् अहम् अव्ययम् विवस्वान् मनवे प्राह मनुः इक्ष्वाकवे अब्रवीत्

पदपरिचयः
इमं - मकार पु प्र एक
विवस्वते - तकार पु च एक
योगं - अकार पु द्वि एक
प्रोक्तवान् - तकार. पु प्र एक
अहम् - दकार पु प्र एक
अव्ययम् - अकार पु द्वि एक
विवस्वान् - तकार पु. प्र एक
मनवे - उकार पु च एक
प्राह - लट् प्रपु एक
मनुः - उकार पु प्र एक
इक्ष्वाकवे - उकार पु च एक
अब्रवीत् - ब्रू लङ् प्रपु एक

पदार्थः

Downloaded from www.omkaravidya.com

इमं - इमम्
विवस्वते - सूर्याय
योगं - योगम्
प्रोक्तवान् - अवदम्
अहम् - अहम्
अव्ययम् - अव्ययम्
विवस्वान् - सूर्यः
मनवे - वैवस्वताय
प्राह - वदति मनुः -वैवस्वतः
इक्ष्वाकवे - इक्ष्वाकवे
अब्रवीत् - अवदत्

अन्वयः
इमं अव्ययम् योगं अहम् (पुरा) विवस्वते प्रोक्तवान् । विवस्वान् मनवे प्राह । मनुः इक्ष्वाकवे अब्रवीत् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये प्रथमः श्लोकः। भगवान् श्रीकृष्णः इमम् अव्ययम् योगं अहम् पूर्वं सूर्याय उक्तवान् । ततः सूर्यः स्वस्य कुमाराय वैवस्वताय उक्तवान् । वैवस्वतः अपि स्वस्य कुमाराय इक्ष्वाकवे अब्रवीत् । इति अवदत् ।

व्याकरणम्
सन्धिः
मनुः + इक्ष्वाकवे - विसर्गरेफः
इक्ष्वाकवे + अब्रवीत् - पूर्वरूपसन्धिः

समासः

Downloaded from www.omkaravidya.com

अव्ययम् - न व्ययम् - नञ्तत्पुरुषः

कृदन्तः
प्रोक्तवान् – प्र +वच्+क्तवत् प्रत्ययः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ ४.२॥

पदच्छेदः
एवं परम्पराप्राप्तम् इमम् राजर्षयः विदुः सः कालेन इह महता योगः नष्टः परन्तप

पदपरिचयः
एवं - अव्ययम्
परम्पराप्राप्तम् - अकार. पु द्वि एक
इमम् - मकार. पु द्वि एक
राजर्षयः - इकार पु प्र बहु
विदुः - विद् धातुः लट् प्रपु बहु
सः - दकार. पु प्र एक
कालेन - अकार. पु तृ एक
इह - अव्ययम्
महता - तकार पु तृ एक
योगः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

नष्टः - अकार पु प्र एक
परन्तप - अकार पु सं प्र एक

पदार्थः
एवं - इत्थं
परम्पराप्राप्तम् - परम्परया आगतम्
इमम् - इमम्
राजर्षयः - राजर्षयः
विदुः - जानन्ति
सः - सः योगः
कालेन - कालेन
इह - अत्र
महता - दीर्घेण
योगः - योगः
नष्टः - लुप्तः
परन्तप - अर्जुन

अन्वयः
हे परन्तप! एवं परम्पराप्राप्तम् इमम् (योगं) राजर्षयः विदुः । सः योगः महता कालेन इह नष्टः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये द्वितीयः श्लोकः। भगवान् श्री कृष्णः "हे परन्तप! एवम् इमं योगं क्षत्रियपरम्पराप्राप्तं राजर्षयः ज्ञातवन्तः । महता दीर्घेण कालेन सः योगः अस्मिन् लोके नाशम् अभवत् ।" इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
राजर्षयः + विदुः - विसर्गउकारः
सः + कालेन - विसर्गलोपः
कालेन + इह - गुणसन्धिः
योगः + नष्टः - विसर्गउकारः

समासः
राजानः ऋषयः इव राजर्षयः - उपमानोत्तरकर्मधारयसमासः
परान् तपति इति परन्तपः- उपपदसमासः
परम्परया प्राप्तम् – तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ४.३॥

पदच्छेदः

सः एव अयं मया ते अद्य योगः प्रोक्तः पुरातनः भक्तः असि मे सखा च इति रहस्यं हि एतद् उत्तमम्

पदपरिचयः
सः - दकार. पु प्र एक
एव - अव्ययम्
अयं - मकार. पु प्र एक

Downloaded from www.omkaravidya.com

मया -दकार. त्रि तृ एक
ते - दकार. त्रिच एक
अद्य - अव्ययम्
योगः - अकार. पु प्र एक
प्रोक्तः - अकार. पु प्र एक
पुरातनः - अकार. पु प्र एक
भक्तः - अकार. पु प्र एक
असि - अस् धातुः लट् मपु एक
मे - दकार. त्रि ष एक
सखा - इकार. पु प्र एक
च - अव्ययम्
इति - अव्ययम्
एतत् - दकार. नपु प्र एक
रहस्यं - अकार. नपु प्र एक
उत्तमम् - अकार. पु प्र एक

पदार्थः
सः-सः
एव - एव
अयं - अयम्
मया - मया
ते - तुभ्यम्
अद्य - इदानीम्
योगः - योगः
प्रोक्तः - उक्तः
पुरातनः - पूर्व
भक्तः - भक्तः
असि - असि

Downloaded from www.omkaravidya.com

मे-मम
सखा - सुहृद्
च-च
इति - इति
रहस्यं - गुप्तम्
हि-हि
एतत् - इदम्
उत्तमम् - उत्कृष्टम्

अन्वयः
सः एव अयं पुरातनः योगः अद्य मया ते प्रोक्तः | भक्तः असि मे सखा च (असि ) | इति एतत् उत्तमम् रहस्यम् (प्रोक्तः ) |

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये तृतीयः श्लोकः। भगवान् श्रीकृष्णः "त्वं मम भक्तः सखा च असि | अतः इदानीं मया तुभ्यं सः एव अयं पुरातनः योगः प्रोक्तः | यस्मात् इदं ज्ञानं रहस्यम् उत्तमम् च |" इति अवदत् |

व्याकरणम्
सन्धिः
सः + एव - विसर्गलोपः
एव + अयम् - सवर्णदीर्घसन्धिः
ते + अद्य - पूर्वरूपसन्धिः
भक्तः + असि - विसर्गउकारः पूर्वरूपसन्धिः
च + इति - गुणसन्धिः
हि + एतत् - यण्सन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

अर्जुन उवाच
अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४.४॥

पदच्छेदः
अर्जुन उवाच अपरं भवतः जन्म परं जन्म विवस्वतः कथम् एतत् विजानीयां त्वम् आदौ प्रोक्तवान् इति

पदपरिचयः
अपरं - अकार. नपु प्र एक
भवतः - तकार पु ष एक
जन्म - नकार. नपु प्र एक
परं - अकार. नपु प्र एक
जन्म - नकार. नपु प्र एक
विवस्वतः - नकार. पु ष एक
कथम् - अव्ययम्
एतत् - दकार. नपु प्र एक
त्वम् - दकार. त्रि प्र एक
प्रोक्तवान् - तकार. पु प्र एक
विजानीयां - विधि उपु एक
आदौ - उकार पु स. एक
इति - अव्ययम्

पदार्थः

Downloaded from www.omkaravidya.com

अपरं - इदानीम्
भवतः - भवतः
जन्म - जन्म
परं - पूर्वम्
जन्म - जन्म
विवस्वतः - सूर्यस्य
कथम् - कथम्
एतत् - एतत्
विजानीयां - ज्ञातुं शक्नुयाम्
त्वम् - त्वम्
आदौ - पुरा
प्रोक्तवान् - उक्तवान्
इति - एवम्

अन्वयः
भवतः जन्म अपरं विवस्वत: जन्म परम् त्वम् आदो प्रोक्तवान् इति (अहं) कथम् एतत् विजानीयाम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थोऽध्याये चतुर्थः श्लोक: । अर्जुनः भगवान् श्रीकृष्णम् एवं पृष्टवान् । “भवतः जन्म वासदेवगृहे अपरमासीत् । सूर्यस्य जन्म बहु पूर्वकाले आसीत् । भवान् पूर्वकाले सूर्याय एनं योगं प्रोक्तवान् इति अहं कथम् विजानीयाम् ?”

व्याकरणम्
सन्धिः
भवतः + जन्म - विसर्गउकारः
एतत् + विजानीयाम् - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

श्री भगवान् उवाच
बहूनि मे व्यतीतानि जन्मानि तवचार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥४.५॥

पदच्छेदः
श्री भगवान् उवाच बहूनि मे व्यतीतानि जन्मानि तव च अर्जुन तानि अहं वेद सर्वाणि न त्वं वेत्थ परन्तप

पदपरिचयः
बहूनि- उकार नपु प्र बहु
मे - दकार त्रि ष एक
व्यतीतानि - अकार नपु प्र बहु
जन्मानि - नकार नपु प्र बहु
तव - दकार त्रि ष एक
च - अव्ययम्
अर्जुन - अकार पु सं प्र
तानि - दकार नपु द्वि बहु
अहं - दकार त्रि प्र एक
वेद - लट् उपु एक
सर्वाणि - अकार नपु द्वि बहु
न - अव्ययम्
त्वं - दकार त्रि प्र एक
वेत्थ - लट् मपु एक
परन्तप - अकार पु सं प्र

Downloaded from www.omkaravidya.com

पदार्थः

बहूनि- अनेकानि

मे - मम

व्यतीतानि - अतिक्रान्तानि

जन्मानि - जन्मानि

तव - तव

च-च

अर्जुन - पार्थ

तानि - तानि

अहं - अहम्

वेद - जाने

सर्वाणि - सर्वाणि

न-न

त्वं - त्वम्

वेत्थ - जानीषे

परन्तप - अर्जुन

अन्वयः

हे अर्जुन मे तव च बहूनि जन्मानि व्यतीतानि। अहं तानि सर्वाणि वेद । हे परन्तप त्वं न वेत्थ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थोऽध्याये पञ्चमः श्लोकः। भगवान् श्रीकृष्णः "हे अर्जुन ! मम तव च बहूनि जन्मानि अतिक्रान्तानि। अहं तानि सर्वाणि जाने। संसारबन्धकारणेन त्वं न जानीषे । हे परन्तप ! पुनः अहं नित्यशुदमुक्तस्वभावत्वात् अनावरणज्ञानशक्तिः इति वेद।" इति अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
च + अर्जुन - सवर्णदीर्घसन्धिः
तानि + अहम् - यण्सन्धिः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ४.६॥

पदच्छेदः
अजः अपि सन् अव्ययात्मा भूतानाम् ईश्वरः अपि सन् प्रकृतिं स्वाम् अधिष्ठाय सम्भवामि आत्ममायया

पदपरिचयः
अजः - अकार पु प्र एक
अपि - अव्ययम्
सन् - तकार पु प्र एक
अव्ययात्मा - नकार पु प्र एक
भूतानाम् - अकार नपु ष बहु
ईश्वरः - अकार पु प्र एक
अपि - अव्ययम्
सन् - तकार पु प्र एक
स्वाम् - आकार स्त्री द्वि एक
सम्भवामि – लट् उपु एक

Downloaded from www.omkaravidya.com

प्रकृतिं - इकार स्त्री प्र एक
अधिष्ठाय - ल्यबन्तम्
आत्ममायया - आकार स्त्री तृ एक

पदार्थः
अजः - जन्मरहित:
अपि - अपि
सन् - सन्
अव्ययात्मा - अक्षीणज्ञानशक्तिस्वभावः
भूतानाम्- प्राणिनाम्
ईश्वरः - ईशनशीलः
अपि - अपि
सन् - सन्
प्रकृतिं - प्रकृतिं
स्वाम् - स्वाम्
अधिष्ठाय - वशीकृत्य
सम्भवामि - उद्भवामि
आत्ममायया - आत्मन: मायया

अन्वयः
अजः सन् अव्ययात्मा अपि भूतानाम् ईश्वरः अपि सन् स्वां प्रकृतिं अधिष्ठाय आत्ममायया सम्भवामि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थोऽध्याये षष्ठः श्लोकः। भगवान् श्रीकृष्णः "जन्मरहित: अपि सन् अव्ययात्मा अपि सन् तथा भूतानाम् ईश्वरः अपि सन् प्रकृतिं स्वां वशीकृत्य देहवान् इव आत्ममायया जातः इव भवति "। इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
अजः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
सन् + अव्ययात्मा – ङमुडागमनसन्धिः
ईश्वरः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
संभवामि + आत्ममायया - यण्सन्धिः

समासः
अव्ययः आत्मा यस्य सः अव्ययात्मा - समानाधिकरणबहुव्रीहिः
आत्मनः मायया - आत्ममायया - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ४.७॥

पदच्छेदः
यदा यदा हि धर्मस्य ग्लानिः भवति भारत अभ्युत्थानम् अधर्मस्य तदा आत्मानं सृजामि अहम्

पदपरिचयः
यदा - अव्ययम्
यदा - अव्ययम्
हि - अव्ययम्
धर्मस्य - अकार पु ष. एक

Downloaded from www.omkaravidya.com

ग्लानिः - इकार स्त्री प्र एक
भवति - लट् प्रपु एक
भारत - अकार. पु सं प्र
अभ्युत्थानम् - अकार. नपु द्वि एक
अधर्मस्य - अकार पु ष. एक
तदा - अव्ययम्
आत्मानं - नकार. पु द्वि एक
सृजामि - सृज् धातु लट् उपु एक
अहम् - दकार. त्रि प्र एक

पदार्थः
यदा - यदा
हि- हि
धर्मस्य - धर्मस्य
ग्लानिः - हानिः
भवति - उद्भवति
भारत -अर्जुन
अभ्युत्थानम् - वर्धनम्
अधर्मस्य - अधर्मस्य
तदा - तदा
आत्मानं - स्वम्
सृजामि - देहम् उद्भवामि
अहम् - अहम्

अन्वयः
हे भारत! यदा यदा हि धर्मस्य ग्लानि: भवति अधर्मस्य अभ्युत्थानम् (भवति) तदा अहम् आत्मानं सृजामि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये सप्तमः श्लोकः।भगवान् श्रीकृष्णः " हे भारत ! यदा यदा हि वर्णश्रमादिलक्षणस्य प्राणिनाम् हानिः भवति अधर्मस्य अभिवृद्धिः भवति तदा अहं मायया आत्मानं सृजामि ।" इति अवदत् ।

व्याकरणम्

सन्धिः

ग्लानिः + भवति - विसर्गरेफः

तथा + आत्मानम् - सवर्णदीर्घसन्धिः

सृजामि + अहम् - यण्सन्धिः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥४.८॥

पदच्छेदः

परित्राणाय साधूनां विनाशाय च दुष्कृताम् धर्मसंस्थापनार्थाय संभवामि युगे युगे

पदपरिचयः

परित्राणाय - अकार नपु च एक

साधूनां - उकार पु ष बहु

विनाशाय - अकार पु च एक

च - अव्ययम्

दुष्कृताम् - अकार पु ष बहु

Downloaded from www.omkaravidya.com

धर्मसंस्थापनार्थाय - अकार पु च एक
संभवामि – लट् उपु एक
युगे - अकार. नपु स. एक
युगे - अकार. नपु स. एक

पदार्थः
परित्राणाय - संरक्षणाय
साधूनां - सन्मार्गस्थानाम्
विनाशाय - विनाशाय
च-च
दुष्कृताम् - पापकारिणाम्
धर्मसंस्थापनार्थाय - धर्मस्य स्थापनार्थाय
संभवामि - उद्भवामि
युगे- युगे
युगे- युगे

अन्वयः
साधूनां परित्राणाय दुष्कृताम् विनाशाय च धर्मसंस्थापनार्थाय युगे युगे संभवामि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगगवद्गीतायां चतुर्थे अध्याये अष्टमः श्लोकः। भगवान् श्रीकृष्णः "सन्मार्गस्थानां परिरक्षणाय पापकारिणां विनाशाय च धर्मसंस्थापनार्थाय युगे युगे अहं संभवामि ।" इति अवदत् ।

व्याकरणम्
सन्धिः
साधूनां + विनाशाय - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

समासा:
दुष्कृतः दुराचारः कृतः येन सः - प्रादिबहुव्रीहिः
धर्मस्य संस्थापनार्थाय – षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ४.९॥

पदच्छेदः
जन्म कर्म च मे दिव्यम् एवं यः वेत्ति तत्त्वतः त्यक्त्वा देहं पुनः जन्म न एति माम् एति सः अर्जुन

पदपरिचयः
जन्म - नकार नपु द्वि एक
कर्म - नकार नपु द्वि एक
च -अव्ययम्
मे - दकार त्रि ष एक
दिव्यम् - अकार नपु द्वि एक
एवम् - अव्ययम्
यः - दकार पु प्र एक
वेत्ति - लट् प्रपु एक
तत्त्वतः- अव्ययम्
त्यक्त्वा - क्त्वान्तम्

Downloaded from www.omkaravidya.com

देहं - नकार नपु द्वि एक
पुनः - अव्ययम्
जन्म - नकार नपु द्वि एक
न -अव्ययम्
एति - इण् लट् प्रपु एक
माम् - दकार पु द्वि एक
एति -इण् लट् प्रपु एक
सः दकार पु प्र एक
अर्जुन - अकार पु सं प्र

पदार्थः
जन्म - जन्म
कर्म - कर्म
च-च
मे - मम
दिव्यम् - अलौकिकम्
एवं - इत्थम्
यः-यः
वेत्ति -जानाति
तत्त्वतः - तत्त्वतः
त्यक्त्वा - परित्यज्य
देहं - शरीरम्
पुनः - पुनः
जन्म - जन्म
न-न
एति - प्राप्नोति
माम् - माम्
एति - प्राप्नोति

Downloaded from www.omkaravidya.com

सः-सः
अर्जुन - अर्जुन

अन्वयः
हे अर्जुन! यः मे दिव्यं जन्म कर्म च तत्त्वतः वेत्ति सः देहं त्यक्त्वा पुनः जन्म न एति । माम् एति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये नवमः श्लोकः। भगवान् श्रीकृष्णः "हे अर्जुन मम मायारूपं जन्म कर्म च साधुपरित्राणादि अप्राकृतम् ऐश्वरं यथोक्तं तत्त्वतः यः वत्ति सः इमं देहं त्यक्तवा पुनरुत्पत्तिं न प्राप्नोति | सः माम् प्राप्नोति | सः मोक्षं प्राप्नोति |" इति अवदत् |

व्याकरणम्
सन्धिः
यः + वेत्ति - विसर्गउकारः
पुनः + जन्म - विसर्गरेफः
न + एति - वृद्धिसन्धिः
सः + अर्जुन - विसर्गउकारः पूर्वरूपसन्धिः

कृदन्ताः
त्यक्त्वा - त्यज् धातुः + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

वीतरागभयक्रोधाः मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ ४.१०॥

पदच्छेदः
वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः बहवः ज्ञानतपसा पूताः मद्भावम् आगताः

पदपरिचयः
वीतरागभयक्रोधाः - अकार. पु प्र बहु
मन्मयाः - अकार. पु प्र बहु
माम् - दकार. त्रि तृ एक
उपाश्रिताः - अकार. पु प्र बहु
बहवः - उकार. पु प्र बहु
ज्ञानतपसा - सकार. नपु तृ एक
पूताः - अकार. पु प्र बहु
मद्भावम् - अकार. पु द्वि एक
आगताः - अकार. पु प्र बहु

पदार्थः
वीतरागभयक्रोधाः - विनष्ट इच्छाभयकोपाः
मन्मयाः - ब्रह्मविदः
माम् - माम्
उपाश्रिताः - ज्ञाननिष्ठाः
बहवः - अनेके

Downloaded from www.omkaravidya.com

जानतपसा - जानतपसा
पूताः – शुद्धाः
मद्भावम् - मोक्षम्
आगताः: - समनुप्राप्ताः

अन्वयः
वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः बहवः ज्ञानतपसा पूताः मद्भावम् आगताः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये दशमः श्लोकः। भगवान् श्रीकृष्णः "वीतरागभयक्रोधाः ईश्वराभेददर्शिनः मामेव परमेश्वरम् उपाश्रिताः अनेके ज्ञानतपसा परां शुद्धिं गताः सन्तो मोक्षं समनुप्राप्ताः ।" इति अवदत् ।

व्याकरणम्
सन्धिः
मन्मयाः + माम् - विसर्गलोपः
बहवः + ज्ञानतपसा - विसर्गउकारः
पूताः + मद्भावम् - विसर्गलोपः

समासः
रागः च भयः च क्रोधः - रागभयक्रोधाः - इतरेतरेद्वन्द्वसमासः
विगताः रागभयक्रोधाः येभ्यः ते - समानाधिकरणबहुव्रीहिः
ज्ञानतपसा - ज्ञानम् एव तपः तेन अवधारणपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ४.११॥

पदच्छेदः
ये यथा मां प्रपद्यन्ते तान् तथा एव भजामि अहम् मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः

पदपरिचयः
ये - दकार. पु प्र बहु
यथा - अव्ययम्
मां - दकार. त्रि द्वि एक
प्रपद्यन्ते - प्र+पद्+ लट् प्रपु बहु
तान् - दकार. पु द्वि बहु
तथा - अव्ययम्
एव - अव्ययम्
भजामि - लट् प्रपु एक
अहम् - दकार. त्रि प्र एक
मम - दकार. त्रि ष एक
वर्त्म -नकार. नपु द्वि एक
अनुवर्तन्ते - अनु+वृत् प्रपु बहु
मनुष्याः - अकार. पु प्र बहु
पार्थ - अकार. पु सं प्र
सर्वशः - अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः
ये-ये
यथा - येन प्रकारेण
मां - माम्
प्रपद्यन्ते - सेवन्ते
तान् - तान्
तथा - तथा
एव -एव
भजामि - अनुगृहणामि
अहम् - अहम्
मम - मम
वर्त्म - मार्गम्
अनुवर्तन्ते - अनुसरन्ति
मनुष्याः - मनुष्याः
पार्थे - अर्जुन
सर्वशः- सर्वदा

अन्वयः
हे पार्थ ! ये यथा माम् प्रपद्यन्ते तान् तथा एव अहम् भजामि । मनुष्याः मम वर्त्म सर्वशः अनुवर्तन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये एकादशः श्लोकः। भगवान् श्री कृष्णः " हे पार्थ ये यथा येन फलार्थितया माम् प्रपद्यन्ते तथा एव तान् अहं अनुगूहणामि । मनुष्याः सर्वदा अपि ईश्वरस्य मम मार्गं सर्वप्रकारैः अनुवर्तन्ते ।" इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
तान् + तथा - सत्वसन्धिः
तथा + एव - वृद्धिसन्धिः
भजामि + अहम् - यण्सन्धिः
वर्त्म + अनुवर्तन्ते - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ ४.१२॥

पदच्छेदः

काङ्क्षन्तः कर्मणां सिद्धि यजन्ते इह देवताः क्षिप्रं हि मानुषे लोके सिद्धिः भवति कर्मजा

पदपरिचयः
काङ्क्षन्तः - तकार. पु प्र बहु
कर्मणां - नकार नपु ष एक
सिद्धिं - इकार. स्त्री द्वि एक
यजन्ते - लट् प्रपु बहु
इह - अव्ययम्
देवताः - आकार. स्त्री द्वि बहु
क्षिप्रं - अव्ययम्
हि -अव्ययम् मानुषे - अकार पु स. एक

Downloaded from www.omkaravidya.com

लोके - अकार पु स. एक
सिद्धिः - इकार स्त्री प्र एक
भवति - लट् प्रपु एक
कर्मजा - आकार स्त्री प्र एक

पदार्थः
काङ्क्षन्तः - अभिप्सन्तः
कर्मणां - क्रियाणाम्
सिद्धिं - फलनिष्पत्तिम्
यजन्ते - प्रार्थयन्ते
इह - अस्मिन्
देवताः - इन्द्राग्न्याद्याः
क्षिप्रं - शीघ्रं
हि-हि
मानुषे - मानवे
लोके - लोके
सिद्धिः -फलसिद्धिः
भवति - जायते
कर्मजा - कर्मसम्भवा

अन्वयः
इह कर्मणां सिद्धिं काङ्क्षन्तः देवताः यजन्ते । हि मानुषे लोके कर्मजा सिद्धिः क्षिप्रं भवति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये द्वादशः श्लोकः। भगवान् श्रीकृष्णः "अस्मिन् लोके अभीप्सन्तः कर्मणां सिद्धिं फलनिष्पत्तिं इन्द्राग्न्याद्यः प्रार्थयन्ते । यतः मनुष्यलोके शास्त्राधिकारः तेषां भिन्नदेवतायाजिनां फलसिद्धिः शीघ्रं भवति । " इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
यजन्ते + इह - यानतवान्तादेशसन्धिः य लोपः
सिद्धिः + भवति - विसर्गरेफः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥४.१३॥

पदच्छेदः
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः तस्य कर्तारम् अपि मां विद्धि अकर्तारम् अव्ययम्

पदपरिचयः
चातुर्वर्ण्यम् - अकार नपु प्र एक
मया - दकार त्रि तृ एक
सृष्टं - अकार नपु प्र एक
गुणकर्मविभागशः -अव्ययम्
तस्य - दकार पु ष एक
कर्तारम् - ऋकार पु द्वि एक
अपि - अव्ययम्
मां - दकार त्रि द्वि एक
विद्धि - विद् लोट् मपु एक
अकर्तारम् - ऋकार पु द्वि एक

Downloaded from www.omkaravidya.com

अव्ययम् - अकार पु द्वि एक

पदार्थः
चातुर्वर्ण्यम् - चतुर्वर्णाः
मया - मया
सृष्टं - उत्पादितम्
गुणकर्मविभागशः - गुणकर्मविभागशः
तस्य - तस्य
कर्तारम् - कर्तारम्
अपि - अपि
मां - माम्
विद्धि - जानीहि
अकर्तारम् - अकर्तारम्
अव्ययम् - असंसारिणम्

अन्वयः
चातुर्वर्ण्यं मया गुणकर्मविभागशः सृष्टम् । तस्य कर्तारम् अपि मां अव्ययम् अकर्तारम् (इति) विद्धि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवदगीतायां चतुर्थे अध्याये त्रयोदशः श्लोकः। भगवान् श्रीकृष्णः "ईश्वरेण मया सत्वरजस्तमांसि गुणाः च कर्मविभागशः अनुसृत्य चतुर्विधवर्णाः सृष्टम् । यद्यपि मायासंव्यवाहारेण तस्य कर्मणः कर्तारं अपि सन्तम् मां अकर्तारम् असंसारिणम् च एवं विद्धि ।" इति अवदत् ।

व्याकरणम्
सन्तिः
विद्धि + अकर्तारम् - यण्सन्धिः

Downloaded from www.omkaravidya.com

समासः
गुणः च कर्म च - गुणकर्मणी - इतरेतरद्वन्द्वसमासः
तयोः विभागशः - गुणकर्मविभागशः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥४.१४॥

पदच्छेदः

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा इति मां यः अभिजानाति कर्मभिः न सः बध्यते

पदपरिचयः
न - अव्ययम्
मां - दकार त्रि द्वि एक
कर्माणि - नकार नपु प्र बहु
लिम्पन्ति - लट् प्रपु बहु
न - अव्ययम्
मे - दकार त्रि ष एक
कर्मफले - अकार नपु स एक
स्पृहा - आकार स्त्री प्र एक
इति - अव्ययम्
मां - दकार त्रि द्वि एक

Downloaded from www.omkaravidya.com

यः -दकार पु प्र एक
अभिजानाति - लट् प्रपु एक
कर्मभिः - नकार नपु. तृ बहु
न - अव्ययम्
सः - दकार पु प्र एक
बध्यते - लट् कर्मणि प्रपु एक
पदार्थः
न-न
मां - माम्
कर्माणि - कर्माणि
लिम्पन्ति - लिम्पन्ति
मे - मम
कर्मफले - कर्मसिद्धौ
स्पृहा -तृष्णा
इति - इति
मां - माम्
यः-यः
अभिजानाति - वेत्ति
कर्मभिः - कर्मभिः
न-न
सः-सः
बध्यते - बध्यते

अन्वयः
कर्माणि माम् न लिम्पन्ति । कर्मफले मे न स्पृहा इति मां यः अभिजानाति सः कर्मभिः न बध्यते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थेऽध्याये चतुर्दशः श्लोकः। भगवान् श्रीकृष्णः “अहङ्काराभावात् तानि कर्माणि माम् न लिम्पन्ति । तेषां कर्मणां फलेषु मह्यं तृष्णा नास्ति । येषां संसारिणाम् 'अहं कर्ता' इति अभिमानः कर्मसु तत् फलेषु च तृष्णा अस्ति तान् कर्माणि व्रिम्पन्ति । इति यः एवं माम् आत्मतत्त्वेन जानाति सः कर्मभिः न बध्यते ।“ इति अवदत् ।

व्याकरणम्

सन्धिः

यः + अभिजानाति - विसर्ग उकारः

कर्मभिः + न - विसर्गरेफः

सः + बध्यते - विसर्गलोपः

समासः

कर्मफ़लम् – कर्मणां फ़लम् – षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ ४.१५॥

पदच्छेदः

एवं जात्वा कृतं कर्म पूर्वैः अपि मुमुक्षुभिः कुरु कर्म एव तस्मात् त्वम् पूर्वैः पूर्वतरं कृतम्

Downloaded from www.omkaravidya.com

पदपरिचयः
एवं - अव्ययम्
ज्ञात्वा - क्त्वान्तम्
कृतं - अकार. नपु प्र एक
कर्म - नकार नपु प्र एक
पूर्वैः - अकार पुत् बहु
अपि - अव्ययम्
मुमुक्षुभिः - उकार पु तृ बहु
कुरु - लोट् मपु एक
कर्म - नकार नपु द्वि एक
एव - अव्ययम्
तस्मात् - दकार पु प एक
त्वम् - दकारत्रि प्र एक
पूर्वैः - अकार पु तृ बहु
पूर्वतरं - अकार नपु द्वि एक
कृतम् - अकार नपु द्वि एक

पदार्थः
एवं - इत्थम्
ज्ञात्वा - विदित्वा
कृतं - कृतम्
कर्म - कर्म
पूर्वैः - पितृभिः
अपि - अपि
मुमुक्षुभिः - मुमुक्षुभिः
कुरु - कुरु
कर्म - कर्म
एव - एव

Downloaded from www.omkaravidya.com

तस्मात् - तस्मात्
त्वम् - त्वम्
पूर्वै - पूर्वै
पूर्वतरं - पूर्वतरम्
कृतम् - कृतम्

अन्वयः
एवं ज्ञात्वा पूर्वैः मुमुक्षुभिः कर्म कृतम् तस्मात् पूर्वैः कृतम् पूर्वतरं कर्म एव त्वं कुरु ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थेऽध्याये पञ्चादशः श्लोकः। भगवान् श्रीकृष्णः "एवं ज्ञात्वा अतिक्रान्तैः मुमुक्षुभिः पूर्वै अपि कर्म कृतम् । तेन तूष्णीं आसम् । सन्यासः न आपि कर्तव्यः ।तस्मात् त्वं कर्म एव कुरु ।" इति अवदत् ।

व्याकरणम्
सन्धिः
पूर्वैः + अपि - विसर्गरेफः
कर्म + एव - वृद्धिसन्धिः

कृदन्ताः
ज्ञात्वा - ज्ञा + क्त्वा प्रत्ययः
मुमुक्षुः - मुच् + सन् प्रत्ययः - मोक्तुम् इच्छुः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥४.१६॥

पदच्छेदः
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः तत् ते कर्म प्रवक्ष्यामि यत् ज्ञात्वा मोक्ष्यसे अशुभात्

पदपरिचयः
किं - मकार नपु प्र एक
कर्म - नकार नपु प्र एक
अकर्म - नकार नपु प्र एक
कवयः - इकार पु प्र बहु
अत्र - अव्ययम्
तत् - दकार नपु द्वि एक
कर्म - नकार नपु द्वि एक
यत् - दकार नपु द्वि एक
मोक्ष्यसे - मुच् + लृट् मपु एक
किम् - मकार नपु प्र एक
इति - अव्ययम् अपि - अव्ययम्
मोहिताः - अकार पु प्र बहु
ते - दकार त्रिच एक
प्रवक्ष्यामि - प्र + वच् + लृट् उपु एक
ज्ञात्वा - क्त्वान्तम्
अशुभात् - अकार नपु प एक

Downloaded from www.omkaravidya.com

पदार्थः
किं - किम्
कर्म - कर्म
अकर्म - अकर्म
कवयः - पण्डिताः
अत्र - अत्र
किम् - किम्
इति - इति
अपि - अपि
मोहिताः - मोहङ्गताः
तत् - तत्
ते - तुभ्यम्
कर्म - कर्म
प्रवक्ष्यामि - वदिष्यामि
यत् - यत्
ज्ञात्वा - विदित्वा
मोक्ष्यसे - मोक्ष्यसे
अशुभात् - संसारात्

अन्वयः
किं कर्म किम् अकर्म इति अत्र कवयः अपि मोहिताः । (त्वं) यत् ज्ञात्वा अशुभात् मोक्ष्यसे (अहं) तत् कर्म ते प्रवक्ष्यामि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थेऽध्याये षोडशः शलोकः। भगवान् श्री कृष्णः "अत्र मेधाविनः आपि कर्मादिविषये किं कर्म किं अकर्म इति मोहङ्गताः । अतः तुभ्यम् अहं कर्म अकर्म विषये यत् ज्ञात्वा संसारात् ( त्वं) मोक्ष्यसे तत् वदिष्यामि ।" इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
अकर्म + इति - गुणसन्धिः
कवयः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
अपि + अत्र - यण्सन्धिः
यत् + ज्ञात्वा - श्चुत्वसन्धिः जश्त्वसन्धिः
मोक्ष्यसे + अशुभात् - पूर्वरूपसन्धिः

समासः
अकर्म - न कर्म - नञ्तत्पुरुषः

कृदन्ताः
ज्ञात्वा - ज्ञा + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ ४.१७॥

पदच्छेदः
कर्मणः हि अपि बोद्धव्यं बोद्धव्यं च विकर्मणः अकर्मणः च बोद्धव्यं गहना कर्मणः गतिः

पदपरिचयः
कर्मणः - नकार नपु ष एक

Downloaded from www.omkaravidya.com

हि - अव्ययम्
अपि - अव्ययम्
बोद्धव्यं - अकार नपु प्र एक
बोद्धव्यं - अकार नपु प्र एक
च - अव्ययम्
अकर्मणः - नकार नपु ष एक
बोद्धव्यं - अकार नपु प्र एक
कर्मणः - नकार नपु ष एक
विकर्मणः - नकार नपु ष एक
च -अव्ययम्
गहना – आ स्त्री प्र एक
गतिः- इकार स्त्री प्र एक

पदार्थः
कर्मणः - कर्मणः
हि-हि
अपि - अपि
बोद्धव्यं - ज्ञातव्यम्
च-च
विकर्मणः - प्रतिषिद्धकर्मणः
अकर्मणः - अकर्मणः
च -च
बोद्धव्यं - ज्ञातव्यम्
गहना – दुर्ज्ञाना
कर्मणः - कर्मणः
गतिः - गतिः

Downloaded from www.omkaravidya.com

अन्वयः

कर्मणः (तत्त्वम्) बोद्धव्यम् । विकर्मणः अपि च बोद्धव्यम् । अकर्मणः च बोद्धव्यम् । हि कर्मणः गतिः गहना ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगगवदगीतायां चतुर्थेऽध्याये सप्तदशः श्लोकः। भगवान् श्री कृष्णः “शास्त्रविहितस्य कर्मणः ज्ञातव्यम् । प्रतिषिद्धस्य विकर्मणः च ज्ञातव्यम् । तथा अकर्मणः च ज्ञातव्यम् यस्मात् कर्माकर्मविकर्मणां गतिः ज्ञातुं बहु कष्टम् ।” इति अवदत् ।

व्याकरणम्

सन्धिः

कर्मणः + हि - विसर्गउकारः

हि+ अपि - यण्सन्धिः

अकर्मणः + च - विसर्गसकारः

कर्मणः + गतिः - विसर्गउकारः

समासः

अकर्मणः - न कर्मणः - नञ्तत्पुरुषः

कृदन्ताः

बोद्धव्यम् - बुध्+ तव्यत् प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
सः बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ ४.१८॥

पदच्छेदः
कर्मणि अकर्म यः पश्येत् अकर्मणि च कर्म यः सः बुद्धिमान् मनुष्येषु सः युक्तः कृत्स्नकर्मकृत्

पदपरिचयः
कर्मणि - नकार नपु स एक
अकर्म - नकार नपु द्वि एक
यः - दकार पु प्र एक
पश्येत् - विधि प्रपु एक
अकर्मणि - नकार नपु स एक
कर्म - नकार नपु द्वि एक
सः - दकार पु प्र एक
मनुष्येषु - अकार पु स बहु
युक्तः - अकार पु प्र एक
च - अव्ययम्
यः - दकार पु प्र एक
बुद्धिमान् - तकार पु प्र एक
सः - दकार पु प्र एक
कृत्स्नकर्मकृत् - तकार पु प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

कर्मणि - कर्मणि
अकर्म - अकर्म
यः-यः
पश्येत् - वीक्षेत
अकर्मणि - अकर्मणि
च-च
कर्म - कर्म
यः-यः
सः-सः
बुद्धिमान् - विवेकी
मनुष्येषु - नरेषु
सः- सः
युक्तः - योगी
कृत्स्नकर्मकृत्- समस्तकर्मकृत्

अन्वयः
यः कर्मणि अकर्म पश्येत् यः अकर्मणि कर्म च (पश्येत्) सः युक्तः मनुष्येषु बुद्धिमान् । सः कृत्स्नकर्मकृत् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये अष्टादशः श्लोकः। भगवान् श्रीकृष्णः "यः कर्मणि अकर्मभावं पश्येत् अकर्मणि च कर्मभावं पश्येत् सः बुद्धिमान् । सः मनुष्येषु युक्तः सः समस्तकर्मकृत् । एवम् अवसत् ।

व्याकरणम्
सन्धिः
कर्मणि + अकर्म - यण्सन्धिः
पश्येत् + अकर्मणि - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

सः + बुद्धिमान् - विसर्गलोपः

समासः
कृत्स्नं कर्म - कृत्स्नकर्म - कर्मधारयसमासः
कृत्स्नकर्म करोति कृत्स्नकर्मकृत् - उपपदसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥४.१९॥

पदच्छेदः
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तम् आहुः पण्डितं बुधाः

पदपरिचयः
यस्य - दकार. पु ष एक
सर्वे - अकार. पु (सर्व) प्र बहु
समारम्भाः - अकार. पु प्र बहु
कामसङ्कल्पवर्जिताः - अकार. पु प्र बहु
ज्ञानाग्निदग्धकर्माणं -अकार. पु द्वि एक
तम् - दकार. पु द्वि एक
आहुः - लट् प्रपु बहु
पण्डितं - अकार. पु द्वि एक
बुधाः – अकार पु प्र बहु

Downloaded from www.omkaravidya.com

पदार्थः
यस्य - यस्य
सर्वे - अनेके
समारम्भाः - कर्माणि समारभ्यन्ते
कामसङ्कल्पवर्जिताः - कामसङ्कल्परहिताः
ज्ञानाग्निदग्धकर्माणं – ज्ञानाग्निदग्धकर्माणं
तम् - तम्
आहुः - वदन्ति
पण्डितं - विवेकिनम्
बुधाः - ब्रह्मविदः

अन्वयः
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः बुधाः ज्ञानाग्निदग्धकर्माणं तम् पण्डितं आहुः।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये नवदशः श्लोकः। भगवान् श्रीकृष्णः "यस्य सर्वे समारम्भाः कामसङ्कल्परहिताः बुधाः ज्ञानाग्निना दग्धकर्माणं तम् पण्डितं इति वदन्ति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
ज्ञानाग्निदग्धकर्माणम् +तम् - अनुस्वारसन्धिः

समासः
कामाः च सङ्कल्पाः च - कामसङ्कल्पाः - इतरेतरद्वन्द्वसमासः
कामसङ्कल्पैः वर्जिताः - कामसङ्कल्पवर्जिताः तृतीयातत्पुरुषसमासः
ज्ञानम् एव अग्निः – ज्ञानाग्निः - अवधारणापूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

ज्ञानाग्निना दग्धानि - ज्ञानाग्निदग्धा - तृतीयातत्पुरुषः
ज्ञानाग्निदग्धानि कर्माणि यस्य सः ज्ञानाग्निदगधकर्मणः - तम्
समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥४.२०॥

पदच्छेदः
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तः निराश्रयः कर्मणि अभिप्रवृत्तः अपि न एव किञ्चित् करोति सः

पदपरिचयः
त्यक्त्वा - क्त्वान्तम्
कर्मफलासङ्गं - अकार पु द्वि एक
नित्यतृप्तः - अकार पु प्र एक
निराश्रयः - अकार पु प्र एक
कर्मणि - नकार नपु स एक
अभिप्रवृत्तः - अकार पु प्र एक
अपि - अव्ययम्
न - अव्ययम्
एव - अव्ययम्
किञ्चित् - अव्ययम्
करोति - लट् प्रपु एक सः - दकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
त्यक्त्वा - परित्यज्य
कर्मफलासङ्गं - कर्मफलासक्तिम्
नित्यतृप्तः – निराकाङ्क्षः
निराश्रयः - आश्रयरहितः
कर्मणि - कर्मणि
अभिप्रवृत्तः - संयुक्तः
अपि - अपि
न-न एव-एव
किञ्चित् - किञ्चित्
करोति - करोति
सः- सः
अन्वयः
नित्यतृप्तः निराश्रयः कर्मफलासङ्गं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये विंशतितमः श्लोकः। भगवान् श्रीकृष्णः “यः कर्मसु अभिमानं फलासङ्गं च त्यक्त्वा विषयेषु निराकाङ्क्षः निराश्रयः च कर्मणि अभिप्रवृत्तः अपि निष्क्रियात्मज्ञानप्राप्तकारणात् सः किञ्चित् न करोति एव ।” इति अवदत् ।

व्याकरणम्
सन्धिः
नित्यतृप्तः + निराश्रयः - विसर्गउकारः
कर्मणि + अभिप्रवृत्तः - यण्सन्धिः
अभिप्रवृत्तः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
न + एव - वृद्धिसन्धिः

Downloaded from www.omkaravidya.com

समासः
कर्मणः फलम् - कर्मफलम् - षष्ठीतत्पुरुषः
कर्मफलेषु आसङ्गः कर्मफलासङ्गः - सप्तमीतत्पुरुषः
निर्मतः आश्रयः यस्मात् सः बहुव्रीहिः

कृदन्ताः
त्यक्त्वा - त्यज् + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४.२१॥

पदच्छेदः
निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन् न आप्नोति किल्बिषम्

पदपरिचयः
निराशीः - सकार. पु प्र एक
यतचित्तात्मा - नकार. पु प्र एक
त्यक्तसर्वपरिग्रहः - अकार. पु प्र एक
शारीरं - अकार. नपु दवि एक
केवलं - अकार. नपु दवि एक
कर्म - नकार. नपु द्वि एक
कुर्वन् - तकार. पु प्र एक
न - अव्ययम्

Downloaded from www.omkaravidya.com

आप्नोति - लट् प्रपु एक
किल्बिषम् - अकार. नपु द्वि एक

पदार्थः
निराशीः - आशारहितः
यतचित्तात्मा - नियतान्तःकरणेन्द्रियः
त्यक्तसर्वपरिग्रहः -त्यक्तसर्वपरिग्रहः
शारीरं - शरीरस्य इदम्
केवलं - मात्रम्
कर्म - कर्म
कुर्वन् - आचरन्
न-न
आप्नोति – प्राप्नोति किल्बिषम् - पापम्

अन्वयः
निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः केवलं शारीरं कर्म कुर्वन् किल्बिषम् न आप्नोति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये एकविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "यः निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः केवल शारीरनिर्वर्त्य कर्म कुर्वन् सः संसारं न प्राप्नोति । ज्ञानाग्निदगधकर्मत्वात् अप्रतिबन्धेन मुच्यते।" इति अवदत् ।

व्याकरणम्
सन्धिः
निराशीः + यतचित्तात्मा - विसर्गरेफः
न + आप्नोति - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

समासः
निर्मता आशिषः यस्मात् सः- निराशीः - प्रादिबहुव्रीहिः
त्यक्तः सर्वः परिग्रहः येन सः- त्यक्तसर्वपरिग्रहः - समानाधिकरणबहुव्रीहिः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥४.२२॥

पदच्छेदः
यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः समः सिद्धौ असिद्धौ च कृत्वा अपि न निबध्यते

पदपरिचयः
यदृच्छालाभसन्तुष्टः - अकार पु प्र एक
द्वन्द्वातीतः - अकार पु प्र एक
विमत्सरः - अकार पु प्र एक
समः - अकार पु प्र एक
सिद्धौ - इकार स्त्री स. एक
असिद्धौ - इकार स्त्री स. एक
च - अव्ययम्
कृत्वा - क्त्वान्तम् अपि - अव्ययम्
न - अव्ययम्
निबध्यते - लट् कर्मणि प्रपु एक

Downloaded from www.omkaravidya.com

पदार्थः
यदृच्छालाभसन्तुष्टः - सञ्जातालम्प्रत्ययः
द्वन्द्वातीतः - अविषण्णचित्तः
विमत्सरः - मत्सरगुणरहितः
समः - तुल्यमनस्कः
सिद्धौ - लाभे
असिद्धौ - अलाभे
च-च
कृत्वा - कृत्वा
अपि - अपि
न-न
निबध्यते - निबध्यते

अन्वयः
यतृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः सिद्धौ असिद्धौ च समः कृत्वा अपि न निबध्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये द्वाविंशतितमः श्लोकः।भगवान् श्रीकृष्णः "यदृच्छालाभेन सन्तुष्टः द्वन्द्वातीतः मत्सरगुणरहितः यदृच्छालाभस्य सिद्धौ असिद्धौ च तुल्यः कर्म कृत्वा अपि बद्धः न भवति।" इति अवदत् ।

व्याकरणम्
सन्धिः
यदृच्छालाभसन्तुष्टः + द्वन्द्वातीतः - विसर्गउकारः
द्वन्द्वातीतः + विमत्सरः - विसर्गउकारः
सिद्धौ +असिद्धौ - यान्तवान्तादेशसन्तिः
कृत्वा + अपि - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

समासः
यदृच्छया लाभः - यदृच्छालाभः तेन सन्तुष्टः - यदृच्छालाभसन्तुष्टः
तृतीयातत्पुरुषः
द्वन्द्वं अतीतः - दवन्द्वातीतः - तृतीयातत्पुरुषः
विगतः मत्सरः यस्य सः- विमत्सरः - समानाधिकरणबहु व्रीहिः

कृदन्ताः
कृत्वा - कृ+ क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः |
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ ४.२३॥

पदच्छेदः
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञाय आचरतः कर्म समग्रं प्रविलीयते

पदपरिचयः
गतसङ्गस्य - अकार पु ष एक
मुक्तस्य- अकार पु ष एक
ज्ञानावस्थितचेतसः - सकार पु ष एक
यज्ञाय - अकार पु च एक
आचरतः -तकार पु. ष एक
कर्म - नकार पु प्र एक
समग्रं - अकार नपु प्र एक
प्रविलीयते - लट् प्रपु एक

Downloaded from www.omkaravidya.com

पदार्थः
गतसङ्गस्य - सर्वतः निवृत्तासक्तेः
मुक्तस्य- मुक्तस्य
ज्ञानावस्थितचेतसः - ज्ञानावस्थितचेतसः
यज्ञाय – यज्ञनिवृत्यर्थम्
आचरतः - निर्वर्तयतः
कर्म - कर्म
समग्रं - समस्तम्
प्रविलीयते - विनश्यति

अन्वयः
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये त्रयोविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "अभिमानाः त्यक्त्वा कामक्रोधादि त्यक्त्वा ज्ञानावस्थितचेतसः यज्ञनिवृत्यर्थम् आचरतः कर्म समग्रम् विनश्यति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
यज्ञाय + आचरतः - सवर्णदीर्घसन्धिः

समासः
गतः सङ्गः यस्मात् सः गतसङ्गः- समानाधिकरणबहुव्रीहिसमासः
ज्ञाने अवस्थितं चेतः यस्य सः - व्यधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥४.२४॥

पदच्छेदः
ब्रह्म अर्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् (ब्रह्म) तेन एव ब्रहमकर्मसमाधिना

पदपरिचयः
ब्रह्म - नकार नपु प्र एक
अर्पणं - अकार नपु प्र एक
ब्रह्म - नकार नपु प्र एक
हविः - सकार नपु प्र एक
ब्रह्माग्नौ - अकार पु स एक
ब्रह्मणा – नकार न्पु तृ एक
हुतम्- अकार नपु प्र एक
ब्रह्म - नकार नपु प्र एक
एव - अव्ययम्
तेन - दकार पु तृ एक
गन्तव्यं - अकार नपु प्र एक
ब्रहमकर्मसमाधिना - इकार पु तृ एक

पदार्थः
ब्रह्म - ब्रह्म
अर्पणं - यज्ञवस्तु

Downloaded from www.omkaravidya.com

ब्रह्म - परमात्मा
हविः - आज्यादिवस्तु
ब्रह्माग्नौ - ब्रह्माग्नौ
ब्रह्मणा - यजमानरूपेण
हुतम्- दत्तम्
ब्रह्म - ब्रह्म
एव - एव
तेन - तेन
गन्तव्यः - प्राप्तव्यः
ब्रह्मकर्मसमाधिना - ब्रह्मकर्मसमाधिना

अन्वयः
अर्पणं ब्रह्म हविः ब्रह्म ब्रह्माग्नौ ब्रह्मणा हुतम् (ब्रह्म ) तेन ब्रह्मकर्मसमाधिना ब्रह्म एव गन्तव्यम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये चतुर्विंशतितमः श्लोकः। भगवान् श्रीकृष्णः “अर्प्यते अनेन इति अर्पणम् तदपि ब्रह्म एव । अर्प्यमाणं हविः अपि ब्रह्म एव । ब्रह्माग्नौ यज्ञकर्त्रा ब्रह्मणा कृतं होममपि ब्रह्म । तेन यज्ञ ब्रह्मकर्मसमाधिना प्राप्तम् फलमपि ब्रह्म एव ।” इति अवदत् ।

व्याकरणम्
सन्धिः
ब्रह्म + अर्पणम् - सवर्णदीर्घसन्धिः
हविः + ब्रह्मणाग्नौ - विसर्गरेफः
ब्रह्म + एव - वृद्धिसन्धिः

Downloaded from www.omkaravidya.com

समासः
ब्रह्म एव अग्निः - ब्रह्माग्निः अवधारणापूर्वपदकर्मधारयसमासः
ब्रह्म एव कर्म - ब्रह्मकर्म - अवधारणापूर्वपदकर्मधारयसमासः
तस्मिन् समाधिः यस्य सः - ब्रह्मकर्मसमाधिः तेन ब्रह्मकर्मसमाधिना - व्यधिकरणकर्मधारयसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ ४.२५॥

पदच्छेदः
दैवम् एव अपरे यज्ञं योगिनः पर्युपासते ब्रह्माग्नौ अपरे यज्ञं यज्ञेन एव उपजुह्वति

पदपरिचयः
दैवम् - अकार नपु द्वि एक
एव - अव्ययम्
अपरे - अकार पु सर्व प्र बहु
यज्ञं - अकार पु द्वि एक
योगिनः - नकार पु प्र बहु
पर्युपासते - परि+ उप+ आस् लट् प्रपु बहु
ब्रह्माग्नौ - अकार पु स एक
अपरे - अकार पु सर्व प्र बहु
यज्ञं - अकार पु द्वि एक
यज्ञेन - अकार पु तृ एक
एव - अव्ययम्

Downloaded from www.omkaravidya.com

उपजुह्वति - उप+ हु + लट् प्रपु बहु

पदार्थः
दैवम् - देवसम्बन्धिनम्
एव - एव
अपरे - अन्ये
यज्ञं - यागम्
योगिनः - ब्रह्मविदः
पर्युपासते - आचरन्ति
ब्रह्माग्नौ - ब्रह्माग्नौ
अपरे - अन्ये
यज्ञं - यज्ञम्
यज्ञेन - यागेन
एव - एव
उपजुह्वति - उपजुह्वति

अन्वयः
अपरे योगिनः दैवं यज्ञम् एव पर्युपासते । अपरे ब्रह्माग्नौ यज्ञेन एव यज्ञं उपजुह्वति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये पञ्चविंशतितमः श्लोकः। भगवान् श्रीकृष्णः “अपरे योगिनः इन्द्रादि देवान् यज्ञेन पर्युपासते । अपरे ब्रह्मविदः ब्रह्माग्नौ आत्मना एव आत्मानं समर्पयन्ति ।” इति अवदत् ।

व्याकरणम्
सन्धिः
एव + अपरे - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

ब्रह्माग्नौ + अपरे – यान्तवान्तादेशसन्धिः
यज्ञेन + एव - वृद्धिसन्धिः
एव + उपजुह्वति - गुणसन्धिः

समासः
ब्रह्मः एव अग्निः ब्रह्माग्निः - अवधारणापूर्वपदकर्मधारयसमासः - तस्मिन्

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥४.२६॥

पदच्छेदः
श्रोत्रादीनि इन्द्रियाणि अन्ये संयमाग्निषु जुह्वति शब्दादीन् विषयान् अन्ये इन्द्रियाग्निषु जुह्वति

पदपरिचयः
श्रोत्रादीनि - इकार नपु द्वि बहु
इन्द्रियाणि - अकार नपु द्वि बहु
अन्ये - अकार पु प्र बहु
संयमाग्निषु - अकार पु स बहु
जुह्वति - लट् प्रपु बहु
शब्दादीन् - इकार पु द्वि बहु
विषयान् - अकार पु द्वि बहु
इन्द्रियाग्निषु - इकार पु स बहु
अन्ये - अकार पु प्र बहु जुह्वति - लट् प्रपु बहु

Downloaded from www.omkaravidya.com

पदार्थः
श्रोत्रादीनि - श्रोत्रप्रभृतीनि
इन्द्रियाणि - इन्द्रियाणि
अन्ये - अन्ये
संयमाग्निषु – नियतवह्निषु
जुह्वति - होमं कुर्वन्ति
शब्दादीन् - शब्दादीन्
विषयान् - विषयान्
अन्ये - अन्ये
इन्द्रियाग्निषु - इन्द्रियाग्निषु
जुह्वति - होमं कुर्वन्ति

अन्वयः
अन्ये श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति । अन्ये शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगगवद्गीतायां चतुर्थे अध्याये षड्विंशतितमः श्लोकः। भगवान् श्रीकृष्णः "अन्ये योगिनः श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति । अन्ये योगिनः शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
श्रोत्रादीनि + इन्द्रियाणि - सवर्णदीर्घसन्धिः
इन्द्रियाणि + अन्ये - यण्सन्धिः
अन्ये + इन्द्रियाग्निषु - यान्तवान्तादेशसन्धिः

Downloaded from www.omkaravidya.com

समासः
संयमाः एव अग्नयः - संयमाग्नयः अवधारणपूर्वपदकर्मधारयसमासः - तेषु
शब्दः आदिः येषां ते - शब्दादयः समानाधिकरणबहुव्रीहिः
इन्द्रियाग्निषु - इन्द्रियाणि एव अग्नयः इन्द्रियाग्नयः –
अवधारणपूर्वपदकर्मधारयसमासः - तेषु

## श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ ४.२७॥

पदच्छेदः
सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च अपरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते

पदपरिचयः
सर्वाणि - अकार नपु द्वि बहु
इन्द्रियकर्माणि - अकार नपु द्वि बहु
प्राणकर्माणि - अकार नपु द्वि बहु
च - अव्ययम्
अपरे - अकार पु प्र बहु
आत्मसंयमयोगाग्नौ - इकार पु स एक
जुह्वति - लट् प्रपु बहु
ज्ञानदीपिते - अकार पु स एक

Downloaded from www.omkaravidya.com

पदार्थः
सर्वाणि - सकलानि
इन्द्रियकर्माणि - इन्द्रियव्यापारान्
प्राणकर्माणि - प्राणव्यापारान्
च-च
अपरे - अन्ये
आत्मसंयमयोगाग्नौ -चित्तनियन्त्रणयोगवह्नौ
जुह्वति - प्रक्षिपन्ति
ज्ञानदीपिते - विवेकज्ञानप्रज्वालिते

अन्वयः
अपरे सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये सप्तविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "अपरे ज्ञाननिष्ठाः सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपिते आत्मसंयमयोगाग्नौ प्रक्षिपन्ति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
सर्वाणि + इन्द्रियकर्माणि - सवर्णदीर्घसन्धिः
च + अपरे - सवर्णदीर्घसन्धिः

समासः
इन्द्रियाणाम् कर्माणि - इन्द्रियकर्माणि - षष्ठीतत्पुरुषः
प्राणानाम् कर्माणि - प्राणकर्माणि -षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

आत्मनि संयमः - आत्मसंयमः - सप्तमीतत्पुरुषः
योगः एव अग्निः - योगाग्निः - अवधारणापूर्वपदकर्मधारयसमासः
आत्मसंयमः एव योगाग्निः - आत्मसंयमयोगाग्निः
अवधारणापूर्वपदकर्मधारयसमासः
ज्ञानेन दीपितः ज्ञानदीपितः - तृतीयातत्पुरुषः

## श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥४.२८॥

पदच्छेदः
द्रव्ययज्ञाः तपोयज्ञाः योगयज्ञाः तथा अपरे स्वाध्यायज्ञानयज्ञाः च यतयः संशितव्रताः

पदपरिचयः
द्रव्ययज्ञाः -अकार पु प्र बहु
तपोयज्ञाः - अकार पु प्र बहु
योगयज्ञाः - अकार पु प्र बहु
तथा - अव्ययम्
अपरे - अकार पु प्र बहु
स्वाध्यायज्ञानयज्ञाः - अकार पु प्र बहु
च - अव्ययम्
यतयः - इकार पु प्र बहु
संशितव्रताः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

पदार्थः
द्रव्ययज्ञाः - द्रव्यविनियोगरूपेषु यज्ञान् कृतवन्तः
तपोयज्ञाः - तपस्विनः
योगयज्ञाः – अष्टाङ्गयोगरूपेषु यज्ञान् कृतवन्तः
तथा - तथा
अपरे - अन्ये
स्वाध्यायज्ञानयज्ञाः - वेदाध्ययनरूपेषु यज्ञान् कृतवन्तः
च-च
यतयः - यत्नशीलाः
संशितव्रताः - तीव्रव्रताः

अन्वयः
अपरे द्रव्ययज्ञाः तपोयज्ञाः योगयज्ञाः (अपरे) तथा स्वाध्यायज्ञानयज्ञाः च यतयः संशितव्रताः (भवन्ति)।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये अष्टाविंशतितमः शल्गोकः। भगवान श्रीकृष्णः "तीर्थेषु यज्ञबुद्ध्या द्रव्यविनियोगं ये कुर्वन्ति ते द्रव्ययज्ञाः | तपस्विनः तपोयज्ञाः । प्रणायाम प्रत्याहारादिलक्षणो योगः यज्ञः येषां ते योगयज्ञाः | शास्त्रार्थपरिज्ञानं यज्ञो तेषां ते जानयज्ञाः | एते यतयः संशितव्रताः (भवन्ति) |" एवम अवदत् |

व्याकरणम्
सन्धिः
द्रव्ययज्ञाः + तपोयज्ञाः - विसर्गसकारः
योगयज्ञाः +तथा -विसर्गसकारः
तथा + अपरे - सवर्णदीर्घसन्धिः
स्वाध्यायज्ञानयज्ञाः + च- विसर्गसकारः

Downloaded from www.omkaravidya.com

समासः
द्रव्येम् एव यज्ञः येषां ते - द्रव्ययज्ञाः - समानाधिकरणबहुव्रीहिसमासः
तपः एव यज्ञः येषां ते -तपोयज्ञाः - समानाधिकरणबहुव्रीहिसमासः
योगः एव यज्ञः येषां ते -योगयज्ञाः - समानाधिकरणबहुव्रीहिसमासः
स्वाध्यायज्ञानम् एव यज्ञः येषां ते -स्वाध्यायज्ञानयज्ञाः
समानाधिकरणबहुव्रीहिसमासः
संशितानि व्रतानि येषां तेः - संशिव्रताः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

अपाने जह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्रणायामपरायणाः ॥४.२९॥

पदच्छेदः
अपाने जह्वति प्राणं प्राणे अपानं तथा अपरे प्राणापानगती रुद्ध्वा प्रणायामपरायणाः

पदपरिचयः
अपाने - अकार पु स एक
जह्वति - लट् प्रपु बहु
प्राणं - अकार पु द्वि एक
प्राणे - अकार पु स एक
अपानं - अकार पु द्वि एक
तथा - अव्ययम्
अपरे - अकार पु प्र बहु
प्राणापानगती - ईकार स्त्री द्वि द्वि

Downloaded from www.omkaravidya.com

रुद्ध्वा - क्त्वान्तम्
प्रणायामपरायणाः अकार पु प्र बहु

पदार्थः
अपाने - अपान वायौ
जह्वति - समर्पयन्ति
प्राणं - प्राणवायुम्
प्राणे - प्राण वायौ
अपानं - अपानवायुम्
तथा - एवम्
अपरे - अन्ये
प्राणापानगती - प्राणापानगती
रुद्ध्वा – निरुध्य
प्रणायामपरायणाः - प्रणायामतत्पराः

अन्वयः
प्रणायामपरायणाः अपरे प्राणापानगती रुद्ध्वा अपाने प्राणं जह्वति तथा
प्राणे अपानं (जह्वति) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये नवविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "प्रणायामतत्पराः अपरे मुखनासिकाभ्यां वायोः निर्गमनं प्राणस्य गतिः रुद्ध्वा अपाने प्राणं जुह्वति । तथा अपरे प्राणे अपानम् जुह्वति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
प्राणे + अपानम् - पूर्वरूपसन्धिः
तथा + अपरे - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

समासः
प्राणः च अपानः च प्राणापानौ - इतरेतरद्वन्द्वसमासः
तयोः गतिः - प्राणापानगतिः - षष्ठीतत्पुरुषः
प्राणायामः परायणं येषां ते - प्राणायामपरायणाः - समानाधिकरणबहुव्रीहिसमासः

कृदन्ताः
रुद्ध्वा - रुध् + क्त्वा

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥४.३०॥

पदच्छेदः
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति सर्वे अपि एते यज्ञविदः यज्ञक्षपितकल्मषाः

पदपरिचयः
अपरे - अकार. पु प्र बहु
नियताहाराः - अकार. पु प्र बहु
प्राणान् - अकार. पु दवि बहु
प्राणेषु - अकार. पु स बहु
जुह्वति - लट् प्रपु बहु
सर्वे - अकार. पु प्र बहु

Downloaded from www.omkaravidya.com

अपि - अव्ययम्
एते - दकार. पु प्र बहु
यज्ञविदः - दकार. पु प्र बहु
यज्ञक्षपितकल्मषाः - अकार. पु प्र बहु

पदार्थः
अपरे - अन्ये
नियताहाराः - नियतः परिमित आहाराः
प्राणान् - प्राणान्
प्राणेषु - प्राणेषु
जुह्वति - प्रक्षिपन्ति
सर्वे - अन्ये
अपि - अपि
एते - एते
यज्ञविदः - यज्ञवेत्तरः
यज्ञक्षपितकल्मषाः - यज्ञनाशितपापाः

अन्वयः
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति । एते सर्वे अपि यज्ञविदः यज्ञक्षपितकल्मषाः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये त्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "अपरे नियताहाराः वायुभेदान् प्राणेषु एव जुहवति । एते सर्वे अपि यज्ञविदः यज्ञद्वारेण तेषां पापं नाशिताः । अतः यज्ञक्षपितकल्मषाः ।" इति अवदत् ।

व्याकरणम्

Downloaded from www.omkaravidya.com

सन्धिः
सर्वे + अपि - पूर्वरूपसन्धिः
अपि + एते - यण्सन्धिः
यज्ञविदः + यज्ञक्षपितकल्मषाः - विसर्गउकारः

समासः
नियतः आहारः येषां ते - नियताहाराः - समानाधिकरणबहुव्रीहिः
यज्ञेन क्षपित कल्मषः येषां ते - यज्ञक्षपितकल्मषाः- तृतीयातत्पुरुषान्तर्गत-व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥४.३१॥

पदच्छेदः
यज्ञशिष्टामृतभुजः यान्ति ब्रह्म सनातनम् न अयं लोकः अस्ति अयज्ञस्य कुतः अन्यः कुरुसत्तम

पदपरिचयः
यज्ञशिष्टामृतभुजः - जकार पु प्र बहु
यान्ति - लट् प्रपु बहु
ब्रह्म - नकार नपु द्वि एक
सनातनम् - अकार नपु द्वि एक
न - अव्ययम्

Downloaded from www.omkaravidya.com

अयं - मकार पु प्र एक
लोकः - अकार पु प्र एक
अस्ति - लट् प्रपु एक
अयज्ञस्य - अकार पु ष एक
कुतः - अव्ययम्
अन्यः - अकार पु प्र एक
कुरुसत्तम - अकार पु सं प्र एक

पदार्थः
यज्ञशिष्टामृतभुजः – यज्ञे सुधातुल्यं शिष्टम् भुञ्जानाः
यान्ति - प्राप्नुवन्ति
ब्रह्म - ब्रह्म
सनातनम् - चिरन्तनम्
न-न
अयं - अयम्
लोकः - लोकः
अस्ति - अस्ति
अयज्ञस्य – यज्ञरहितस्य
कुतः - कुत्र
अन्यः - परलोकः
कुरुसत्तम - कुरुषु श्रेष्ठः

अन्वयः
यज्ञशिष्टामृतभुजः सनातनम् ब्रह्म यान्ति । हे कुरुसत्तम! अयज्ञस्य अयं लोकः नास्ति । अन्यः कुतः (अस्ति) ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये एकत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः “यज्ञानाम् शिष्टम् यज्ञशिष्टम्। तत् अमृतम्। ये यज्ञशिष्टामृतं भुञ्जते ते यज्ञशिष्टामृतभुजः। ते सनातनं ब्रह्म यान्ति । हे कुरुषु श्रेष्ठः ! अयज्ञस्य अयं लोकः नास्ति। कुतः अन्य विशिष्टसाधनसाध्यः ?” इति अवदत्।

व्याकरणम्

सन्धिः

यज्ञशिष्टामृतभुजः + यान्ति - विसर्गउकारः

न + अयं - सवर्णदीर्घसन्धिः

लोकः + अस्ति - विसर्गउकारः पूर्वरूपसन्धिः

अस्ति + अयजस्य - यण्सन्धिः

कुतः + अन्यः - विसर्गउकारः पूर्वरूपसन्धिः

समासः

यज्ञानाम् शिष्टम् - यज्ञशिष्टम् - षष्ठीतत्पुरुषः

यज्ञशिष्टम् एव अमृतम् - यज्ञशिष्टामृतम् अवधारणापूर्वपदकर्मधारयसमासः

यज्ञशिष्टामृतम् भुञ्जते इति यज्ञशिष्टामृतभुजः उपपदसमासः

अयज्ञः - न विद्यते यज्ञः यस्य सः - नञ् बहुव्रीहिः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

एवं बहुविधायज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥४.३२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
एवं बहुविधाः यज्ञाः विततः ब्रह्मणः मुखे कर्मजान् विद्धि तान् सर्वान् एवं ज्ञात्वा विमोक्ष्यसे

पदपरिचयः
एवम् - अव्ययम्
बहुविधाः - अकार पु प्र बहु
यज्ञाः - अकार पु प्र बहु
वितता: - अकार पु प्र बहु
ब्रह्मणः - नकार पु ष एक
मुखे- अकार नपु स एक
कर्मजान् - अकार पु दवि बहु
विद्धि - लोट् मपु एक
तान् - दकार पु द्वि बहु
सर्वान् - अकार पु द्वि बहु
ज्ञात्वा - क्त्वान्तम्
एवं - अव्ययम्
विमोक्ष्यसे - वि+मुच्+ ऌट् मपु एक

पदार्थः
एवं - इत्थम्
बहुविधाः - अनेकप्रकाराः
यज्ञाः - यागाः
वितता: - विस्तीर्णाः
ब्रह्मणः - वेदस्य
मुखे - वक्त्रे
कर्मजान् - कायिकवाक्मानसकर्मोद्भवान्
विद्धि - जानीहि

Downloaded from www.omkaravidya.com

तान् - तान्
सर्वान् - सकलान्
ज्ञात्वा - विदित्वाएवं - एवम्
विक्ष्यसे - विमोक्ष्यसे

अन्वयः
एवं बहुविधा यज्ञाः ब्रह्मणः मुखे वितताः । तान् सर्वान् कर्मजान् विद्धि । एवम् ज्ञात्वा विमोक्ष्यसे ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये दवात्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "एवं बहुविधाः यज्ञाः वेदस्य द्वारे विस्तीर्णाः । कर्मजान् तान् सर्वान् अनात्मज्ञानं इति विद्धि । आत्मा निर्व्यापारः । अतः एवं ज्ञात्वा अशुभात् विमोक्ष्यसे ।" इति अवदत् ।

व्याकरणम्
सन्धिः
बहुविधाः + यज्ञाः - विसर्गलोपः
वितताः +ब्रह्मणः - विसर्गलोपः
यज्ञाः + वितताः - विसर्गलोपः
ब्रह्मणः + मुखे- विसर्गउकारः

कृदन्ताः
ज्ञात्वा - ज्ञा + कत्वा प्रत्ययः

समासः
बहुविधाः - विधानं बहुलम् – अव्ययीभावसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ४.३३॥

पदच्छेदः
श्रेयान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः परन्तप सर्वं कर्म अखिलं पार्थ ज्ञाने परिसमाप्यते

पदपरिचयः
श्रेयान् - सकार. पु प्र एक
द्रव्यमयात् - अकार पु प एक
यज्ञात् - अकार पु प एक
ज्ञानयज्ञः - अकार पु प्र एक
परन्तप - अकार पु सं प्र
सर्वं - अकार नपु प्र एक
कर्म - नकार नपु प्र एक
अखिलं - अकार नपु प्र एक
पार्थ - अकार पु सं प्र
ज्ञाने - अकार नपु स एक
परिसमाप्यते - परि + सम् + आप् + कर्मणि लट् प्रपु एक

पदार्थः
श्रेयान् - वरीयान्
द्रव्यमयात् - द्रव्यसाधनसाध्यात्
यज्ञात् - यागात्

Downloaded from www.omkaravidya.com

ज्ञानयज्ञः - आत्मज्ञानयज्ञः
परन्तप - शत्रुतापक
सर्वं - समस्तम्
कर्म - कर्म
अखिलं - सकलम्
पार्थ - अर्जुन
ज्ञाने – ब्रह्मज्ञाने
परिसमाप्यते - अन्तर्भवति

अन्वयः
हे परन्तप! द्रव्यमयात् यज्ञात् ज्ञानयज्ञः श्रेयान् । हे पार्थे! सर्वं अखिलं कर्म ज्ञाने परिसमाप्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये त्रयस्त्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः “हे परन्तप! द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः श्रेयान् । द्रव्यमयो यजः फलस्य आरम्भकः | जानयज्ञः न फलारम्भकः | अतः ज्ञानयज्ञः श्रेष्ठः । हे पार्थ ! ईश्वरार्पितं बुद्धया कृतं कर्म ब्रह्म ज्ञाने परिसमाप्यते |” इति  अवदत् |

व्याकरणम्
सन्धिः
द्रव्यमयात् + यज्ञात् - जश्त्वसन्धिः
यज्ञात् + ज्ञानयज्ञः - जश्त्वसन्धिः श्चुत्वसन्धिः
कर्म + अखिलम् - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ४.३४॥

पदच्छेदः
तत् विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः

पदपरिचयः
तत् - दकार नपु द्वि एक
विद्धि - लोट् मपु एक
प्रणिपातेन - अकार पु तृ एक
परिप्रश्नेन - अकार पु तृ एक
सेवया - आकार स्त्री तृ एक
उपदेक्ष्यन्ति - उप + दृश् + लृट् प्रपु बहु
ते - दकार पु च एक
ज्ञानं - अकार नपु द्वि एक
ज्ञानिनः - नकार पु प्र बहु
तत्त्वदर्शिनः - नकार पु प्र बहु

पदार्थः
तत् - तत्
विद्धि - जानीहि
प्रणिपातेन - नमस्कारेण
परिप्रश्नेन - नानाविधप्रश्नेन
सेवया - गुरुशुश्रूषया

Downloaded from www.omkaravidya.com

उपदेक्ष्यन्ति - कथयिष्यन्ति
ते - तुभ्यम्
ज्ञानं - ज्ञानम्
ज्ञानिनः - आत्मज्ञानिनः
तत्त्वदर्शिनः - संयग्दर्शिनः

अन्वयः
तत्त्वदर्शिनः ज्ञानिनः (यत्) ज्ञानं ते उपदेक्ष्यन्ति तत् प्रणिपातेन परिप्रश्नेन सेवया विद्धि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये चतुस्त्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "तत्त्वदर्शिनः जानिनः यत् ब्रहमजानं तुभ्यं कथयिष्यन्ति तत् ज्ञानम् दीर्घनमस्कारेण परिप्रश्नेन गुरुशुश्रूषया जानीहि ।"इति अवदत् ।

व्याकरणम्
सन्धिः
तत् + विद्धि - जश्त्वसन्धिः
ज्ञानिनः + तत्त्वदर्शिनः - विसर्गसकारः

समासः
तत्त्वं पश्यन्ति इति तत्त्वदर्शिनः - उपपदसमासः
परिप्रश्नेन – प्रादिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥४.३५॥

पदच्छेदः
यत् ज्ञात्वा न पुनः मोहं एवं यास्यसि पाण्डव येन भूतानि अशेषेण द्रक्ष्यसि आत्मनि अथः मयि

पदपरिचयः
यत् - दकार. नपु द्वि एक
ज्ञात्वा - क्त्वान्तम्
न - अव्ययम्
पुनः - अव्ययम्
मोहं - अकार. पु द्वि एक
एवं - अव्ययम् यास्यसि - लृट् मपु एक
पाण्डव - अकार पु सं प्र
येन - दकार. पु तृ एक
भूतानि - अकार. नपु द्वि बहु
अशेषेण - अकार. नपु तृ एक
द्रक्ष्यसि - लृट् मपु एक
आत्मनि - नकार. पु स एक
अथः - अव्ययम्
मयि - दकार. त्रि स एक

Downloaded from www.omkaravidya.com

पदार्थः
यत् - यत् ज्ञानम्
ज्ञात्वा - विज्ञाय
न-न
पुनः - भूयः
मोहं - अविवेकम्
एवं - इत्थम्
यास्यसि - गमिष्यसि
पाण्डव - अर्जुन
येन - येन
भूतानि - प्राणिनः
अशेषेण - अखिलेन
द्रक्ष्यसि - पश्यसि
आत्मनि - आत्मनि
अथो - अथः
मयि - भगवति (ईश्वरे)

अन्वयः
हे पाण्डव! यत् ज्ञात्वा पुनः एवम् मोहं न यास्यसि येन भूतानि आत्मनि अशेषेण द्रक्ष्यसि । अथः मयि (द्रक्ष्यसि) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये पञ्चत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः अस्मिन् श्लोके ज्ञानस्य फलम् अवदत् । "हे पाण्डव ! यत् ज्ञात्वा पुनः एवम् मोहं न यास्यसि येन भूतानि आत्मनि अशेषेण द्रक्ष्यसि । अथः मयि (द्रक्ष्यसि) ।" इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
यत् + ज्ञात्वा - श्चुत्वसन्धिः जश्त्वसन्धिः
पुनः + मोहम् - विसर्गरेफः
भूतानि + अशेषेण - यण्सन्धिः
द्रक्ष्यसि + आत्मनि - यण्सन्धिः
आत्मनि + अथो - यण्सन्धिः
अथः + मयि - विसर्गउकारः

कृदन्ताः
ज्ञात्वा – ज्ञा + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ४.३६॥

पदच्छेदः
अपि चेत् असि पापेभ्यः सर्वेभ्यः पापकृत्तमः सर्वं जानप्लवेन एव वृजिनं सन्तरिष्यसि

पदपरिचयः
अपि - अव्ययम्
चेत् - अव्ययम्
असि - लट् मपु एक
पापेभ्यः - अकार नपु प बहु

Downloaded from www.omkaravidya.com

सर्वेभ्यः - अकार नपु प बहु
पापकृत्तमः - अकार पु प्र एक
सर्वम् - अकार नपु द्वि एक
ज्ञानप्लुवेन - अकार पु तृ एक
एव - अव्ययम्
वृजिनं - अकार नपु द्वि एक
सन्तरिष्यसि - सम् + तृ + लृट् मपु एक

पदार्थः
अपि - अपि
चेत् - चेत्
असि - भवसि
पापेभ्यः - पापकृदभ्यः
सर्वेभ्यः - सकलेभ्यः
पापकृत्तम- पापिष्ठः
सर्वं - अखिलम्
ज्ञानप्लुवेन – ज्ञानोडुपेन
एव -एव
वृजिनं - वृजिनार्णवम्
सन्तरिष्यसि - अतिक्रमिष्यसि

अन्वयः

सर्वेभ्यः पापेभ्यः पापकृत्तमः अपि असि चेत् ज्ञानप्लुवेन एव सर्व वृजिनं सन्तरिष्यसि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवदगीतायां चतुर्थे अध्याये षड्विंशत्तमः श्लोकः। भगवान् श्रीकृष्णः “सर्वेभ्यः पापकृद्भ्यः त्वम् अतिशयेन पापकृत् असि चेत् सर्वं जानप्लुवेन एव वृजिनार्णवम् सन्तरिष्यसि ।” इति अवदत् ।

व्याकरणम्
सन्धिः
चेत् + असि - जश्त्वसन्धिः
ज्ञानप्लुवेन + एव - वृद्धिसन्धिः

समासः
पापं करोति इति पापकृत् - उपपदसमासः
ज्ञानम् एव प्लुवम् - ज्ञानप्लुवम् - अवधारणपूर्वपदकर्मधारयसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥४.३७॥

पदच्छेदः
यथा एधांसि समिद्धः अग्निः भस्मसात् कुरुते अर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा

Downloaded from www.omkaravidya.com

पदपरिचयः
यथा - अव्ययम्
एधांसि - सकार नपु द्वि एक
समिद्धः - अकार पु प्र एक
अग्निः - इकार पु प्र एक
भस्मसात् - अव्ययम्
कुरुते - लट् प्रपु एक
अर्जुन - अकार पु सं प्र एक
ज्ञानाग्निः - इकार पु प्र एक
सर्वकर्माणि - नकार नपु दवि बहु
भस्मसात् - अव्ययम्
कुरुते - लट् प्रपु एक
तथा - अव्ययम्

पदार्थः
यथा - यथा
एधांसि - काष्ठानि
समिद्धः - सम्यग् इद्धो दीप्तः
अग्निः - अनलः
भस्मसात् - भस्मीभावम्
कुरुते - करोति
अर्जुन - अर्जुन
ज्ञानाग्निः -ज्ञानाग्निः
सर्वकर्माणि - सकलकर्माणि
भस्मसात् - भस्मीभावम्
कुरुते - करोति
तथा - तथा

Downloaded from www.omkaravidya.com

अन्वयः
हे अर्जुन! यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये सप्तत्रिंशत्तमः श्लोकः। भगवान् श्री कृष्णः “हे अर्जुन यथा एधांसि काष्ठानि समिद्धः सम्यग् इद्धा दीप्तः अग्निः भस्मीभावं कुरुते तथा ज्ञानाग्निः सर्वकर्माणि भस्मिभावं कुरुते । निर्बीजम् कुरुते । “ इति अवदत् ।

व्याकरणम्
सन्धिः
यथा + एधांसि - वृद्धिसन्धिः
समिद्धः + अग्निः- विसर्गउकारः पूर्वरूपसन्धिः
कुरुते + अर्जुन - पूर्वरूपसन्धिः

समासः
ज्ञानाग्निः - जानम् एव अग्निः - अवधारणापूर्वपदकर्मधारयसमासः
सर्वकर्माणि – सर्वाणि च कर्माणि च – कर्मधारयसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ४.३८॥

Downloaded from www.omkaravidya.com

पदच्छेदः
न हि ज्ञानेन सदृशं पवित्रम् इह विद्यते तत् स्वयं योगसंसिद्धः कालेन आत्मनि विन्दति

पदपरिचयः
न - अव्ययम्
हि - अव्ययम्
ज्ञानेन - अकार नपु तृ एक
सदृशं - अकार नपु प्र एक
पवित्रम् - अकार नपु प्र एक
इह - अव्ययम्
विद्यते - लट् प्रपु एक
तत् - दकार नपु द्वि एक
स्वयं - अव्ययम्
योगसंसिद्धः - अकार पु प्र एक
कालेन - अकार पु तृ एक
आत्मनि - नकार पु स. एक
विन्दति - लट् प्रपु एक

पदार्थः
न-न
हि- हि
ज्ञानेन – ज्ञानेन
सदृशं - तुल्यम्
पवित्रम् - पावनम्
इह - अत्र
विद्यते - अस्ति
तत् - तत्

Downloaded from www.omkaravidya.com

स्वयं - स्वयम्
योगसंसिद्धः - योगनिष्ठः
कालेन - समयेन
आत्मनि - आत्मनि
विन्दति - लभते

अन्वयः
ज्ञानेन सदृशं पवित्रम् इह न विद्यते तत् स्वयं योगसंसिद्धः कालेन आत्मनि विन्दति।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये अष्टात्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "इह ज्ञानेन तुल्यं पावनम् न विद्यते। योगसंसिद्धः कर्मयोगेन समाधियोगेन च संसिद्धः महता कालेन आत्मानि तत् ज्ञानं लभते।" इति अवदत्।

व्याकरणम्
सन्धिः
कालेन + आत्मनि - सवर्णदीर्घसन्धिः

समासः
योगे संसिद्धः यस्य सः योगसंसिद्धः - व्यधिकरणबहु व्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥४.३९॥

पदच्छेदः

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ज्ञानं लब्ध्वा परां शान्तिम् अचिरेण अधिगच्छति

पदपरिचयः
श्रद्धावान् - तकार पु प्र एक
लभते - लट् प्रपु एक
ज्ञानम् - अकार नपु द्वि एक
तत्परः - अकार पु प्र एक
संयतेन्द्रियः - अकार पु प्र एक
ज्ञानं - अकार नपु द्वि एक
परां - आकार स्त्री द्वि एक
अचिरेण - अव्ययम्
लब्ध्वा - क्त्वान्तम्
शान्तिम् - इकार स्त्री दवि एक
अधिगच्छति - अधि + गम् लट् प्रपु एक

पदार्थः
श्रद्धावान् - श्रद्धालुः

Downloaded from www.omkaravidya.com

लभते - प्राप्नोति
ज्ञानं – ब्रह्मज्ञानम्
तत्परः – ज्ञानपरः
संयतेन्द्रियः - जितेन्द्रियः
ज्ञानं - ज्ञानम्
लब्ध्वा - प्राप्य
परां - श्रेष्ठाम् शान्तिम् - उपरतिं
अचिरेण - शीघ्रम् अधिगच्छति - प्राप्नोति

अन्वयः
श्रद्धावान् तत्परः संयतेन्द्रियः ज्ञानं लभते | ज्ञानं लब्ध्वा परां शान्तिम् अचिरेण अधिगच्छति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये नवत्रिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "श्रद्धावान् - वेदशास्त्रमेव प्रमाणं एवम् अनुसरति । श्रद्धावान् आत्मज्ञानं लभते | अतः तत् एव परम् इति अनुसरति | सः संयतेन्द्रियः | ज्ञानं लब्ध्वा परां शान्तिं (मोक्षम्) अचिरेण प्राप्नोति |" इति अवदत् |

व्याकरणम्
सन्धिः
श्रद्धावान् + लभते - परसवर्णसन्धिः
अचिरेण + अधिगच्छति - सवर्णदीर्घसन्धिः

समासः
तत्परः - तत् एव परम् येन सः समानाधिकरणबहुव्रीहिसमासः
संयतेन्द्रियः - संयतानि इन्द्रियाणि येन सः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

कृदन्ताः
लब्ध्वा - लभ् + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४.४०॥

पदच्छेदः
अज्ञः च अश्रद्दधानः च संशयात्मा विनश्यति न अयं लोकः अस्ति न परः न सुखं संशयात्मनः

पदपरिचयः
अजः - अकार पु प्र एक
च - अव्ययम्
अश्रद्दधानः अकार पु प्र एक
च - अव्ययम्
संशयात्मा - नकार पु प्र एक
विनश्यति - लट् प्रपु एक
न - अव्ययम्
अयं - मकार पु प्र एक
लोकः - अकार पु प्र एक
अस्ति - लट् प्रपु एक
न - अव्ययम्
परः - अकार पु प्र एक
न - अव्ययम्

Downloaded from www.omkaravidya.com

सुखं - अकार नपु प्र एक
पदार्थः
अज्ञः - अनात्मज्ञः
च-च
अश्रद्दधानः - विश्वासरहितः
च-च
संशयात्मा - संशयमनस्कः
संशयात्मनः- नकार पु ष एक
विनश्यति - नश्यति
न-न
अयं - अयम्
लोकः - लोकः
अस्ति - अस्ति
परः - परलोकः
सुखं - सन्तोषः
संशयात्मनः - संशयचित्तस्य

अन्वयः
अज्ञः च अश्रद्दधानः च संशयात्मा विनश्यति। संशयात्मनः अयं लोकः नास्ति। परः (परलोकः) न (अस्ति) सुखं न (अस्ति)।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये चत्वारिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "आत्मतत्वम् अज्ञातवान् अज्ञः। अज्ञः विश्वासरहितः संशयात्मा च स्वस्य जीवनं विनश्यति। संशयात्मनः अयं लोकः नास्ति। परलोकः अपि नास्ति। तस्य सुखं नास्ति।" इति अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
अज्ञः + च - विसर्गसकारः
अश्रद्दधानः + च - विसर्गसकारः
न + अयम् - सवर्णदीर्घसन्धिः
लोकः + अस्ति - विसर्गउकारः पूर्वरूपसन्धिः
परः + न - विसर्गउकारः

समासः
अज्ञः - न ज्ञः - नञ्तत्पुरुषः
अश्रद्दधानः - न श्रद्दधानः - नञ्तत्पुरुषः
संशयः आत्मनि यस्य सः - व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४.४१॥

पदच्छेदः
योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय

पदपरिचयः
योगसंन्यस्तकर्माणं - अकार पु द्वि एक
ज्ञानसञ्छिन्नसंशयम् - अकार पु द्वि एक
आत्मवन्तं - तकार पु द्वि एक
न - अव्ययम्

Downloaded from www.omkaravidya.com

कर्माणि - नकार नपु प्र बहु
निबध्नन्ति - लट् प्रपु बहु
धनञ्जय - अकार पु सं प्र

पदार्थः
योगसंन्यस्तकर्माणं – आत्मज्ञान संत्यक्तकर्माणम्
ज्ञानसञ्छिन्नसंशयम् - आत्मज्ञानविनष्टसन्देहम्
आत्मवन्तं - आत्मनिष्ठम्
न-न
कर्माणि - कर्माणि
निबध्नन्ति - लिम्पन्ति
धनञ्जय - अर्जुन

अन्वयः
हे धनञ्जय! योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् आत्मवन्तं कर्माणि न निबध्नन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये एकचत्वारिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः "हे धनञ्जय! फलेच्छारहितेन ईश्वरबुद्ध्या कृतं कर्मयोगिनम् ब्रह्मज्ञानेन सर्वसंशयरहितम् आत्मवन्तम् कर्माणि न निबध्नन्ति ।" इति अवदत् ।

व्याकरणम्
सन्धिः
योगसंन्यस्तकर्माणं + ज्ञानसञ्छिन्नसंशयम् - अनुस्वारसन्धिः
आत्मवन्तं + न - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

समासः
योगेन संन्यस्तम् कर्माणं येन सः - योगसंन्यस्तकर्माणं – तृतीयातत्पुरुषान्तर्गत-व्यधिकरणबहुव्रीहिसमासः
ज्ञानेन संञ्छिन्न संशयः येन सः - ज्ञानसञ्छिन्नसंशयम् - तृतीयातत्पुरुषान्तर्गत-व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४.४२॥

पदच्छेदः
तस्मात् अज्ञानसंभूतं हृत्स्थं ज्ञानासिना आत्मनः छित्त्वा एनं संशयं योगम् आतिष्ठ उत्तिष्ठ भारत

पदपरिचयः
तस्मात् - दकार पु प एक
अज्ञानसंभूतं - अकार पु द्वि एक
हृत्स्थं - अकार पु द्वि एक
ज्ञानासिना - इकार पु तृ एक
आत्मनः नकार नपु ष एक
छित्त्वा - क्त्वान्तम्
एनं - दकार पु द्वि एक
संशयं - अकार पु द्वि एक
योगम् - अकार पु द्वि एक
आतिष्ठ - लोट् मपु एक

Downloaded from www.omkaravidya.com

उत्तिष्ठ - लोट् मपु एक
भारत - अकार पु सं प्र

पदार्थः
तस्मात् - तस्मात्
अज्ञानसंभूतं - अविवेकात् जातम्
हृत्स्थं - हृदि बुद्धौस्थितम्
ज्ञानासिना – ज्ञानाखड्गेन
आत्मनः - स्वस्य
छित्त्वा - विदार्य
एनं - अमुम्
संशयं - सन्देहम्
योगम् - योगम्
आतिष्ठ - अनुष्ठानं कुरु
उत्तिष्ठ - उत्तिष्ठ
भारत - अर्जुन

अन्वयः
हे भारत ! तस्मात् आत्मनः हृत्स्थं अज्ञानसंभूतं एनं संशयं ज्ञानासिना छित्त्वा योगम् आतिष्ठ ! उत्तिष्ठ ! ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां चतुर्थे अध्याये द्वाचत्वारिंशत्तमः श्लोकः। भगवान् श्रीकृष्णः “हे भारत ! तस्मात् तव हृत्स्थं अविवेकात् जातम् एनं संशयं ज्ञानासिना छित्त्वा कर्मयोगम् अनुष्ठानं कुरु! युद्धाय उत्तिष्ठ ।” इति अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्
सन्धिः
तस्मात् + अज्ञानसंभूतं - जश्त्वसन्धिः
ज्ञानासिना + आत्मनः - सवर्णदीर्घसन्धिः
छित्त्वा + एनं - वृद्धिसन्धिः
आतिष्ठ + उत्तिष्ठ - गुणसन्धिः

समासः
अज्ञानात् संभूतः - पञ्चमीतत्पुरुषः तम् अज्ञानसंभूतम्
हृदि तिष्ठति इति हृत्स्थः - उपपदसमासः तम् हत्स्थम्
ज्ञानम् एव असिः - ज्ञानासिः - अवधारणापूर्वपदकर्मधारयसमासः

कृदन्ताः
छित्त्वा - छिदिर् + क्त्वा प्रत्ययः

तद्धितान्ताः
भरतस्य गोत्रापत्यम् पुमान् भारतः

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगः नाम चतुर्थः अध्यायः

Downloaded from www.omkaravidya.com

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे- अकार. पु. स. एक
ज्ञानकर्मसंन्यासयोगः - अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
चतुर्थः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ – ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवदगीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे- श्रीकृष्णर्जुनयोः मध्ये संवादे
ज्ञानकर्मसंन्यासयोगः - ज्ञानकर्मसंन्यासयोगः
नाम - नाम

Downloaded from www.omkaravidya.com

चतुर्थः - चतुर्थः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगः नामः चतुर्थः अध्यायः (संपूर्णम् भवति)

तात्पर्यम्
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगः नामः चतुर्थः अध्यायः (संपूर्णम् भवति)

व्याकरणम्
सन्धिः
सत् + इति - जश्त्वसन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगः + नामः - विसर्गउकारः
चतुर्थः + अध्यायः - विसर्गउकारः पूर्वरूपसन्धिः

समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोगः

भगवान् श्रीकृष्णः एवम् उक्तवान् ।

इमं अव्ययं योगम् अहम् पूर्वं सूर्याय उक्तवान् । ततः सूर्यः स्वस्य कुमाराय वैवस्वताय उक्तवान् । वैवस्वतः अपि स्वस्य कुमाराय आदिराज्ञे इक्ष्वाकवे अब्रवीत् । हे परन्तप! एवम् इमं योगं क्षत्रियपरम्पराप्राप्तं राजर्षयः ज्ञातवन्तः । महता दीर्घेण कालेन सः योगः अस्मिन् लोके नाशम् अभवत् । त्वं मम भक्तः सखा च असि । अतः इदानीं मया तुभ्यं सः एव अयं पुरातनः योगः प्रोक्तः । यस्मात् इदं ज्ञानं रहस्यम् उत्तमम् च ।

अर्जुनः भगवान् श्रीकृष्णम् एवं पृष्टवान् ।

भवतः जन्म वासुदेवगृहे अपरमासीत् । परन्तु सूर्यस्य जन्म बहु पूर्वकाले आसीत् । भवान् पूर्वकाले सूर्याय एनं योगं प्रोक्तवान् इति अहं कथम् विजानीयाम्?

भगवान् श्रीकृष्णः एवम् उक्तवान् ।

हे अर्जुन! मम तव च बहूनि जन्मानि अतिक्रान्तानि । अहं तानि सर्वाणि जाने । संसारबन्धकारणेन त्वं न जानीषे । हे परन्तप! पुनरहं नित्यशुद्धमुक्तस्वभावत्वात् अनावरणज्ञानशक्तिः इति वेद । जन्मरहितः अपि सन् अव्ययात्मा अपि सन् तथा भूतानाम् ईश्वरः अपि सन् प्रकृतिं स्वां वशीकृत्य देहवान् इव आत्ममायया जातः इव भवति । हे भारत ! यदा यदा हि वर्णश्रमादि लक्षणस्य प्राणिनाम् हानिः भवति अधर्मस्य अभिवृद्धिः भवति तदा अहं मायया आत्मानं सृजामि । सन्मार्गस्थानां परिरक्षणाय पापकारिणां विनाशाय च धर्मसंस्थापनार्थाय युगे युगे अहम् अवतरामि । हे अर्जुन! मम मायारूपं जन्म कर्म च साधुपरित्राणादि अप्राकृतम् ऐश्वरं यथोक्तं तत्त्वतः यः वत्ति सः इमं देहं त्यक्तवा पुनरुत्पत्तिं न प्राप्नोति । सः माम् प्राप्नोति । सः मोक्षं प्राप्नोति ।

Downloaded from www.omkaravidya.com

वीतरागभयक्रोधाः ईश्वराभेददर्शिनः मामेव परमेश्वरम् उपाश्रिताः अनेके ज्ञानतपसा परां शुद्धिं गताः सन्तो मोक्षं समनुप्राप्ताः। हे पार्थ! ये यथा येन फलार्थितया माम् प्रपद्यन्ते तथा एव तान् अहं अनुगृह्णामि । मनुष्याः सर्वदा अपि ईश्वरस्य मम मार्गं सर्वप्रकारैः अनुवर्तन्ते। अस्मिन् लोके अभीप्सन्तः कर्मणां सिद्धिं फलनिष्पत्तिं इन्द्राग्न्याद्यः प्रार्थयन्ते। यतः मनुष्यलोके शास्त्राधिकारः तेषां भिन्नदेवतायाजिनां फलसिद्धिः शीघ्रं भवति। ईश्वरेण मया सत्वरजस्तमांसि गुणाः च कर्मविभागशः अनुसृत्य चतुर्विधवर्णाः सृष्टम्। यद्यपि मायासंव्यवाहारेण तस्य कर्मणः कर्तारं अपि सन्तम् मां अकर्तारम् असंसारिणम् च एवं विद्धि ।

अहङ्काराभावात् तानि कर्माणि माम् न लिम्पन्ति । तेषां कर्मणां फलेषु मह्यं तृष्णा नास्ति । येषां संसारिणाम् 'अहं कर्ता' इति अभिमानः कर्मसु तत् फलेषु च तृष्णा अस्ति तान् कर्माणि लिम्पन्ति । इति यः एवं माम् आत्मतत्त्वेन जानाति सः कर्मभिः न बध्यते।

एवं ज्ञात्वा अतिक्रान्तैः मुमुक्षुभिः पूर्वैः अपि कर्म कृतम्। तेन न तूष्णीं आसन्। संन्यासः न अपि कर्तव्यः ।तस्मात् त्वं कर्म एव कुरु ।अत्र मेधाविनः अपि कर्मादिविषये किं कर्म किं अकर्म इति मोहङ्गताः। अतः तुभ्यम् अहं कर्म अकर्म विषये यत् ज्ञात्वा संसारात् (त्वं) मोक्ष्यसे तत् वदिष्यामि । शास्त्रविहितस्य कर्मणः ज्ञातव्यम् ।प्रतिषिद्धस्य विकर्मणः च ज्ञातव्यम्। तथा अकर्मणः च ज्ञातव्यम् यस्मात् कर्माकर्मविकर्मणां गतिः ज्ञातुं बहु कष्टम्। यः कर्मणि अकर्मभावं पश्येत् अकर्मणि च कर्मभावं पश्येत् सः बुद्धिमान्। सः मनुष्येषु युक्तः सः समस्तकर्मकृत्।

यस्य सर्वे समारम्भाः कामसङ्कल्परहिताः बुधाः जानाग्निना दग्धकर्माणं तम् पण्डितं इति वदन्ति। यः कर्मसु अभिमानं फलासङ्गं च त्यक्त्वा विषयेषु निराकाङ्क्षः निराश्रयः च कर्मणि अभिप्रवृत्तः अपि निष्क्रियात्मज्ञान-प्राप्तकारणात् सः किञ्चित् न करोति एव। यः निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः केवलं शारीरनिर्वर्त्यं कर्म कुर्वन् सः संसारं न प्राप्नोति। ज्ञानाग्निदग्धकर्मत्वात् अप्रतिबन्धेन मुच्यते।

Downloaded from www.omkaravidya.com

यदृच्छालाभेन सन्तुष्टः द्वन्द्वातीतः मत्सरगुणरहितः यदृच्छालाभस्य सिद्धौ असिद्धौ च तुल्यः कर्म कृत्वा अपि बद्धः न भवति। अभिमानाः त्यक्त्वा कामक्रोधादि त्यक्त्वा ज्ञानावस्थितचेतसः यज्ञनिवृत्यर्थम् आचरतः कर्म समग्रम् विनश्यति | अर्प्यते अनेन इति अर्पणम् तदपि ब्रह्म एव | अर्प्यमाणं हविः अपि ब्रह्म एव | ब्रह्माग्नौ यज्ञकर्त्री ब्रह्मणा कृतं होममपि ब्रह्म | तेन यज्ञ ब्रह्मकर्मसमाधिना प्राप्तम् फलमपि ब्रह्म एव | अपरे योगिनः इन्द्रादि देवान् यज्ञेन पर्युपासते | अपरे ब्रह्मविदः ब्रह्माग्नौ आत्मना एव आत्मानं समर्पयन्ति ।

अन्ये योगिनः श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति | अन्ये योगिनः शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति | अपरे ज्ञाननिष्ठाः सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपिते आत्मसंयमयोगाग्नौ प्रक्षिपन्ति | तीर्थेषु यज्ञबुद्धया द्रव्यविनियोगं ये कुर्वन्ति ते द्रव्ययज्ञाः | तपस्विनः तपोयज्ञाः | प्रणायाम प्रत्याहारादिलक्षणो योगः यज्ञः येषां ते योगयज्ञाः | शास्त्रार्थपरिज्ञानं यज्ञो तेषां ते ज्ञानयज्ञाः | एते यतयः संशितव्रताः (भवन्ति)। प्रणायामतत्पराः अपरे मुखनासिकाभ्यां वायोः निर्गमनं प्राणस्य गतिः रुद्ध्वा अपाने प्राणं जुह्वति | तथा अपरे प्राणे अपानम् जुह्वति | अपरे नियताहाराः वायुभेदान् प्राणेषु एव जुह्वति | एते सर्वे अपि यज्ञविदः यज्ञद्धारेण तेषां पापं नाशिताः | अतः यज्ञक्षपितकल्मषाः | यज्ञानाम् शिष्टम् यज्ञशिष्टम् | तत् अमृतम् । ये यज्ञशिष्टामृतं भुञ्जते ते यज्ञशिष्टामृतभुजः | ते सनातनं ब्रह्म यान्ति । हे कुरुषु श्रेष्ठः ! अयज्ञस्य अयं लोकः नास्ति | कुतः अन्य विशिष्टसाधनसाध्यः ? एवं बहु विधाः यज्ञाः वेदस्य द्वारे विस्तीर्णाः | कर्मजान् तान् सर्वान् अनात्मजानं इति विद्धि | आत्मा निर्व्यापारः | अतः एवं ज्ञात्वा अशुभात् विमोक्ष्यसे ।

हे परन्तप! द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः श्रेयान् । द्रव्यमयो यज्ञः फलस्य आरम्भकः | ज्ञानयज्ञः न फलारम्भकः | अतः ज्ञानयज्ञः श्रेष्ठः । हे पार्थ ! ईश्वरार्पितं बुद्धया कृतं कर्म ब्रह्म ज्ञाने परिसमाप्यते | तत्त्वदर्शिनः ज्ञानिनः यत् ब्रह्मज्ञानं तुभ्यं कथयिष्यन्ति तत् ज्ञानम् दीर्घ नमस्कारेण परिप्रश्नेन गुरुशुश्रूषया

Downloaded from www.omkaravidya.com

जानीहि । हे पाण्डव ! यत् ज्ञात्वा पुनः एवम् मोहं न यास्यसि येन भूतानि आत्मनि अशेषेण द्रक्ष्यसि | अथः मयि (द्रक्ष्यसि) । सर्वेभ्यः पापकृद्भ्यः त्वम् अतिशयेन पापकृत् असि चेत् सर्वं ज्ञानप्लुवेन एव वृजिनार्णवम् सन्तरिष्यसि | हे अर्जुन! यथा एधांसि काष्ठानि समिद्धः सम्यग् इद्धा दीप्तः अग्निः भस्मीभावं कुरुते तथा ज्ञानाग्निः सर्वकर्माणि भस्मीभावं कुरुते | निर्बीजम् कुरुते | इह ज्ञानेन तुल्यं पावनम् न विद्यते | योगसंसिद्धः कर्मयोगेन समाधियोगेन च संसिद्धः महता कालेन आत्मनि तत् ज्ञानं लभते |

श्रद्धावान् - वेदशास्त्रमेव प्रमाणं एवम् अनुसरति । श्रद्धावान् आत्मज्ञानं लभते | अतः तत् एव परम् इति अनुसरति । सः संयतेन्द्रियः | ज्ञानं लब्ध्वा परां शान्तिं (मोक्षम्) अचिरेण प्राप्नोति | आत्मतत्वम् अज्ञातवान् अजः | अजः विशवासरहितः संशयात्मा च स्वस्य जीवनं विनश्यति | संशयात्मनः अयं लोकः नास्ति | परलोकः अपि नास्ति | तस्य सुखं नास्ति | हे धनञ्जय! फलेच्छारहितेन ईश्वरबुद्धया कृतं कर्मयोगिनम् ब्रह्मज्ञानेन सर्वं संशयरहितम् आत्मवन्तम् कर्माणि न निबध्नन्ति | हे भारत ! तस्मात् तव हृत्स्थं अविवेकात् जातम् एनं संशयं ज्ञानासिना छित्त्वा कर्मयोगम् अनुष्ठानं कुरु ! युद्धाय उत्तिष्ठ |

॥ इति श्रीमद्भगवद्गीतायाः चतुर्थोऽध्यायः संक्षेपः सम्पूर्णम् ॥

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# पञ्चमोऽध्यायः

# संन्यासयोगः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

अर्जुन उवाच
सन्न्यासं कर्मणां कृष्णपुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥५.१॥

पदच्छेदः
सन्न्यासं कर्मणां कृष्ण पुनः योगं च शंससि यत् श्रेयः एतयोः एकं तत् मे ब्रूहि सुनिश्चितम्

पदपरिचयः
सन्न्यासं - अकार पु द्वि एक
कर्मणां - नकार नपु ष बहु
कृष्ण - अकार पु सं प्र
पुनः - अव्ययम्
योगं - अकार पु द्वि एक
च - अव्ययम्
शंससि - लट् मपु एक
यत् - दकार नपु द्वि एक
श्रेयः - सकार नपु प्र एक
एतयोः दकार पु ष. द्वि
एकं - अकार नपु द्वि एक
तत् - दकार नपु द्वि एक
मे - दकार पु च एक
ब्रूहि - ब्रू मपु एक
सुनिश्चितम् - अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः
सन्न्यासं - परित्यागम्
कर्मणां - कर्मणाम्
कृष्ण - कृष्ण
पुनः - भूयो
योगं - योगम्
च - च
शंससि - कथयसि
यत् - यत्
श्रेय: - प्रशस्यतर:
एतयो: - एतयो:
एकं - एकम्
तत् - तत्
मे - मह्यम्
ब्रूहि - वद
सुनिश्चितम् - अभिप्रेतम्

अन्वयः
हे कृष्ण! कर्मणां सन्न्यासं पुनः योगं च शंससि ।एतयो: यत् श्रेय: सुनिश्चितम् तत् एकं मे ब्रूहि ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां पञ्चमे अध्याये प्रथमः श्लोकः। अर्जुनः "हे कृष्ण! शास्त्रीयाणाम् अनुष्ठानविशेषाणाम् परित्यागं कथयसि । पुनः योगं अनुष्ठानम् अवश्यं कर्तव्यम् इति कथयसि अत: एतयो: किं श्रेय: इति अभिप्रेतम् ब्रूहि" । एवं पृष्टवान् ।

व्याकरणम्

Downloaded from www.omkaravidya.com

▶सन्धिः
कर्मणाम् + कृष्ण - अनुस्वारसन्धिः
पुनः + योगं - विसर्गरेफः
यत् + श्रेयः - श्चुत्वसन्धिः छत्वसन्धिः
एतयोः + एकं - विसर्गरेफः
तत् + मे - अनुनासिकासन्धिः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

श्रीभगवानुवाच
सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसन्न्यासात् कर्मयोगो विशिष्यते ॥ ५.२॥

पदच्छेदः
सन्न्यासः कर्मयोगः च निःश्रेयसकरौ उभौ तयोः तु कर्मसन्न्यासात् कर्मयोगः विशिष्यते

पदपरिचयः
सन्न्यासः - अकार पु प्र एक
कर्मयोगः - अकार पु प्र एक
च - अव्ययम्
निःश्रेयसकरौ - अकार पु प्र द्वि
उभौ - अकार पु प्र द्वि
तयोः - दकार पु ष द्वि
तु - अव्ययम्
कर्मसन्न्यासात् - अकार पु प एक

Downloaded from www.omkaravidya.com

कर्मयोगः - अकार पु प्र एक
विशिष्यते - वि + शिष् + लट् प्रपु एक
पदार्थः
सन्न्यासः - कर्मणां परित्यागः
कर्मयोगः- कर्मयोगः
च - च
निःश्रेयसकरौ - मोक्षप्रदौ
उभौ - द्वौ
तयोः - द्वयोः
तु - तु
कर्मसन्न्यासात् - कर्मपरित्यागात्
कर्मयोगः - कर्मयोग
विशिष्यते - प्रशस्यते

अन्वयः
श्रीभगवानुवाच
सन्न्यासः कर्मयोगः च उभौ निःश्रेयसकरौ । तयोः तु कर्मसन्न्यासात् कर्मयोगः विशिष्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये द्वितीयः श्लोकः। भगवान् श्रीकृष्णः "कर्मणां परित्यागः कर्मयोगः च तौ उभौ अपि मोक्षं कुर्वाते । तयोः निःश्रेयसहेत्वोः कर्मसन्न्यासात् कर्मयोगः विशिष्यते" । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
कर्मयोगः + च - विसर्गसकारः
निःश्रेयसकरौ + उभौ - यान्तवान्तदेशसन्धिः

Downloaded from www.omkaravidya.com

तयोः + तु - विसर्गसकारः

▶समासः
कर्मणां सन्न्यासः - कर्मसन्न्यासः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ५.३॥

पदच्छेदः
ज्ञेयः सः नित्यसन्न्यासी यः न द्वेष्टि न काङ्क्षति निर्द्वन्द्वः हि महाबाहो सुखं बन्धात् प्रमुच्यते

पदपरिचयः
ज्ञेयः - अकार. पु प्र एक
सः - दकार. पु प्र एक
नित्यसन्न्यासी - नकार. पु प्र एक
यः - दकार. पु प्र एक
न - अव्ययम्
द्वेष्टि - लट् प्रपु एक
न - अव्ययम्
काङ्क्षति - लट् प्रपु एक
निर्द्वन्द्वः -अकार. पु प्र एक
हि - अव्ययम्
महाबाहो - उकार. पु सं प्र

Downloaded from www.omkaravidya.com

सुखं - अकार नपु द्वि एक
बन्धात् - अकार. पु प एक
प्रमुच्यते - प्र + मुच् लट् कर्मणि प्रपु एक

पदार्थः
ज्ञेयः - ज्ञातव्यः
सः - सः
नित्यसन्न्यासी - कर्मयोगी
यः - यः
न - न
द्वेष्टि - वैरं कुरुते
न - न
काङ्क्षति - इच्छति
निर्द्वन्द्वः - द्वन्द्ववर्जितः
हि - हि
महाबाहो - अर्जुन
सुखं - सुलभम्
बन्धात् - बन्धात्
प्रमुच्यते - मुक्तः भवति

अन्वयः
हे महाबाहो ! यः न द्वेष्टि न काङ्क्षति सः नित्यसन्न्यासी (इति) ज्ञेयः । निर्द्वन्द्वः बन्धात् सुखं प्रमुच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये तृतीयः श्लोकः। भगवान् श्रीकृष्णः "हे महाबाहो ! कर्मयोगी नित्यसन्न्यासी इति ज्ञातव्यः । यः दु:खसुखे तत्साधने च एवं विधः कर्मणि वर्तमानः अपि सः नित्यसन्न्यासी

Downloaded from www.omkaravidya.com

इति ज्ञातव्यः । यस्मात् निर्द्वन्द्वः बन्धात् अनायासेन प्रमुच्यते ।“ एवम् अवदत्
।

व्याकरणम्
▶सन्धिः_
सः + नित्यसन्न्यासी - विसर्गलोपः
यः + न- विसर्गउकारः
निर्द्वन्द्वः + हि -विसर्गउकारः

▶समासः_
निर्द्वन्द्वः - निर्गतं द्वन्द्वं यस्मात् सः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितःसम्यगुभयोर्विन्दते फलम् ॥५.४॥

पदच्छेदः
साङ्ख्ययोगौ पृथक् बालाः प्रवदन्ति न पण्डिताः एकम् अपि आस्थितः
सम्यक् उभयोः विन्दते फलम्

पदपरिचयः
साङ्ख्ययोगौ - अकार पु द्वि द्वि
पृथक् - अव्ययम्
बालाः - अकार पु प्र बहु
प्रवदन्ति - लट् प्रपु बहु

Downloaded from www.omkaravidya.com

न - अव्ययम्
पण्डिताः अकार पु प्र बहु
एकम् - अकार पु द्वि एक
अपि - अव्ययम्
आस्थितः अकार पु प्र एक
सम्यक् - अव्ययम्
उभयोः अकार पु ष एक
विन्दते - लट् प्रपु एक
फलम् - अकार नपु द्वि एक

पदार्थः
साङ्ख्ययोगौ - सन्न्यासकर्मयोगौ
पृथक् - भिन्नम्
बालाः - अविवेकिनः
प्रवदन्ति - कथयन्ति
न - न
पण्डिताः - ज्ञानिनः
एकम् - एकम्
अपि - अपि
आस्थितः - अनुष्ठितः
सम्यक् - सम्यक्
उभयोः - द्वयोः
विन्दते - लभते
फलम् -फलम्

अन्वयः
बालाः साङ्ख्ययोगौ पृथक् (इति) प्रवदन्ति । पण्डिताः न (प्रवदन्ति) । एकम् अपि सम्यक् आस्थितः उभयोः फलम् विन्दते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  चतुर्थः श्लोकः। भगवान् श्रीकृष्णः "अविवेकिनः "सांख्ययोगः कर्मयोगः पृथक् फलं दत्तः" इति वदन्ति । पण्डिताः एकं अविरुद्धं फलम् इच्छन्ति । उभयोः निःश्रेयसं फलम् अतः फले न विरोधः अस्ति। उभयोः एकम् अपि सम्यक् अनुष्ठितवान् उभयोः फलम् विन्दते ।" एवम् अवदत्  ।

व्याकरणम्

▶सन्धिः

पृथक् + बालाः - जश्त्वसन्धिः

अपि + आस्थितः - यण्सन्धिः

सम्यक् + उभयोः- जश्त्वसन्धिः

उभयोः + विन्दते - विसर्गरेफः

▶समासः

साङ्ख्यः च योगः च सांख्ययोगौ - इतरेतरे द्वन्द्वसमासः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।

एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५.५॥

पदच्छेदः

यत् साङ्ख्यैः प्राप्यते स्थानं तत् योगैः अपि गम्यते एकं साङ्ख्यं च योगं च यः पश्यति सः पश्यति

Downloaded from www.omkaravidya.com

पदपरिचयः

यत् - दकार नपु  प्र एक

साङ्ख्यैः - अकार पु तृ एक

प्राप्यते - प्र + आप् लट् कर्मणि प्रपु एक

स्थानं - अकार नपु  प्र एक

तत् - दकार नपु  प्र एक

योगैः - अकार पु तृ बहु

अपि - अव्ययम्

गम्यते - लट् कर्मणि प्रपु एक

एकं - अकार पु द्वि एक

साङ्ख्यं - अकार पु द्वि एक

च - अव्ययम्

योगं - अकार पु द्वि एक

च - अव्ययम्

यः - दकार पु. प्र एक

पश्यति - लट् प्रपु एक

सः- दकार पु. प्र एक

पश्यति - लट् प्रपु एक

पदार्थः

यत् - यत्

साङ्ख्यैः - ज्ञाननिष्ठैः

प्राप्यते - लभ्यते

स्थानं - पदम्

तत् - तत्

योगैः - कर्मयोगैः

अपि - अपि

गम्यते - प्राप्यते

Downloaded from www.omkaravidya.com

एकं - एकम्
साङ्ख्यं - ज्ञानयोगम्
च - च
योगं - कर्मयोगम्
च - च
यः - यः
पश्यति - वीक्षते
सः - सः
पश्यति - विक्षते

अन्वयः
साङ्ख्यैः यत् स्थानं प्राप्यते तत् योगैः अपि गम्यते । यः साङ्ख्यं च योगं च एकं पश्यति सः पश्यति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये पञ्चमः श्लोकः। भगवान् श्रीकृष्णः "ज्ञाननिष्ठैः संन्यासिभिः मोक्षाख्यं यत् स्थानं प्राप्यते तत् योगैः अपि प्राप्यते । साङ्ख्यं च योगं च एकफलैकत्वम् यः पश्यति सः पश्यति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
तत् + योगैः - जश्त्वसन्धिः
योगैः + अपि - विसर्गरेफः
सः + पश्यति - विसर्गलोपः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥५.६॥

पदच्छेदः
सन्न्यासः तु महाबाहो दुःखम् आप्तुम् अयोगतः योगयुक्तः मुनिः ब्रह्म नचिरेण अधिगच्छति

पदपरिचयः
सन्न्यासः - अकार पु प्र एक
तु - अव्ययम्
महाबाहो - उकार पु सं प्र
दुःखम् - अकार नपु प्र एक
आप्तुम् - तुमुनान्तम्
अयोगतः - अव्ययम्
योगयुक्तः - अकार पु प्र एक
मुनिः - इकार पु प्र एक
ब्रह्म - नकार पु द्वि एक
नचिरेण - अव्ययम्
अधिगच्छति - अधि + गम् + लट् प्रपु एक

पदार्थः
सन्न्यासः - सन्न्यासः
तु - तु
महाबाहो - अर्जुन

Downloaded from www.omkaravidya.com

दु:खम् -   कठिनम्
आप्तुम् - प्राप्तुम्
अयोगत: - अयोगत:
योगयुक्त: - कर्मयोगयुक्त:
मुनि: - शान्त:
ब्रह्म - परमात्मानम्
नचिरेण - शीघ्रम्
अधिगच्छति - प्राप्नोति

अन्वयः
हे महाबाहो ! सन्न्यास: तु अयोगत:आप्तुम् दु:खम् योगयुक्त: मुनि: ब्रह्म नचिरेण अधिगच्छति ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  षष्ठ: श्लोक:। भगवान् श्रीकृष्ण: "हे महाबाहो ! कर्मयोगेन  विना ज्ञानयोगस्य प्राप्ति: कठिनम् भवति । कर्मयोगेनयुक्त: मुनि: अचिरेण सन्न्यासम् प्राप्नोति । अत: कर्मयोगम् एव विशिष्यते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
सन्न्यास: + तु - विसर्गसकार:
योगयुक्त: + मुनि: - विसर्गउकार:
मुनि: + ब्रह्म - विसर्गरेफ:
नचिरेण + अधिगच्छति - सवर्णदीर्घसन्धि:
▶कृदन्ता:
आप्तुम् - आप् + तुमुन् प्रत्यय:

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥५.७॥

पदच्छेदः
योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियःसर्वभूतात्मभूतात्मा कुर्वन् अपि न लिप्यते

पदपरिचयः
योगयुक्तः - अकार. पु प्र एक
विशुद्धात्मा - नकार. पु प्र एक
विजितात्मा - नकार. पु प्र एक
जितेन्द्रियः - अकार. पु प्र एक
सर्वभूतात्मभूतात्मा - नकार. पु प्र एक
कुर्वन् - तकार. पु प्र एक
अपि - अव्ययम्
न - अव्ययम्
लिप्यते - लिप् + कर्मणि प्रपु एक

पदार्थः
योगयुक्तः - कर्मयोगयुक्तः
विशुद्धात्मा - विशुद्धसत्त्वः
विजितात्मा - विजितदेहः
जितेन्द्रियः - जितेन्द्रियः
सर्वभूतात्मभूतात्मा - संयक् दर्शी

Downloaded from www.omkaravidya.com

कुर्वन् - आचरन्
अपि - अपि
न - न
लिप्यते - बध्यते

अन्वयः
योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कुर्वन् अपि न लिप्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  सप्तमः श्लोकः। भगवान् श्रीकृष्णः "योगयुक्तः विशुद्धसत्त्वः विजितदेहः  जितेन्द्रियः सर्वभूतात्मभूतात्मा लोकसंग्रहाय कर्म कुर्वन् अपि न कर्मभिः बध्यते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
योगयुक्तः + विशुद्धात्मा - विसर्गउकारः
कुर्वन् + अपि - ङमुडागमनसन्धिः
▶समासः
योगेन युक्तः योगयुक्तः - तृतीयातत्पुरुषः
विशुद्धः आत्मा यस्य सः - विशुद्धात्मा - समानाधिकरणबहुव्रीहिसमासः
विजितः आत्मा  येन सः - विजितात्मा - समानाधिकरणबहुव्रीहिसमासः
जितानि इन्द्रियाणि येन सः  जितेन्द्रियः -  समानाधिकरणबहुव्रीहिसमासः
सर्वाणि भूतानि - सर्वभूतानि - विशेषण पूर्वपदकर्मधारयसमासः
सर्वभूतानाम् आत्मभूतः - सर्वभूतात्मभूतः षष्ठीतत्पुरुषः
सर्वभूतात्मभूतः आत्मा यस्य सः - सर्वभूतात्मभूतात्मा - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्श्रृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥५.०८॥

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ५.०९॥

पदच्छेदः
न एव किञ्चित् करोमि इति युक्तः मन्येत तत्त्ववित् पश्यन् श्रृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन्

पदपरिचयः
न - अव्ययम्
एव - अव्ययम्
किञ्चित् - अव्ययम्
करोमि - लट् उपु एक
इति - अव्ययम्
युक्तः - अकार पु प्र एक
मन्येत - लट् प्रपु एक
तत्त्ववित् - तकार. पु प्र एक
पश्यन् - तकार. पु प्र एक
श्रृण्वन् - तकार. पु प्र एक
स्पृशन् - तकार. पु प्र एक
जिघ्रन् - तकार. पु प्र एक

Downloaded from www.omkaravidya.com

अश्नन्  - तकार. पु प्र एक
गच्छन्  - तकार. पु प्र एक
स्वपन्  - तकार. पु प्र एक
श्वसन्  - तकार. पु प्र एक
प्रलपन्  - प्र + तकार. पु प्र एक
विसृजन्  - वि + तकार. पु प्र एक
गृह्णन्  - तकार. पु प्र एक
उन्मिषन्  - तकार. पु प्र एक
निमिषन्  - तकार. पु प्र एक
अपि - अव्ययम्
इन्द्रियाणि  - अकार. नपु प्र बहु
इन्द्रियार्थेषु - अकार पु स बहु
वर्तन्ते - लट् प्रपु बहु
इति - अव्ययम्
धारयन्  - धृ + णिच् + शतृ

पदार्थः
न - न
एव - एव
किञ्चित् - ईषत्
करोमि - आचरामि
इति - इति
युक्तः - कर्मयोगी
मन्येत - चिन्तयेत्
तत्त्ववित् -आत्मवित्
पश्यन् - अवलोकयन्
श्रृण्वन् - आकर्णयन्
स्पृशन् - स्पृशन्

Downloaded from www.omkaravidya.com

जिघ्रन् -   जिघ्रन्
अश्नन् -   खादन्
गच्छन् - चरन्
स्वपन् -   स्वपन्
श्वसन् -   श्वसन्
प्रलपन् - वदन्
विसृजन् -   मुञ्चन्
गृह्णन् -   स्वीकुर्वन्
उन्मिषन् - उन्मिषन्
निमिषन् -निमिषन्
अपि - अपि
इन्द्रियाणि -इन्द्रियाणि
इन्द्रियार्थेषु - विषयेषु
वर्तन्ते - भवन्ति
इति - इति
धारयन् – निश्चिन्वन्

अन्वयः
युक्तः तत्त्ववित् पश्यन् श्रृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन्  न एव किञ्चित् करोमि इति मन्येत ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  अष्टमः च नवमः श्लोकौ। भगवान् श्रीकृष्णः "युक्तः तत्त्ववित् पश्यन् श्रृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन्  न एव किञ्चित् करोमि इति मन्येत ।" एवम् अवदत् ।
व्याकरणम्

Downloaded from www.omkaravidya.com

▶सन्धिः

न + एव - वृद्धिसन्धिः

करोमि + इति - सवर्णदीर्घसन्धिः

युक्तः + मन्येत - विसर्गउकारः

पश्यन् + शृण्वन् - श्चुत्वसन्धिः

स्पृशन् + जिघ्रन् -श्चुत्वसन्धिः

जिघ्रन् + अश्नन् - ङमुडागमनसन्धिः

स्वपन् + श्वसन् - श्चुत्वसन्धिः

गृह्णन् + उन्मिषन् - ङमुडागमनसन्धिः

निमिषन्  + अपि - ङमुडागमनसन्धिः

इन्द्रियाणि + इन्द्रियार्थेषु - सवर्णदीर्घसन्धिः

वर्तन्ते + इति - यान्तवान्तदेशसन्धिः य लोपः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ५.१०॥

पदच्छेदः

ब्रह्मणि आधाय कर्माणि सङ्गं त्यक्त्वा करोति यः लिप्यते न सः पापेन पद्मपत्रम् इव अम्भसा

Downloaded from www.omkaravidya.com

पदपरिचयः

ब्रह्मणि - नकार नपु स एक

आधाय - ल्यबान्तम्

कर्माणि - अकार नपु द्वि बहु

सङ्गं - अकार पु द्वि बहु

त्यक्त्वा - क्त्वान्तम्

करोति - लट् प्रपु एक

यः - दकार पु प्र एक

लिप्यते - लिप् + कर्मणि लट् प्रपु एक

न - अव्ययम्

सः - दकार पु प्र एक

पापेन - अकार नपु तृ एक

पद्मपत्रम् -अकार नपु प्र एक

इव - अव्ययम्

अम्भसा - सकार नपु तृ एक

पदार्थः

ब्रह्मणि - ईश्वरे

आधाय - निक्षिप्य

कर्माणि - कार्याणि

सङ्गं - फलेच्छाम्

त्यक्त्वा - परित्यज्य

करोति - कुरुते

यः - यः

लिप्यते - बध्यते

न - न

स - सः

पापेन - पापेन

Downloaded from www.omkaravidya.com

पद्मपत्रम् - कमलपर्णम्
इव - इव
अम्भसा - जलेन
अन्वयः
यः कर्माणि ब्रह्मणि आधाय सङ्गं त्यक्त्वा करोति सः अम्भसा पद्मपत्रम् इव पापेन न लिप्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये दशमः श्लोकः। भगवान् श्रीकृष्णः "यः कर्माणि ईश्वरे समर्पयित्वा फलेषु सङ्गं त्यक्त्वा करोति सः अम्भसा पद्मपत्रम् इव पापेन न लिप्यते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
ब्रह्मणि + आधाय - यण्सन्धिः
सः + पापेन - विसर्गलोपः
इव + आम्भसा - सवर्णदीर्घसन्धिः

▶समासः
पद्मस्य पत्रम् पद्मपत्रम् - षष्ठीतत्पुरुषः

▶कृदन्ताः
त्यक्त्वा - त्यज् + क्त्वा प्रत्ययः
आधाय - आ + धा +ल्यप् प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ५.११॥

पदच्छेदः
कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वा आत्मशुद्धये

पदपरिचयः
कायेन - अकार पु तृ एक
मनसा - सकार नपु तृ एक
बुद्ध्या - इकार स्त्री तृ एक
केवलैः अकार नपु तृ एक
इन्द्रियैः - अकार नपु तृ एक
अपि - अव्ययम्
योगिनः - नकार पु प्र बहु
कर्म - नकार नपु द्वि एक
कुर्वन्ति - लट् प्रपु बहु
सङ्गं - अकार पु द्वि एक
त्यक्त्वा - क्त्वान्तम्
आत्मशुद्धये - ईकार स्त्री च एक

पदार्थः
कायेन - देहेन
मनसा - अन्तः करणेन

Downloaded from www.omkaravidya.com

बुद्ध्या - धिया
केवलैः - केवलैः
इन्द्रियैः - इन्द्रियैः
अपि - अपि
योगिनः - कर्मयोगिनः
कर्म - कर्म
कुर्वन्ति – आचरन्ति
त्यक्त्वा – परित्यज्य
सङ्गं – फलेच्छाम्
आत्मशुद्धये - सत्त्वशुद्धये

अन्वयः
योगिनः  कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि सङ्गं  त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  एकादशः श्लोकः। भगवान् श्रीकृष्णः "कर्मयोगिनः ममत्ववर्जितैः ईश्वराय एव कर्म करोमि न मम फलाय इति ममत्वबुद्धिशून्यैः कायेन मनसा बुद्ध्या अभिमानरहितैः इन्द्रियैः अपि कर्म कुर्वन्ति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
केवलैः + इन्द्रियैः - विसर्गरेफः
इन्द्रियैः +अपि - विसर्गरेफः
त्यक्त्वा + आत्मशुद्धये - सवर्णदीर्घसन्धिः
▶समासः
आत्मनः  शुद्धिः - आत्मशुद्धिः षष्ठीतत्पुरुषः
▶कृदन्ताः
त्यक्त्वा - त्यज् + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ ५.१२॥

पदच्छेदः
युक्तः कर्मफलं त्यक्त्वा शान्तिम् आप्नोति नैष्ठिकीम् अयुक्तः कामकारेण फले सक्तः निबध्यते

पदपरिचयः
युक्तः - अकार पु प्र एक
कर्मफलं - अकार नपु द्वि एक
त्यक्त्वा - क्त्वान्तम्
शान्तिम् - इकार स्त्री द्वि एक
आप्नोति - लट् प्रपु एक
नैष्ठिकीम् - ईकार स्त्री द्वि एक
अयुक्तः - अकार पु प्र एक
कामकारेण - अकार पु  तृ एक
फले - अकार नपु स एक
सक्तः - अकार पु प्र एक
निबध्यते - नि + बध् लट् प्रपु एक

पदार्थः
युक्तः - कर्मयोगी
कर्मफलं - कर्मफलम्

Downloaded from www.omkaravidya.com

त्यक्त्वा - परित्यज्य
शान्तिम् - मोक्षाम्
आप्नोति - प्राप्नोति
नैष्ठिकीम् - निष्ठायाम् भवाम्
अयुक्तः - असमाहितः
कामकारेण - कामकारेण
फले - फले
सक्तः - सम्बद्धः
निबध्यते - निबध्यते

अन्वयः
युक्तः कर्मफलं त्यक्त्वा नैष्ठिकीम् शान्तिम् आप्नोति अयुक्तः कामकारेण फले सक्तः निबध्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये द्वादशः श्लोकः। भगवान् श्रीकृष्णः "कर्मयोगी कर्मणां फलं परित्यज्य नैष्ठिकीं मोक्षम् प्राप्नोति । असमाहितः कामकारेण फले सक्तः निबध्यते ।अतः त्वं युक्तः भव ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
सक्तः + निबध्यते - विसर्गउकारः

▶समासः
कामस्य कारः - कामकारः षष्ठीतत्पुरुषः तेन

▶कृदन्ताः
त्यक्त्वा - त्यज् + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ ५.१३॥

पदच्छेदः
सर्वकर्माणि मनसा सन्न्यस्य अास्ते  सुखं वशी नवद्वारे पुरे देही न एव कुर्वन् न कारयन्

पदपरिचयः
सर्वकर्माणि - अकार नपु द्वि बहु
मनसा - सकार नपु तृ एक
सन्न्यस्य - ल्यबन्तम्
आस्ते - लट् प्रपु एक
सुखं - अकार नपु प्र एक
वशी - नकार पु प्र एक
नवद्वारे - अकार नपु स. एक
पुरे - अकार नपु स. एक
देही - नकार पु प्र एक
न - अव्ययम्
एव अव्ययम्
कुर्वन् - तकार पु प्र एक
न – अव्ययम्
कारयन् - कृ + णिच् + शतृ

पदार्थः
सर्वकर्माणि -  सकलकर्माणि
मनसा - चित्तेन
सन्न्यस्य - परित्यज्य

Downloaded from www.omkaravidya.com

आस्ते - अास्ते
सुखं - सुखम्
वशी - विजितात्मा
नवद्वारे - नव द्वारेषु
पुरे - पुरे
देही - शरीरि
न - न
एव – एव
न – न
कुर्वन् - कुर्वन्
कारयन् - प्रवर्तयन्

अन्वयः
वशी देही नवद्वारे पुरे मनसा सर्वकर्माणि सन्न्यस्य एव न कुर्वन् न कारयन् सुखं आस्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये त्रयोदशः श्लोकः। भगवान् श्रीकृष्णः "सर्वकर्माणि विवेकबुद्ध्या कर्मादौ अकर्म सन्दर्शनेन संत्यज्य सुखमास्ते । जितेन्द्रियः नवद्वारे पुरे तिष्ठन् न कुर्वन् न कारयन् सुखं आस्ते ।" एवम आवदत् ।

व्याकरणम्
▶सन्धिः
सन्नस्य + आस्ते - सवर्णदीर्घसन्धिः
न + एव - वृद्धिसन्धिः
▶समासः
सर्वाणि कर्माणि - सर्वकर्माणि - विशेषणपूर्वपदकर्मधारयसमासः
▶कृदन्ताः
सन्न्यस्य - सम् + नि + अस् + ल्यप्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ ५.१४॥

पदच्छेदः
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावः तु प्रवर्तते

पदपरिचयः
न - अव्ययम्
कर्तृत्वं - अकार नपु द्वि एक
न - अव्ययम्
कर्माणि - नकार नपु द्वि बहु
लोकस्य - अकार पु ष एक
सृजति - लट् प्रपु एक
प्रभुः - उकार पु प्र एक
न - अव्ययम्
कर्मफलसंयोगं - अकार पु द्वि एक
स्वभावः - अकार पु प्र एक
तु – अव्ययम्
प्रवर्तते - लट् प्रपु एक

पदार्थः
न - न
कर्तृत्वं - विधातृत्वम्

Downloaded from www.omkaravidya.com

न - न
कर्माणि - कर्तव्यानि
लोकस्य - देहस्य
सृजति - उत्पादयति
प्रभुः - ईश्वरः
न - न
कर्मफलसंयोगं - कर्मफलसंयोगम्
स्वभावः - माया
तु - तु
प्रवर्तते - प्रचरति

अन्वयः
प्रभुः लोकस्य कर्तृत्वं न सृजति । कर्माणि न (सृजति) । कर्मफलसंयोगं न (सृजति) । स्वभावः तु प्रवर्तते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये चतुर्दशः श्लोकः। भगवान् श्रीकृष्णः *ईश्वरः देहस्य कर्तृत्वं न उत्पादयति । एवमेव कर्माणि च न उत्पादयति । कर्मफलस्य संयोगं न उत्पादयति । अविद्यालक्षणा प्रकृतिः माया प्रवर्तते ।* एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
स्वभावः + तु - विसर्गसकारः
▶समासः
कर्मणः फलम् - कर्मफलम् - षष्ठीतत्पुरुषः
कर्मफलयोः संयोगः कर्मफलसंयोगः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥५.१५॥

पदच्छेदः
न आदत्ते कस्यचित् पापं न च एव सुकृतं विभुः अज्ञानेन आवृतं ज्ञानं तेन मुह्यन्ति जन्तवः

पदपरिचयः
न - अव्ययम्
आदत्ते - लट् प्रपु एक
कस्यचित्- सर्वनामशब्दः
पापं - अकार नपु द्वि एक
न - अव्ययम्
च - अव्ययम्
एव - अव्ययम्
सुकृतं - अकार नपु द्वि एक
विभुः - उकार पु प्र बहु
अज्ञानेन - अकार नपु तृ एक
आवृतं - अकार नपु प्र एक
ज्ञानं - अकार नपु प्र एक
तेन - दकार पु तृ एक
मुह्यन्ति - लट् प्रपु बहु
जन्तवः - उकार पु प्र बहु

पदार्थः
न - न
आदत्ते - गृह्णाति

Downloaded from www.omkaravidya.com

कस्यचित् - कस्यचित्
पापं - दुरितम्
न - न
च - च
एव - एव
सुकृतं - पुण्यम्
विभुः - ईश्वरः
अज्ञानेन - अविद्यया
आवृतं - आच्छन्नम्
ज्ञानं – ज्ञानम्
मुह्यन्ति - मोहं गच्छन्ति
तेन - तेन
जन्तवः - नराः

अन्वयः
विभुः कस्यचित् पापं न आदत्ते । सुकृतं च एव (न आदत्ते) । अज्ञानेन ज्ञानम् आवृतं । तेन जन्तवः मुह्यन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये पञ्चदशः श्लोकः। भगवान् श्रीकृष्णः "विभुः कस्यचित् भक्तस्य पापं न गृह्णाति ।भक्तैः प्रयत्नं सुकृतं न च गृह्णाति । अज्ञानेन विवेकज्ञानम् आवृतम् । अतः संसारिणः मोहं गच्छन्ति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
न + आदत्ते - सवर्णदीर्घसन्धिः
च + एव - वृद्धिसन्धिः
अज्ञानेन + आवृतम् - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ ५.१६॥

पदच्छेदः
ज्ञानेन तु तत् अज्ञानं येषां नाशितम् आत्मनः तेषाम् आदित्यवत् ज्ञानं प्रकाशयति तत्परम्

पदपरिचयः
ज्ञानेन - अकार नपु तृ एक
तु - अव्ययम्
तत् - दकार नपु प्र एक
अज्ञानं - अकार नपु प्र एक
येषां - दकार पु ष बहु
नाशितम् - अकार नपु प्र एक
आत्मनः - नकार पु ष एक
तेषाम् - दकार पु ष बहु
आदित्यवत् - अव्ययम्
ज्ञानं - अकार नपु प्र एक
प्रकाशयति - प्र + काश् + णिच् + लट् प्रपु एक
तत् -दकार नपु द्वि एक
परम्  - दकार नपु द्वि एक

पदार्थः
ज्ञानेन - ब्रह्मज्ञानेन

Downloaded from www.omkaravidya.com

तु - तु
तत् - तत्
अज्ञानं - अविद्या
येषां - येषां
नाशितम् - विनाशिता
आत्मनः - आत्मनः
तेषाम् - तेषाम्
आदित्यवत् - सूर्यवत्
ज्ञानं - ज्ञानम्
प्रकाशयति - भाययति
तत् - तत्
परम् - परमार्थ तत्त्वम्

अन्वयः
येषां अज्ञानं आत्मनः ज्ञानेन नाशितम् तेषां तु तत् ज्ञानं आदित्यवत् परम् प्रकाशयति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये षोडषः श्लोकः। भगवान् श्रीकृष्णः “ब्रह्मज्ञानेन येषां तत् अज्ञानं नाशितम् तेषां ज्ञानं आदित्यवत् परब्रह्मस्वरूपं प्रकाशयति ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
तत् + अज्ञानम् - जश्त्वम्
आदित्यवत् + ज्ञानम् - श्चुत्वसन्धिः जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ ५.१७॥

पदच्छेदः
तद्बुद्धयः तदात्मानः तन्निष्ठाः तत्परायणाः गच्छन्ति अपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः

पदपरिचयः
तद्बुद्धयः - इकार पु प्र बहु
तदात्मानः - नकार पु प्र बहु
तन्निष्ठाः - अकार पु प्र बहु
तत्परायणाः - अकार पु प्र बहु
गच्छन्ति - लट् प्रपु बहु
अपुनरावृत्तिं - ईकार स्त्री द्वि एक ज्ञाननिर्धूतकल्मषाः - अकार पु प्र बहु

पदार्थः
तद्बुद्धयः - परमात्मनिष्ठमतयः
तदात्मानः - तदात्मानः
तन्निष्ठाः - परमात्मनिष्ठास्थितयः
तत्परायणाः - तत्परायणाः
गच्छन्ति - लभन्ते
अपुनरावृत्तिं - अपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः - आत्मज्ञानविनिर्गतपापाः

Downloaded from www.omkaravidya.com

अन्वयः
तद्बुद्धयः तदात्मानः तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये सप्तदशः श्लोकः। भगवान् श्रीकृष्णः "येषां बुद्धिः परमात्मानि रमते, चित्तं तत्रैव विहरति स्थितिः सदा तत्रैव भवति परमात्मा एव परः मार्गः भवति, तादृशाः ज्ञानेन कल्मषं नाशयन्तः पुरुषाः पुनरावृत्तिं न विद्यन्ते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
तद्बुद्धयः + तदात्मानः - विसर्गसकारः
तदात्मानः + तन्निष्ठाः -विसर्गसकारः
तन्निष्ठाः +तत्परायणाः - विसर्गसकारः
गच्छन्ति + अपुनरावृत्तिं - यण्सन्धिः

▶समासः
तस्मिन् गता बुद्धिः येषां ते - तद्बुद्धयः - व्यधिकरणबहुव्रीहिसमासः
तत् एव परं ब्रह्म आत्मा येषां ते तदात्मानः - व्यधिकरणबहुव्रीहिसमासः
तस्मिन् निष्ठा येषां ते - तन्निष्ठाः - व्यधिकरणबहुव्रीहिसमासः
तत् एव परम् अयनं येषां ते - तत्परायणाः - व्यधिकरणबहुव्रीहिसमासः
ज्ञानेन निर्धूतम् - ज्ञाननिर्धूतम् - तृतीयातत्पुरुषसमासः
ज्ञाननिर्धूतम् कल्मषं येषां ते - ज्ञाननिर्धूतकल्मषाः व्यधिकरणबहुव्रीहिसमासः
अपुनरावृत्तिम् - न पुनरावृत्तिम् - नञ्तत्पुरुषः ताम्

Downloaded from www.omkaravidya.com

मूलश्लोकः

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥५.१८॥

पदच्छेदः
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च एव श्वपाके च पण्डिताः समदर्शिनः

पदपरिचयः
विद्याविनयसम्पन्ने - अकार पु स. एक
ब्राह्मणे - अकार पु स. एक
गवि - अोकार स्त्री स. एक
हस्तिनि - नकार पु स. एक
शुनि - नकार पु स. एक
च - अव्ययम्
एव - अव्ययम्
श्वपाके - अकार पु स. एक
च - अव्ययम्
पण्डिताः - अकार पु प्र बहु
समदर्शिनः - नकार पु प्र बहु

पदार्थः
विद्याविनयसम्पन्ने - विद्याविनययुक्ते
ब्राह्मणे - विप्रे
गवि - धेनौ

Downloaded from www.omkaravidya.com

हस्तिनि - गजे
शुनि - शुनके
च - च
एव - एव
श्वपाके - चाण्डाले
च - च
पण्डिताः - विवेकिनः
समदर्शिनः - समानदृष्टय :

अन्वयः
पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च श्वपाके च एव समदर्शिनः (भवन्ति) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये अष्टादशः श्लोकः। भगवान् श्रीकृष्णः "पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च श्वपाके च एव समदर्शिनः भवन्ति।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
च + एव - वृद्धिसन्धिः

▶समासः
विद्या च विनयः च - विद्याविनयौ - इतरेतरद्वन्द्वसमासः
विद्यया च विनयेन च सम्पन्नः यस्य सः - विद्याविनयसम्पन्नः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ ५.१९॥

पदच्छेदः
इह एव तैः जितः सर्गः येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः

पदपरिचयः
इह - अव्ययम्
एव - अव्ययम्
तैः - दकार पु तृ बहु
जितः - अकार पु प्र एक
सर्गः - अकार पु प्र एक
येषां - दकार पु ष बहु
साम्ये - अकार नपु स एक
स्थितं - अकार नपु प्र एक
मनः - सकार नपु प्र एक
निर्दोषं - अकार नपु प्र एक
हि - अव्ययम्
समं - अकार नपु प्र एक
ब्रह्म - नकार नपु प्र एक
तस्मात् - दकार पु प एक
ब्रह्मणि - नकार नपु स एक
ते - दकार पु प्र बहु

Downloaded from www.omkaravidya.com

स्थिताः - अकार पु प्र बहु

पदार्थः
इह - इह
एव - एव
तैः - समदर्शिभिः
जितः -विजितः
सर्गः - संसारः
येषां - येषाम्
साम्ये - समानतायाम्
स्थितं - निश्चलिभूतम्
मनः - अन्तःकरणम्
निर्दोषं - दोषरहितम्
हि - हि
समं - समम्
ब्रह्म - ब्रह्म
तस्मात् - अतः
ब्रह्मणि - परमात्मनि
ते - ते
स्थिताः - स्थिताः

अन्वयः
येषां मनः साम्ये स्थितं तैः इह एव सर्गः जितः । निर्दोषं ब्रह्म समं हि तस्मात् ब्रह्मणि ते स्थिताः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये नवदशः श्लोकः। भगवान् श्रीकृष्णः "येषां अन्तः करणम् सर्वभूतेषु समभावे स्थितम् तैः पण्डितैः जीवद्भिः

Downloaded from www.omkaravidya.com

एव जन्म वशीकृतम् । ब्रह्म  निर्दोषं सर्वेषु समं च । तस्मात्  ब्रह्मणि ते स्थिताः ।" एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

इह + एव - वृद्धिसन्धिः

तैः + जितः - विसर्गरेफः

सर्गः + येषाम् - विसर्गउकारः

तस्मात् + ब्रह्मणि - जश्त्वसन्धिः

▶समासः

निर्गतः दोषः यस्मात् तत् निर्दोषम् - समानाधिकरणबहुव्रीहिसमासः

▶कृदन्ताः

जि + क्त - जितः

ष्ठा + क्त - स्थितः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥ ५.२०॥

पदच्छेदः

न प्रहृष्येत् प्रियं प्राप्य न उद्विजेत् प्राप्य च अप्रियम् स्थिरबुद्धिः असम्मूढः ब्रह्मविद् ब्रह्मणि स्थितः

Downloaded from www.omkaravidya.com

पदपरिचयः
न - अव्ययम्
प्रहृष्येत् - प्र + हृष् + विधि प्रपु एक
प्रियं - अकार नपु द्वि एक
प्राप्य - ल्यबन्तम्
न - अव्ययम्
उद्विजेत् - उद् + विज् + विधि प्रपु एक
प्राप्य- ल्यबन्तम्
च - अव्ययम्
अप्रियम् - अकार नपु द्वि एक
स्थिरबुद्धिः - इकार पु प्र एक
असम्मूढः - अकार पु प्र एक
ब्रह्मविद् - दकार पु प्र एक
ब्रह्मणि - नकार नपु स. एक
स्थितः - अकार पु प्र एक
पदार्थः
न - न
प्रहृष्येत् - संतुष्येत्
प्रियं - इष्टम्
प्राप्य - लब्ध्वा
न - न
उद्विजेत् - विषीदेत्
प्राप्य - लब्ध्वा
च - च
अप्रियम् - अनिष्टम्
स्थिरबुद्धिः - दृढमनाः
असम्मूढः -मोहरहितः
ब्रह्मविद् - ब्रह्मज्ञानी

Downloaded from www.omkaravidya.com

ब्रह्मणि - परमात्मनि
स्थितः - वृत्तः

अन्वयः
स्थिरबुद्धिः असम्मूढः ब्राह्मणि स्थितः ब्रह्मविद् प्रियं प्राप्य न प्रहृष्येत् ।
अप्रियम् प्राप्य च न उद्विजेत् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये विंशतितमः श्लोकः। भगवान् श्रीकृष्णः "स्थिरबुद्धिः असम्मूढः ब्रह्मणि स्थितः ब्रह्मविद् प्रियं प्राप्य न प्रहृष्येत् ।अप्रियम् प्राप्य च न उद्विजेत् ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
न + उद्विजेत् - गुणसन्धिः
च + अप्रियम् - सवर्णदीर्घसन्धिः
स्थिरबुद्धिः + असम्मूढः - विसर्गरेफः

▶समासः
स्थिरः बुद्धिः यस्य सः - स्थिरबुद्धिः - समानादसिकरणबहुव्रीहिसमासः
न सम्मूढः असम्मूढः - नञ् तत्पुरुषः

▶ कृदन्ताः
प्राप्य - प्र + आप् + ल्यप् प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥५.२१॥

पदच्छेदः
बाह्यस्पर्शेषु असक्तात्मा विन्दति आत्मनि यत् सुखम् सः ब्रह्मयोगयुक्तात्मा सुखम् अक्षयमं अश्नुते

पदपरिचयः
बाह्यस्पर्शेषु - अकार पु स.बहु
असक्तात्मा - नकार पु प्र एक
विन्दति - लट् प्रपु एक
आत्मनि - नकार पु स. एक
यत् - दकार नपु द्वि. एक
सुखम् - अकार नपु द्वि. एक
सः - दकार पु प्र एक
ब्रह्मयोगयुक्तात्मा - नकार पु प्र एक
सुखम् - अकार नपु द्वि. एक
अक्षयम् - अकार नपु द्वि. एक
अश्नुते - लट् प्रपु एक

पदार्थः
बाह्यस्पर्शेषु - लोकविषयेषु
असक्तात्मा - असंलग्नचित्तः
विन्दति - लभते

Downloaded from www.omkaravidya.com

आत्मनि - स्वस्मिन्
यत् - यत्
सुखम् - सुखम्
सः - सः
ब्रह्मयोगयुक्तात्मा - ब्रह्मज्ञानयुक्तचित्तः
सुखम् - सुखम्
अक्षयम् - अविनाशि
अश्नुते - प्राप्नोति

अन्वयः
बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखम् विन्दति ब्रह्मयोगयुक्तात्मा सः (तत्) अक्षयं सुखम् अश्नुते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये एकविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "यः बाह्यसपर्शेषु असक्तः सः ब्रह्मयोगयुक्तात्मा । यः ब्रह्मयोगयुक्तात्मा सः आत्मनि सुखं विन्दति । सः अक्षयं सुखम् अश्नुते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
बाह्यस्पर्शेषु + असक्तात्मा - यण्सन्धिः
विन्दति + आत्मनि -यण्सन्धिः
सः + ब्रह्मयोगयुक्तात्मा - विसर्गलोपः

▶समासः
बाह्याः च ते स्पर्शाः - बाह्यस्पर्शाः - विशेषणपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

ये हि संस्पर्शजा भोगा दुःखयोनयः एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ ५.२२॥

पदच्छेदः
ये हि संस्पर्शजाः भोगाः दुःखयोनयः एव ते आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः

पदपरिचयः
ये - दकार पु प्र बहु
हि - अव्ययम्
संस्पर्शजाः - अकार पु प्र बहु
भोगाः - अकार पु प्र बहु
दुःखयोनयः - इकार स्त्री प्र बहु
एव - अव्ययम्
ते - दकार पु प्र बहु
आद्यन्तवन्तः - तकार पु प्र बहु
कौन्तेय - अकार पु सं प्र
न - अव्ययम्
तेषु - दकार पु स. बहु
रमते - लट् प्रपु एक
बुधः - अकार पु प्र एक

पदार्थः
ये - ये

Downloaded from www.omkaravidya.com

हि - हि
संस्पर्शजाः - विषयजन्याः
भोगाः - भुक्तयः
दुःखयोनयः - विषादहेतवः
एव - एव
ते - ते
आद्यन्तवन्तः - उत्पत्तिविनाशसहिताः
कौन्तेय - अर्जुन
न - न
तेषु - तेषु
रमते - मुह्यति
बुधः - विवेकी

अन्वयः
हे कौन्तेय!  ये संस्पर्शजाः भोगाः (ते) दुःखयोनयः एव । हि ते आद्यन्तवन्तः ।
तेषु बुधः न रमते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  द्वाविंशतितमः श्लोकः। भगवान्
श्रीकृष्णः "हे कौन्तेय! ये संस्पर्शजा भोगाः ते दुःखयोनयः एव । यतः
चेत्  तेषाम् आरब्धम् अन्तम् च सन्ति । अतः  तेषु बुधः न रमते ।" एवम्
अवदत् ।

व्याकरणम्
▶सन्धिः
संस्पर्शजाः + भोगाः - विसर्गलोपः
भोगाः + दुःखयोनयः - विसर्गलोपः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥५.२३॥

पदच्छेदः
शक्नोति इह एव यः सोढुं प्राक् शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं सः युक्तः सः सुखी नरः

पदपरिचयः
शक्नोति - लट् प्रपु एक
इह - अव्ययम्
एव - अव्ययम्
यः - दकार पु प्र एक
सोढुं - तुमुनन्तम्
प्राक् - अव्ययम्
शरीरविमोक्षणात् - अकार नपु प एक
कामक्रोधोद्भवं अकार पु द्वि एक
वेगं - अकार पु द्वि एक
सः - दकार पु प्र एक
युक्तः - अकार पु प्र एक
सः - दकार पु प्र एक
सुखी - नकार पु प्र एक
नरः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
शक्नोति - उत्सहते
इह - इह
एव - एव
यः - यः
सोढुं - सहितुम्
प्राक् - प्राक्
शरीरविमोक्षणात् - आमरणात्
कामक्रोधोद्भवं - रागद्वेषजन्यम्
वेगं - वेगम्
सः - सः
युक्तः - योगी
सः सः
सुखी - सुखी
नरः - मनुष्यः

अन्वयः
यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति सः युक्तः सः सुखी नरः (च) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये त्रयोविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "यः इह एव शरीरविमोक्षणात् पूर्वम् कामक्रोधोद्भवं वेगं सहितुं शक्नोति सः नरः एव युक्तः सः सुखी नरः ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
शक्नोति + इह - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

इह + एव - वृद्धिसन्धिः
सः + युक्तः - विसर्गलोपः
सः + सुखी -विसर्गलोपः

▶कृदन्ताः
सोढुम् - सह् + तुमुन् प्रत्ययः

### श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥५.२४॥

पदच्छेदः
यः अन्तःसुखः अन्तरारामः तथा अन्तर्ज्योतिः एव यः सः योगी ब्रह्मनिर्वाणं ब्रह्मभूतः अधिगच्छति

पदपरिचयः
यः - दकार पु प्र एक
अन्तःसुखः - अकार पु प्र एक
अन्तरारामः - अकार पु प्र एक
तथा - अव्ययम्
अन्तर्ज्योतिः - इकार पु प्र एक
एव - अव्ययम्
यः - दकार पु प्र एक
सः - दकार पु प्र एक
योगी - नकार पु प्र एक

Downloaded from www.omkaravidya.com

ब्रह्मनिर्वाणं -  अकार नपु द्वि एक
ब्रह्मभूतः -  अकार पु प्र एक
अधिगच्छति -अधि + गम् लट् प्रपु एक

पदार्थः
यः - यः
अन्तःसुखः - अन्तरात्मनि सुखः
अन्तरारामः आत्मनि आरामः
तथा - तथा
अन्तर्ज्योतिः - अन्तरात्मा एव ज्योतिः
एव - एव
यः - यः
सः - सः
योगी - ज्ञानी
ब्रह्मनिर्वाणं - ब्रह्मणि निर्वृतिम्
ब्रह्मभूतः - ब्रह्मभूतः
अधिगच्छति - प्राप्नोति

अन्वयः
यः अन्तःसुखः अन्तरारामः (अस्ति) तथा अन्तर्ज्योतिः एव यः सः योगी ब्रह्मभूतः (सन्) ब्रह्मनिर्वाणं अधिगच्छति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये  चतुर्विंशतितमः श्लोकः। भगवान् श्रीकृष्णः "यः आत्मन्येव सुखं अनुभवति यः आत्मन्येव विहरति न विषयेषु यः आत्मज्ञानेन ज्ञानवान् तादृशः योगी ब्रह्माभिन्नः सन् ब्रह्मन्येव लयं गच्छति ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

यः + अन्तःसुखः - विसर्गउकारः पूर्वरूपसन्धिः

अन्तःसुखः + अन्तरारामः - विसर्गउकारः पूर्वरूपसन्धिः

अन्तरारामः+ तथा - विसर्गसकारः

तथा + अन्तर्ज्योतिः - सवर्णदीर्घसन्धिः

अन्तर्ज्योतिः + एव - विसर्गरेफः

सः + योगी - विसर्गलोपः

ब्रह्मभूतः + ब्रह्मनिर्वाणम् - विसर्गउकारः

▶समासः

अन्तः एव सुखम् यस्य सः अन्तसुखः - समानाधिकरणबहुव्रीहिसमासः

अन्तः एव आरामः यस्य सः अन्तरारामः - समानाधिकरणबहुव्रीहिसमासः

अन्तः एव ज्योतिः यस्य सः अन्तर्ज्योतिः - समानाधिकरणबहुव्रीहिसमासः

ब्रह्मनिर्वाणम् - ब्रह्मणि निर्वाणम् - सप्तमीतत्पुरुषः

## श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥५.२५॥

पदच्छेदः

लभन्ते ब्रह्मनिर्वाणम् ऋषयः क्षीणकल्मषाः छिन्नद्वैधाः यतात्मानः सर्वभूतहिते रताः

Downloaded from www.omkaravidya.com

पदपरिचयः
लभन्ते - लट् प्रपु बहु
ब्रह्मनिर्वाणम् - अकार नपु द्वि एक
ऋषयः - इकार पु प्र बहु
क्षीणकल्मषाः - अकार पु प्र बहु
छिन्नद्वैधाः - अकार पु प्र बहु
यतात्मानः- नकार पु प्र बहु
सर्वभूतहिते - अकार नपु स एक
रताः - अकार पु प्र बहु
पदार्थः
लभन्ते - प्राप्नुवन्ति
ब्रह्मनिर्वाणम् - मोक्षम्
ऋषयः - संयग्दर्शिनः
क्षीणकल्मषाः - क्षीणपापादिदोषाः
छिन्नद्वैधाः - छिन्नसंशयाः
यतात्मानः - संयतेन्द्रियः
सर्वभूतहिते - सर्वेषां भूतानां हिते
रताः - असक्ताः

अन्वयः
क्षीणकल्मषाः छिन्नद्वैधाः यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणम् लभन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये पञ्चविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "ऋषयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः छिन्नसंशयाः संयतेन्द्रियाः सर्वभूतहिते रताः मोक्षं लभन्ते ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

छिन्नद्वैधाः + यतात्मानः - विसर्गलोपः

▶समासः

क्षीणानि कल्मषानि येषां ते- क्षीणकल्मषाः - समानाधिकरणबहुव्रीहिसमासः

छिन्नं द्वैधं यैः ते - छिन्नद्वैधाः समानाधिकरणबहुव्रीहिसमासः

यतः आत्मा यैः ते - यतात्मानः - समानाधिकरणबहुव्रीहिसमासः

सर्वाणि भूतानि – सर्वभूतानि सर्व भूतानां हितम् - सर्वभूतहितम् - षष्ठीतत्पुरुषः तस्मिन् सर्वभूतहिते

## श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ ५.२६॥

पदच्छेदः

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् अभितः ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्

पदपरिचयः

कामक्रोधवियुक्तानां - अकार पु ष बहु

यतीनाम् - इकार पु ष बहु

यतचेतसाम् - सकार पु ष बहु

अभितः - अव्ययम्

ब्रह्मनिर्वाणं - अकार नपु प्र एक

वर्तते - लट् प्रपु एक

विदितात्मनाम् - नकार पु ष बहु

Downloaded from www.omkaravidya.com

पदार्थः
कामक्रोधवियुक्तानां - रागद्वेषरहितानाम्
यतीनां - ब्रह्मनिष्ठानाम्
यतचेतसाम् - संयतान्त:करणानाम्
अभित: - उभयत:
ब्रह्मनिर्वाणं - मोक्षम्
वर्तते - वर्तते
विदितात्मनाम् - विदितात्मनाम्

अन्वयः
कामक्रोधवियुक्तानां यतचेतसाम् विदितात्मनाम् यतीनां अभित: ब्रह्मनिर्वाणं वर्तते ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां पञ्चमे अध्याये षड्विंशतितम: श्लोक:। भगवान् श्रीकृष्ण: “रागद्वेषरहितानां संयतान्तकरणानां विदितातमनाम् ब्रह्मनिष्ठानां मोक्षं वर्तते ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
अभित: + ब्रह्मनिर्वाणम् - विसर्गउकार:

▶समास:
काम: च क्रोध: च कामक्रोधौ - इतरेतरद्वन्द्वसमास:
ताभ्यां वियुक्ता: तृतीयातत्पुरुष:
यतानि चेतांसि यै: ते यतचेतस: - समानादसिकरणबहुव्रीहिसमास:
विदित: आत्मा यै: ते - विदितात्मान: - समानादसिकरणबहुव्रीहिसमास:

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ ५.२७॥

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्तः एव सः ॥ ५.२८॥

पदच्छेदः
स्पर्शान् कृत्वा बहिः बाह्यान् चक्षुः च एव अन्तरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ यतेन्द्रियमनोबुद्धिः मुनिः मोक्षपरायणः विगतेच्छाभयक्रोधः यः सदा मुक्तः एव सः

पदपरिचयः
स्पर्शान् - अकार पु द्वि बहु
कृत्वा - क्त्वान्तम्
बहिः - अव्ययम्
बाह्यान् - अकार पु द्वि बहु
चक्षुः - उकार नपु द्वि एक
च - अव्ययम्
एव - अव्ययम्
अन्तरे - अकार नपु स एक
भ्रुवोः - उकार स्त्री ष द्वि
प्राणापानौ - अकार पु द्वि द्वि
समौ - अकार पु द्वि द्वि

Downloaded from www.omkaravidya.com

कृत्वा - क्त्वान्तम्
नासाभ्यन्तरचारिणौ - नकार पु द्वि ए
यतेन्द्रियमनोबुद्धिः - इकार पु प्र एक
मुनिः - इकार पु प्र एक
मोक्षपरायणः - अकार पु प्र एक
विगतेच्छाभयक्रोधः - अकार पु प्र एक
यः - दकार पु प्र एक
सदा - अव्ययम्
मुक्तः - अकार पु प्र एक
एव - अव्ययम्
सः - दकार पु प्र एक

पदार्थः
स्पर्शान् - शब्दादीन्
कृत्वा - कृत्वा
बहिः - बहिः
बाह्यान् -बाह्यविषयान्
चक्षुः - नेत्रम्
च - च
एव - एव
अन्तरे - मध्ये
भ्रुवोः - भ्रुवोः
प्राणापानौ - प्राणापानवायू
समौ - तुल्यौ
कृत्वा - कृत्वा
नासाभ्यन्तरचारिणौ - नासाभ्यन्तरचारिणौ
यतेन्द्रियमनोबुद्धिः - वशीकृतेन्द्रियचित्तमतिः
मुनिः - संन्यासी

Downloaded from www.omkaravidya.com

मोक्षपरायणः - मोक्षरताः
विगतेच्छाभयक्रोधः - इच्छाभयक्रोधरहितः
यः - यः
सदा - सततम्
मुक्तः - मुक्तः
एव - एव
सः - सः

अन्वयः
यः बाह्यान् स्पर्शान् बहिः कृत्वा चक्षुः भ्रुवोः अन्तरे एव कृत्वा प्राणापानौ नासाभ्यन्तरचारिणौ समौ च कृत्वा यतेन्द्रियमनोबुद्धिः विगतेच्छाभयक्रोधः मोक्षपरायणः मुनिः सः सदा मुक्तः एव ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां पञ्चमे अध्याये सप्तविंशतितमः अष्टविंशतितमः च श्लोकौ। भगवान् श्रीकृष्णः "शब्दादीन् विषयान् न चिन्तयित्वा चक्षुः भ्रवोः मध्ये एव कृत्वा प्राणापानौ नासाभ्यन्तरचारिणौ समौ च कृत्वा यतेन्द्रियमनोबुद्धिः इच्छाभयक्रोधरहितः मोक्षपरायणः मुनिः यः अस्ति सः सर्वदा मुक्तः एव ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
बहिः + बाह्यान् - विसर्गरेफः
बाह्यान् + चक्षुः - सत्वसन्धिः
चक्षुः + च - विसर्गसकारः
च + एव - वृद्धिसन्धिः
एव + अन्तरे - सवर्णदीर्घसन्धिः
यतेन्द्रियमनोबुद्धिः + मुनिः - विसर्गरेफः

Downloaded from www.omkaravidya.com

मुनिः + मोक्षपरायणः - विसर्गरेफः
विगतेच्छाभयक्रोधः + यः - विसर्गउकारः
मुक्तः + एव - विसर्गलोपः

▶समासः
प्राणः च अपानः च - प्राणापानौ - इतरेतरद्वन्द्वसमासः
इन्द्रियाणि च मनः च बुद्धिःच - इन्द्रियमनोबुद्धयः - इतरेतर द्वन्द्वसमासः
यताः इन्द्रियमनोबुद्धयः येन सः यतेन्द्रियमनोबुद्धिः - समानाधिकरणबहुव्रीहिसमासः
मोक्षः परायणं यस्य सः मोक्षपारायणः - समानाधिकरणबहुव्रीहिसमासः
इच्छा च भयं च क्रोधः च इच्छाभयक्रोधाः - इतरेतर द्वन्द्वसमासः
विगताः इच्छाभयक्रोधाः यस्मात् सः - समानाधिकरणबहुव्रीहिसमासः

▶कृदन्ताः
कृत्वा - कृ + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः - संन्यासयोगः

मूलश्लोकः

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ ५.२९॥

पदच्छेदः
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिम् ऋच्छति

Downloaded from www.omkaravidya.com

पदपरिचयः
भोक्तारं - ऋकार पु द्वि एक
यज्ञतपसां - सकार पु ष बहु
सर्वलोकमहेश्वरम् - अकार पु द्वि एक
सुहृदं - दकार पु द्वि एक
सर्वभूतानाम् - अकार नपु ष बहु
ज्ञात्वा - क्तवान्तम्
मां - दकार त्रि द्वि एक
शान्तिम् - इकार स्त्री द्वि एक
ऋच्छति - लट् प्रपु एक

पदार्थः
भोक्तारं - देवतारूपेण भगवन्तम्
यज्ञतपसां - यज्ञानां तपसां च
सर्वलोकमहेश्वरम् - सकलभुवननाथम्
सुहृदं - उपकारिणम्
सर्वभूतानाम् - सर्वप्राणिनाम्
ज्ञात्वा - विदित्वा मां - माम्
शान्तिम् – मोक्षम् ऋच्छति - प्राप्नोति

अन्वयः
यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरम् सर्वभूतानाम् सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये नवविंशतितमः श्लोकः। भगवान् श्रीकृष्णः "योगी यज्ञतपसां भोक्तारं सर्वलोकस्य महेश्वरं भूतानाम् उपकारिणं मां योगनिष्ठया ज्ञात्वा मोक्षं ऋच्छति ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

यज्ञतपसां + भोक्तारं -अनुस्वारसन्धिः

▶समासः

यज्ञाः तपांसि च यज्ञतपांसि  - इतरेतरद्वन्द्वसमासः

सर्वे लोकाः - सर्वलोकाः -विशेषणपूर्वपदकर्मधारयसमासः

महान् ईश्वरः - महेश्वरः विशेषणपूर्वपदकर्मधारयसमासः

सर्वलोकानाम् महेश्वरः - सर्वलोकमहेश्वरः - षष्ठीतत्पुरुषः - तम्

सर्वाणि भूतानि सर्वभूतानि - विशेषणपूर्वपदकर्मधारयसमासः

▶कृदन्ताः

ज्ञात्वा - ज्ञा + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः  - संन्यासयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः ॥ ५ ॥

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगः नाम पञ्चमः अध्यायः

पदपरिचयः

ॐ  - अव् धातुः  + मन् प्रत्ययः

तत् - दकार. नपु. पु  एक

सत् - दकार. नपु. प्र एक

Downloaded from www.omkaravidya.com

इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री  स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे -  अकार. पु. स. एक
कर्मसन्न्यासयोग:- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र  एक
पञ्चमः - अकार. पु. प्र  एक
अध्यायः - अकार. पु. प्र  एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
कर्मसन्न्यासयोगः - कर्मसन्न्यासयोगः
नाम - नाम
पञ्चमः - पञ्चमः
अध्यायः - अध्यायः

Downloaded from www.omkaravidya.com

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगः नामः पञ्चमः अध्यायः (संपूर्णम् भवति)

तात्पर्यम्
तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगः नामः पञ्चमः अध्यायः (संपूर्णम् भवति)

व्याकरणम्
▶सन्धिः
सत् + इति - जश्त्वसन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगः + नामः - विसर्ग उकारः
पञ्चमः + अध्यायः - विसर्ग उकारः गुणसन्धिः पूर्वरूपसन्धिः

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# षष्ठोऽध्यायः

# ध्यानयोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

श्री भगवानुवाच
अनाश्रित: कर्मफलं कार्यं कर्म करोति य: ।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रिय: ॥

पदच्छेदः
श्री भगवान् उवाच अनाश्रित: कर्मफलं कार्यं कर्म करोति य: स: सन्न्यासी च योगी च न निरग्नि: न च अक्रिय:

पदपरिचय:
अनाश्रित: - अकार पु प्र एक
कर्मफलं - अकार नपु द्वि एक
कार्यं - अकार नपु द्वि एक
कर्म - नकार नपु द्वि एक
करोति - लट् प्रपु एक
य: - दकार पु प्र एक
स: - दकार पु प्र एक
सन्न्यासी - नकार पु प्र एक
च - अव्ययम्
योगी - नकार पु प्र एक
च - अव्ययम्
न - अव्ययम्
निरग्नि: - इकार पु प्र एक
न - अव्ययम्
च - अव्ययम्

Downloaded from www.omkaravidya.com

अक्रियः - अकार पु प्र एक

पदार्थः
अनाश्रितः - अनालम्बमानः
कर्मफलं - कर्मणः फलम्
कार्यं - क्रिया
कर्म - कृत्यम्
करोति - कुरुते
यः - यः
सः - सः
सन्न्यासी -सन्न्यासी
योगी - युक्तः
च - च
न - न
निरग्निः - अग्निरहितः
न - न
अक्रियः - अक्रियः

अन्वयः
श्री भगवानुवाच
यः कर्मफलं अनाश्रितः  कार्यं कर्म करोति सः सन्न्यासी च योगी च
(भवति)  निरग्निः न  अक्रियः  च न (भवति) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठोऽध्याये प्रथमः श्लोकः । भगवान् श्रीकृष्णः "कर्मफलम् अनाश्रितः करणीयानि कर्माणि यः करोति सः सन्न्यासी च भवति । परन्तु निरग्निः  च अक्रियः  च योगी न भवति ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

सः + सन्न्यासी - विसर्गलोपः

निरग्निः + न - विसर्गरेफः

च + अक्रियः - सवर्णदीर्घसन्धिः

▶समासः

कर्मणः फलम् - कर्मफलम् - षष्ठीतत्पुरुषः

निर्गताः अग्नयः यस्मात् सः - समानादसिकरणबहुव्रीहिसमासः

अक्रियः - न विद्यते क्रिया यस्य सः - नञ् बहुव्रीहिः

अनाश्रितः - न आश्रितः - नञ् तत्पुरुषः

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥६.२॥

पदच्छेदः

यं सन्न्यासम् इति प्राहुः योगम् तं विद्धि पाण्डव न हि असन्न्यस्तसङ्कल्पः योगी भवति कश्चन

पदपरिचयः

यम् - दकार पु द्वि एक

सन्न्यासम् - अकार पु द्वि एक

इति - अव्ययम्

प्राहुः - लट् लकारः प्रपु बहु

Downloaded from www.omkaravidya.com

योगम्  -अकार पु द्वि एक
तं - दकार पु द्वि एक
विद्धि - लोट् मपु एक
पाण्डव - अकार पु सं प्र
न - अव्ययम्
हि अव्ययम्
असन्न्यस्तसङ्कल्पः - अकार पु प्र एक
योगी - नकार पु प्र एक
भवति - लट् प्रपु एक
कश्चन अव्ययम्

पदार्थः
यम् - सर्वकर्मतत्फलपरित्यागलक्षणम्
सन्न्यासम् - परमार्थसंन्यासम्
इति - एवम्
प्राहुः - वदन्ति
योगम् -    कर्मानुष्ठानलक्षणम्
तं - परमार्थसन्यासम्
विद्धि - जानीहि
पाण्डव - अर्जुन
न - न
हि - हि
असन्न्यस्तसङ्कल्पः -अभिलाषम् अपरित्यजन्
योगी - समाधानवान्
भवति - भवति
कश्चन - कश्चन

Downloaded from www.omkaravidya.com

अन्वयः
हे पाण्डव यं सन्न्यासम् इति प्राहुः तं योगम् (इति) विद्धि न
कश्चन असन्न्यस्तसङ्कल्पः योगी भवति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठेऽध्याये द्वितीयः श्लोकः । भगवान् श्रीकृष्णः "हे पाण्डव यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसन्न्यासम् इति प्राहुः तं कर्मानुष्ठानलक्षणं योगं इति जानीहि । हि यस्मात् न कश्चन असंन्यस्त सङ्कल्पः योगी भवेत् ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
प्राहुः + योगम् - विसर्गरेफः
हि + असन्न्यस्त - यण्सन्धिः
असन्न्यस्तसङ्कल्पः + योगी - विसर्गउकारः
▶समासः
असन्नस्यतः फलविषयः संकल्पः येन सः - असन्न्यस्तसङ्कल्पः - व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥६.३॥

Downloaded from www.omkaravidya.com

पदच्छेदः
आरुरुक्षोः मुनेः योगं कर्म कारणम् उच्यते योगारूढस्य तस्य एव शमः कारणम् उच्यते

पदपरिचयः
आरुरुक्षोः - उकार पु ष एक
मुनेः - इकार पु ष एक
योगं - अकार पु द्वि एक
कर्म - नकार पु प्र एक
कारणम् - अकार नपु प्र एक
उच्यते - कर्मणि लट् प्रपु एक
योगारूढस्य - अकार पु ष एक
तस्य - दकार पु ष एक
एव - अव्ययम्
शमः - अकार पु प्र एक
कारणम् - अकार नपु प्र एक
उच्यते - कर्मणि लट् प्रपु एक

पदार्थः
आरुरुक्षोः - आरोढुम् इच्छवः
मुनेः - कर्मफलसन्न्यासिनः
योगं - कर्मयोगम्
कर्म - कर्म
कारणम् - साधनम्
उच्यते - कथ्यते
योगारूढस्य - योगारूढत्वस्य
तस्य - तस्य
एव - एव

Downloaded from www.omkaravidya.com

शमः - उपशमः
कारणम् - साधनम्
उच्यते - कथ्यते

अन्वयः
योगम्  आरुरुक्षोः मुनेः  कर्म कारणम् उच्यते । तस्य एव योगारूढस्य शमः कारणम् उच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठेऽध्याये तृतीयः श्लोकः । भगवान् श्रीकृष्णः "योगम्  आरुरुक्षोः मुनेः कर्म कारणम् उच्यते । तस्य एव योगारूढस्य शमः कारणम् उच्यते ।" एवम् अवदत् ।

व्याकरणम्
सन्धिः
आरुरुक्षोः + मुनेः - विसर्गरेफः
मुनेः + योगम् - विसर्गरेफः
तस्य + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता  - अथ  षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥ ६.४॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यदा हि न इन्द्रियार्थेषु न कर्मसु अनुषज्जते सर्वसङ्कल्पसंन्यासी योगारूढः तदा उच्यते

पदपरिचयः
यदा - अव्ययम्
हि - अव्ययम्
न -अव्ययम्
इन्द्रियार्थेषु - अकार नपु स बहु
न - अव्ययम्
कर्मसु - नकार नपु स बहु
अनुषज्जते - अनु + षस्ज् + लट् प्रपु एक
सर्वसङ्कल्पसंन्यासी - नकार पु प्र एक
योगारूढः - अकार पु प्र एक
तदा - अव्ययम्
उच्यते - वच् लट् कर्मणि प्रपु एक

पदार्थः
यदा - यदा
हि - हि
न - न
इन्द्रियार्थेषु - इन्द्रियविषयेषु
न - न
कर्मसु - कर्मसु
अनुषज्जते - अनुषङ्गम् करोति
सर्वसङ्कल्पसंन्यासी - सर्वसङ्कल्पसंन्यासी
योगारूढः -प्राप्तयोगः
तदा – तदा उच्यते - कथ्यते

Downloaded from www.omkaravidya.com

अन्वयः
यदा हि इन्द्रियार्थेषु न  अनुषज्जते कर्मसु च न (अनुषज्जते) तदा
सर्वसङ्कल्पसंन्यासी योगारूढः (इति)  उच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे ऽध्याये चतुर्थः श्लोकः । भगवान् श्रीकृष्णः
यदा इन्द्रियाणां शब्दादयेषु न अनुषज्जते कर्मसु च न अनुषज्जते तदा
सर्वसङ्कल्पसंन्यासी योगारूढः इति उच्यते  एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
न +  इन्द्रियार्थेषु - गुणसन्धिः
कर्मसु + अनुषज्जते - यण्सन्धिः
योगारूढः + तदा -विसर्गसकारः
तदा + उच्यते - गुणसन्धिः

श्रीमद्भगवद्गीता  - अथ  षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥६.५॥

पदच्छेदः
उद्धरेत् आत्मना आत्मानं न आत्मानम् अवसादयेत्  आत्मा एव  हि
आत्मनः  बन्धुः आत्मा एव रिपुः आत्मनः

Downloaded from www.omkaravidya.com

पदपरिचय:
उद्धरेत् - विधि प्रपु एक
आत्मना - नकार पु तृ एक
आत्मानं - नकार पु द्वि एक
न - अव्ययम्
आत्मानम् - नकार पु द्वि एक
अवसादयेत् - अव+ सद् + णिच् + विधि प्रपु एक
आत्मा - नकार पु प्र एक
एव - अव्ययम्
हि - अव्ययम्
आत्मन: नकार पु ष. एक
बन्धुः - उकार पु प्र एक
आत्मा -नकार पु प्र एक
एव - अव्ययम्
रिपुः उकार पु प्र एक
आत्मन: - नकार पु ष. एक

पदार्थः
उद्धरेत् - ऊर्ध्वं हरेत्
आत्मना - विचारसहितमनसा
आत्मानं - स्वयम्
न - न
आत्मानम् - आत्मानं
अवसादयेत् - अधौ नयेत्
आत्मा - विचारसहितमन:
एव - एव
हि - हि
आत्मन: - स्वस्य

Downloaded from www.omkaravidya.com

बन्धुः - प्रतिकूलकर्ता
आत्मा - विचाररहितमनः
एव - एव
रिपुः - शत्रुः
आत्मनः - आत्मनः

अन्वयः
आत्मना आत्मानम् उद्धरेत् । आत्मानम् न अवसादयेत् हि आत्मनः आत्मा एव बन्धुः आत्मनः आत्मा एव रिपुः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये पञ्चमः श्लोकः । भगवान् श्रीकृष्णः विचारसहितमनसा स्वम् उर्ध्वं नयेत् । स्वं न अधो नयेत् । स्वस्य विचारसहितमनः एव प्रतिकूलकर्ता । स्वस्य विचाररहितमनः एव प्रतिकूलकर्ता । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
उद्धरेत् + आत्मना - जश्त्वसन्धिः
आत्मना + आत्मानम् - सवर्णदीर्घसन्धिः
न + आत्मानम् - सवर्णदीर्घसन्धिः
आत्मा + एव - वृद्धिसन्धिः
हि + आत्मनः - यण्सन्धिः
आत्मनः + बन्धुः - विसर्गउकारः
बन्धुः + आत्मा - विसर्गरेफः
आत्मा + एव - वृद्धिसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६.६॥

पदच्छेदः
बन्धुः आत्मा आत्मनः तस्य येन आत्मा एव आत्मना जितः
अनात्मनः तु शत्रुत्वे वर्तेत आत्मा एव शत्रुवत्

पदपरिचयः
बन्धुः - उकार पु प्र एक
आत्मा - नकार पु प्र एक
आत्मनः - नकार पु ष एक
तस्य - दकार पु ष. एक
येन - दकार पु तृ एक
आत्मा - नकार पु प्र एक
एव - अव्ययम्
आत्मना नकार पु तृ एक
जितः - अकार पु प्र एक
अनात्मनः - नकार पु ष एक
तु - अव्ययम्
शत्रुत्वे - अकार नपु स. एक
वर्तेत - विधि प्रपु एक
आत्मा - नकार पु प्र एक
एव - अव्ययम्
शत्रुवत् -अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः
बन्धुः - हितकर्ता
आत्मा - अन्तःकरणम्
आत्मनः - स्वस्य
तस्य - तस्य
येन - येन
आत्मा - अन्तःकरणम्
एव - एव
आत्मना - अन्तःकरणेन
जितः - जितः
अनात्मनः - अजितात्मनः
तु - तु
शत्रुत्वे - शत्रुभावे
वर्तेत - स्यात्
आत्मा - आत्मा
एव - एव
शत्रुवत् - शत्रुवत्

अन्वयः
येन आत्मना एव आत्मा जितः तस्य आत्मनः आत्मा बन्धुः अनात्मनः एव तु शत्रुत्वे शत्रुवत् वर्तेत ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये षष्टमः श्लोकः । भगवान् श्रीकृष्णः येन आत्मना एव आत्मा जितः तस्य आत्मनः आत्मा बन्धुः अनात्मनः एव तु शत्रुत्वे शत्रुवत् वर्तेत । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

बन्धुः + आत्मा - विसर्गरेफः

आत्मा + आत्मनः - सवर्णदीर्घसन्धिः

आत्मनः + तस्य - विसर्गसकारः

येन + आत्मा - सवर्णदीर्घसन्धिः

आत्मा + एव - वृद्धिसन्धिः

एव + आत्मना -सवर्णदीर्घसन्धिः

अनात्मनः + तु - विसर्गसकारः

वर्तेत + आत्मा - सवर्णदीर्घसन्धिः

आत्मा + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ६.७॥

पदच्छेदः

जितात्मनः प्रशान्तस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमानयोः

पदपरिचयः

जितात्मनः - नकार पु ष. एक

प्रशान्तस्य - अकार पु ष. एक

Downloaded from www.omkaravidya.com

परमात्मा - नकार पु प्र एक
समाहित: - अकार पु प्र एक
शीतोष्णसुखदु:खेषु - अकार नपु स बहु
तथा - अव्ययम्
मानापमानयो: - अकार पु स द्वि

पदार्थः
जितात्मन: - वशीकृतचित्तस्य
प्रशान्तस्य - प्रसन्नान्त: करणस्य
परमात्मा -परमात्मा
समाहित: - आत्मनि स्थित:
शीतोष्णसुखदु:खेषु - शीतोष्णसुखदु:खेषु
तथा - तथा
मानापमानयो: - मानापमानयो:

अन्वयः
शीतोष्णसुखदु:खेषु तथा मानापमानयो: जितात्मन: प्रशान्तस्य परमात्मा समाहित: ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां षष्ठेऽध्याये सप्तम: श्लोक: । भगवान् श्रीकृष्ण: शीतोष्णसुखदु:खेषु तथा मानापमानयो: जितात्मन: प्रशान्तस्य परमात्मा समाहित: । एवम् अवदत् ।

व्याकरणम्
▶समास:_
जित: आत्मा येन स: - जितात्मा - समानाधिकरणबहुव्रीहिसमास:

Downloaded from www.omkaravidya.com

शीतं च उष्णं च सुखं च दु:खम् च - शीतोष्णसुखदु:खाणि -
इतरेतरद्वन्द्वसमास: तस्मिन् शीतोष्णसुखदु:खेषु
मान: च अपमान: च - मानापमानौ - इतरेतरद्वन्द्वसमास: - तस्य
मानापमानयो:

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रिय: ।
युक्त: इत्युच्यते योगी समलोष्टाश्मकाञ्चन: ॥ ६.८॥

पदच्छेद:
ज्ञानविज्ञानतृप्तात्मा कूटस्थ: विजितेन्द्रिय: युक्त: इति उच्यते योगी
समलोष्टाश्मकाञ्चन:

पदपरिचय:
ज्ञानविज्ञानतृप्तात्मा - नकार पु प्र एक
कूटस्थ: - अकार पु प्र एक
विजितेन्द्रिय: - अकार पु प्र एक
युक्त: - अकार पु प्र एक
इति - अव्ययम्
उच्यते - लट् कर्मणि प्रपु एक
योगी - नकार पु प्र एक
समलोष्टाश्मकाञ्चन: -
अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
ज्ञानविज्ञानतृप्तात्मा - ज्ञानानुभवसनुष्टचित्तः
कूटस्थः -निर्विकारः
विजितेन्द्रियः - वशीकृतेन्द्रियः
युक्तः - समाहितचित्तः
इति - एवम्
उच्यते - अभिधीयते
योगी - योगी
समलोष्टाश्मकाञ्चनः - समलोष्टाश्मकाञ्चनः

अन्वयः
ज्ञानविज्ञानतृप्तात्मा कूटस्थः विजितेन्द्रियः समलोष्टाश्मकाञ्चनः
युक्तः योगी इति उच्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठेऽध्याये अष्टमः श्लोकः । भगवान् श्रीकृष्णः ज्ञानविज्ञानतृप्तात्मा कूटस्थः विजितेन्द्रियः समलोष्टाश्मकाञ्चनः युक्तः योगी इति उच्यते । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
कूटस्थः + विजितेन्द्रियः - विसर्गउकारः
इति + उच्यते - यण् सन्धिः

▶समासः
ज्ञानम् च विज्ञानम् च ज्ञानविज्ञाने - इतरेतरद्वन्द्वसमासः
ज्ञानविज्ञानाभ्यां तृप्तः - ज्ञानविज्ञानतृप्तः - तृतीयातत्पुरुषः

Downloaded from www.omkaravidya.com

ज्ञानविज्ञानतृप्तः आत्मा यस्य सः - ज्ञानविज्ञानतृप्तात्मा - समानाधिकरणबहुव्रीहिसमासः
विजितानि इन्द्रियाणि येन सः - विजितेन्द्रियः समानाधिकरणबहुव्रीहिसमासः
लोष्टः च अश्मा च काञ्चनम् च - लोष्टाश्मकाञ्चनानि - इतरेतरद्वन्द्वसमासः
समानि लोष्टाश्मकाञ्चनानि यस्य सः - समलोष्टाश्मकाञ्चनः -समानाधिकरणबहुव्रीहिसमासः

## श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥६.०९॥

पदच्छेदः
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु अपि च पापेषु समबुद्धिः विशिष्यते

पदपरिचयः
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु - उकार पु स.बहु
साधुषु - उकार पु स.बहु
अपि - अव्ययम्
च - अव्ययम्
पापेषु - अकार नपु स बहु
समबुद्धिः - इकार स्त्री प्र एक
विशिष्यते - कर्मणि प्रपु एक

Downloaded from www.omkaravidya.com

पदार्थः
सुहृत् - प्रत्युपकारम् अनपेक्ष्य उपकर्ता
मित्रम् - स्नेहवान्
अरिः - शत्रुः
उदासीनः - न कस्यचित् पक्षं भजते
मध्यस्थः - यः विरुद्धयोः उभयोः हितैषी
द्वेष्यः - अप्रियः
बन्धुः - सम्बन्धी
साधुषु - शास्त्रानुवर्तिषु
अपि - अपि
च - च
पापेषु - प्रतिषिद्धकारिषु
समबुद्धिः - तुल्यबुद्धिः
विशिष्यते - अतिरिच्यते

अन्वयः
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु  पापेषु अपि च समबुद्धिः विशिष्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये नवमः श्लोकः । भगवान् श्रीकृष्णः सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु  पापेषु अपि च समबुद्धिः विशिष्यते । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
साधुषु + अपि - यण्सन्धिः
समबुद्धिः + विशिष्यते - विसर्गरेफः

Downloaded from www.omkaravidya.com

▶समास:
सुहृत् च मित्रं च अरि: च उदासीन: च  मध्यस्थ: च द्वेष्य: च बन्धु: च - सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धव: - इतरेतरद्वन्द्वसमास: - तेषु
समा बुद्धि: यस्य स: - समबुद्धि: - समानाधिकरणबहुव्रीहिसमास:

श्रीमद्भगवद्गीता  - अथ  षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

योगी युञ्जीत सततमात्मानं रहसि स्थित: ।
एकाकी यतचित्तात्मा निराशीरपरिग्रह: ॥ ६.१०॥

पदच्छेदः

योगी युञ्जीत सततम् आत्मानं रहसि स्थित: एकाकी यतचित्तात्मा निराशी: अपरिग्रह:

पदपरिचय:
योगी - नकार पु प्र एक
युञ्जीत - विधि प्रपु एक
सततम् - अव्ययम्
आत्मानं - नकार पु द्वि एक
रहसि - सकार नपु स एक
स्थित: - अकार पु प्र एक
एकाकी - नकार पु प्र एक
यतचित्तात्मा - नकार पु प्र एक

Downloaded from www.omkaravidya.com

निराशी: - सकार पु प्र एक
अपरिग्रह: - अकार पु प्र एक

पदार्थः

योगी - ध्यायी
युञ्जीत - समादध्यात्
सततम् - सर्वदा
आत्मानं - अन्त: करणम्
रहसि - एकान्ते
स्थित: - स्थित:
एकाकी - एकाकी
यतचित्तात्मा - नियतमनोदेह:
निराशी: - वीततृष्ण:
अपरिग्रह: - परिग्रहरहित:

अन्वयः
यतचित्तात्मा निराशी: अपरिग्रह: एकाकी योगी रहसि स्थित:सततम्
आत्मानं युञ्जीत ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां षष्ठोध्याये दशम: श्लोक: । भगवान् श्रीकृष्ण: यतचित्तात्मा निराशी: अपरिग्रह: एकाकी योगी रहसि स्थित:सततम् आत्मानं युञ्जीत । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

निराशीः + अपरिग्रहः - विसर्गरेफः

▶समासः

अपरिग्रहः - न विद्यते परिग्रहः यस्य सः - नञ् बहुव्रीहिः

श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ६.११॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ ६.१२॥

पदच्छेदः

शुचौ देशे प्रतिष्ठाप्य स्थिरम् आसनम् आत्मनः न अत्युच्छ्रितं न अतिनीचं चैलाजिनकुशोत्तरम् तत्र एकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः उपविश्य आसने युञ्ज्यात् योगम् आत्मविशुद्धये

पदपरिचयः

शुचौ - इकार पु स एक
देशे - अकार पु स एक
प्रतिष्ठाप्य - ल्यबान्तम्
स्थिरम् - अकार नपु द्वि एक

Downloaded from www.omkaravidya.com

आसनम् - अकार नपु द्वि एक
आत्मनः नकार पु ष एक
न - अव्ययम्
अत्युच्छ्रितं - अकार नपु द्वि एक
न - अव्ययम्
अतिनीचं - अकार नपु द्वि एक
चैलाजिनकुशोत्तरम् - अकार नपु द्वि एक
तत्र - अव्ययम्
एकाग्रं - अकार नपु द्वि एक
मनः - सकार नपु द्वि एक
कृत्वा - क्त्वान्तम्
यतचित्तेन्द्रियक्रियः - अकार पु प्र एक
उपविश्य - ल्यबान्तम्
आसने - अकार नपु स एक
युञ्ज्यात् - विधि प्रपु एक
योगम् - अकार पु द्वि एक
आत्मविशुद्धये - इकार स्त्री च एक

पदार्थः
शुचौ - शुद्धे
देशे - स्थले
प्रतिष्ठाप्य - संस्थाप्य
स्थिरम् - स्थिरम्
आसनम् - पीठम्
आत्मनः - स्वस्य
न - न
अत्युच्छ्रितं - अति उच्छ्रितम्
न - न

Downloaded from www.omkaravidya.com

अतिनीचं - अतिनिम्नम् चैलाजिनकुशोत्तरम् -
वस्त्रचर्मदर्भोत्तरम्
तत्र - तत् आसने
एकाग्रं - संलग्नम्
मनः - अन्तःकरणम्
कृत्वा - विधाय
यतचित्तेन्द्रियक्रियः -
यतचित्तेन्द्रियक्रियः
उपविश्य - उपविश्य
आसने - पीठे
युञ्ज्यात् - युञ्ज्यात्
योगम् - ब्रह्मध्यानम्
आत्मविशुद्धये - अन्तः करणशुद्धये

अन्वयः
शुचौ देशे आत्मनः न अत्युच्छ्रितं न अतिनीचं चैलाजिनकुशोत्तरम् स्थिरम् आसनम् प्रतिष्ठाप्य तत्र आसने उपविश्य यतचित्तेन्द्रियक्रियः मनः एकाग्रं कृत्वा आत्मविशुद्धये योगम् युञ्ज्यात् ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां षष्ठे अध्याये एकादशः च द्वादशः श्लोकः । भगवान् श्रीकृष्णः शुचौ देशे आत्मनः न अत्युच्छ्रितं न अतिनीचं चैलाजिनकुशोत्तरम् स्थिरम् आसनम् प्रतिष्ठाप्य तत्र आसने उपविश्य यतचित्तेन्द्रियक्रियः मनः एकाग्रं कृत्वा आत्मविशुद्धये योगम् युञ्ज्यात् । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः

Downloaded from www.omkaravidya.com

न + अत्युच्छ्रितं - सवर्णदीर्घसन्धिः
न + अतिनीचं - सवर्णदीर्घसन्धिः
तत्र + एकाग्रम् - वृद्धिसन्धिः
उपविश्य + आसने - सवर्णदीर्घसन्धिः
युञ्ज्यात् + योगम् - जश्त्वसन्धिः

▶समासः
चैलम् च आजिनम् च चैलाजिने - इतरेतरद्वन्द्वसमासः
कुशेभ्यः उत्तरे - कुशोत्तरे - पञ्चमीतत्पुरुषः
चैलाजिने कुशोत्तरे यस्मिन् तत् चैलाजिनकुशोत्तरम्
एकाग्रम् - एकं अग्रम् यस्य तत् - समानाधिकरणबहुव्रीहिसमासः
चित्तम् च इन्द्रियाणि च - चित्तेन्द्रियाणि - इतरेतरद्वन्स्वसमासः
चित्तेन्द्रियाणाम् क्रियाः - चित्तेन्द्रियक्रियाः - षष्ठितत्पुरुषः
यताः चित्तेन्द्रियक्रियाः येन सः - समानाधिकरणबहुव्रीहिसमासः

## श्रीमद्भगवद्गीता - अथ षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ ६.१३॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ ६.१४॥

Downloaded from www.omkaravidya.com

पदच्छेदः
समं कायशिरोग्रीवं धारयन् अचलं स्थिर: सम्प्रेक्ष्य नासिकाग्रं स्वं दिश: च अनवलोकयन् प्रशान्तात्मा विगतभी: ब्रह्मचारिव्रते स्थित: मन: संयम्य मच्चित्त: युक्त: आसीत मत्पर:

पदपरिचय:
समं - अकार नपु द्वि एक
कायशिरोग्रीवं - अकार नपु द्वि एक
धारयन् - तकार पु प्र एक
अचलं - अकार नपु द्वि एक
स्थिर: - अकार पु प्र एक
सम्प्रेक्ष्य - ल्यबान्तम्
नासिकाग्रं - अकार नपु द्वि एक
स्वं - अकार पु द्वि एक
दिश: - शकार स्त्री द्वि बहु
च - अव्ययम्
अनवलोकयन् - तकार पु प्र एक
प्रशान्तात्मा - नकार पु प्र एक
विगतभी: - ईकार पु प्र एक
ब्रह्मचारिव्रते - अकार पु स एक
स्थित: - अकार पु प्र एक
मन: - सकार नपु द्वि एक
संयम्य - ल्यबान्तम्
मच्चित्त: - अकार पु प्र एक
युक्त: - अकार पु प्र एक
आसीत - विधि प्रपु एक
मत्पर: - अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः

समं - समम्

कायशिरोग्रीवं -देहशीर्षकण्ठम्

धारयन् - धारयन्

अचलं - चलनरहितम्

स्थिरः - स्थिरः

सम्प्रेक्ष्य - वीक्ष्य

नासिकाग्रं - नासिकाग्रं

स्वं - स्वकीयम्

दिशः - दिशः

च - च

अनवलोकयन् - अपश्यन्

प्रशान्तात्मा - शान्तचित्तः

विगतभीः - भयरहितः

ब्रह्मचारिव्रते - ब्रह्मचारिव्रते

स्थितः - तिष्ठन्

मनः - अन्तः करणम्

संयम्य - नियन्त्र्य

मच्चित्तः - ईश्वरचित्तः

युक्तः - योगी

आसीत - उपविशेत्

मत्परः - आत्मपरः

अन्वयः

युक्तः समं कायशिरोग्रीवं अचलं धारयन् स्थिरः (सन्) स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तः मत्परः आसीत ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां षष्ठे अध्याये त्रयोदशः च चतुर्दशः श्लोकौ । भगवान् श्रीकृष्णः युक्तः कायशिरोग्रीवं अचलं समं धारयन्  स्थिरः स्वं  नासिकाग्रं सम्प्रेक्ष्य च दिशः  अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तः मत्परः आसीत । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
धारयन् + अचलं - ङमुडागमनसन्धिः
दिशः + च - विसर्गसकारः
च + अनवलोकयन् - सवर्णदीर्घसन्धिः
विगतभीः + ब्रह्मचारिव्रते - विसर्गरेफः
मच्चित्तः + युक्तः - विसर्गउकारः
युक्तः + आसीत - विसर्गलोपः

▶समासः
कायः च शिरः च ग्रीवा च एतेषाम् समाहारः तत् कायशिरोग्रीवम्
समाहारद्वन्द्वसमासः
नासिकायाः अग्रम् - नासिकाग्रम् - षष्ठीतत्पुरुषः
प्रहर्षेण शान्तः आत्मा अन्तःकरणं यस्य सः - प्रशान्तात्मा -
समानाधिकरणबहुव्रीहिसमासः
विगता भीः यस्मात् सः - समानाधिकरणबहुव्रीहिसमासः
मयि ईश्वरे चित्तम् यस्य सः - मच्चित्तः - व्यधिकरणबहुव्रीहिसमासः
अहं परः यस्य सः- मत्परः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ ६.१५॥

पदच्छेदः
युञ्जन् एवं सदा आत्मानं योगी नियतमानसः शान्तिं निर्वाणपरमां मत्संस्थाम् अधिगच्छति

पदपरिचयः
युञ्जन् - तकार पु प्र एक
एवं - अव्ययम्
सदा - अव्ययम्
आत्मानं - नकार पु द्वि एक
योगी - नकार पु प्र एक
नियतमानसः - सकार पु प्र एक
शान्तिं - इकार स्त्री द्वि एक
निर्वाणपरमां - आकार स्त्री द्वि एक
मत्संस्थाम् - आकार स्त्री द्वि एक
अधिगच्छति - लट् प्रपु एक

पदार्थः
युञ्जन् - समाधानं कुर्वन्
एवं - एवम्
सदा - सर्वदा
आत्मानं - मनः

Downloaded from www.omkaravidya.com

योगी - युक्तः
नियतमानसः - निगृहीतचित्तः
शान्तिं - उपरतिम्
निर्वाणपरमां - मोक्षाख्याम्
मत्संस्थाम् - मदधीनाम्
अधिगच्छति - प्राप्नोति

अन्वयः

नियतमानसः योगी सदा एवम् आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थाम् शान्तिम् अधिगच्छति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये पञ्चादशः श्लोकः । भगवान् श्रीकृष्णः नियतमानसः योगी सदा एवम् आत्मानं युञ्जन् समाधानं कुर्वन् निर्वाणपरमां मदधीनाम् शान्तिम् अधिगच्छति । एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
युञ्जन् + एनम् - ङमुडागमसन्धिः
सदा + आत्मानम् - सवर्णदीर्घसन्धिः

▶समासः
नियतं मानसं येन सः - नियतमानसः - समानाधिकरणबहुव्रीहिसमासः
निर्वाणम् परमम् यस्याः सा - निर्वाणपरमाम् - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥६.१६॥

पदच्छेदः
न अत्यश्नतः तु योगः अस्ति न च एकान्तम् अनश्नतः न च अतिस्वप्नशीलस्य जाग्रतः न एव च अर्जुन

पदपरिचयः
न - अव्ययम्
अत्यश्नतः - तकार पु ष एक
तु - अव्ययम्
योगः - अकार पु प्र एक
अस्ति - लट् प्रपु एक
न - अव्ययम्
च - अव्ययम्
एकान्तम् - अकार पु द्वि एक
अनश्नतः - तकार पु ष एक
न - अव्ययम्
च - अव्ययम्
अतिस्वप्नशीलस्य - अकार पु ष एक
जाग्रतः - तकार पु ष एक
न - अव्ययम्
एव - अव्ययम्
च - अव्ययम्

Downloaded from www.omkaravidya.com

अर्जुन - अकार पु सं प्र

पदार्थः
न - न
अत्यश्नतः - अतीव अश्नतः
तु - तु
योगः - ध्यानयोगः
अस्ति - अस्ति
एकान्तम् - एकान्तम्
अनश्नतः - भोजनम् अकुर्वतः
न - न
च - च
अतिस्वप्नशीलस्य - अतीव निद्रालोः
जाग्रतः - प्रबुद्धस्य
न - न
एव - एव
च - च
अर्जुन - अर्जुन

अन्वयः
हे अर्जुन योगः अत्यश्नतः न च अस्ति । एकान्तम् अनश्नतः न च (अस्ति) । अतिस्वप्नशीलस्य च न (अस्ति) जाग्रतः च न एव ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये षोडषः श्लोकः । भगवान् श्रीकृष्णः *हे अर्जुन योगः अत्यश्नतः न च अस्ति । एकान्तम् अनश्नतः न च अस्ति । अतिस्वप्नशीलस्य च न अस्ति जाग्रतः च न एव ।* एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

न + अत्यश्नतः - सवर्णदीर्घसन्धिः

अत्यश्नतः + तु - विसर्गसकारः

योगः + अस्ति - विसर्गउकारः

च + एकान्तम् - वृद्धिसन्धिः

च + अतिस्वप्नशीलस्य - सवर्णदीर्घसन्धिः

जाग्रतः + न - विसर्गउकारः

न + एव - वृद्धिसन्धिः

च + अर्जुन - सवर्णदीर्घसन्धिः

▶समासः

अति स्वप्नुम् शीलं यस्य सः - अतिस्वप्नशीलः - व्यधिकरणबहुव्रीहिसमासः

न अश्नतः अनश्नतः - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥६.१७॥

पदच्छेदः

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगः भवति दुःखहा

Downloaded from www.omkaravidya.com

पदपरिचयः
युक्ताहारविहारस्य - अकार पु ष एक
 युक्तचेष्टस्य -अकार पु ष एक
कर्मसु - नकार नपु स बहु
युक्तस्वप्नावबोधस्य - अकार पु ष एक
योगः - अकार पु प्र एक
भवति - लट् प्रपु एक
दुःखहा - नकार पु प्र एक

पदार्थः
युक्ताहारविहारस्य -समुचिताहारसञ्चारस्य युक्तचेष्टस्य - नियतचेष्टस्य
कर्मसु - कार्येषु
युक्तस्वप्नावबोधस्य - समुचितनिद्राजागरणस्य
योगः - ध्यानयोगः
भवति - सिध्यति
दुःखहा - दुःखानि हन्ति

अन्वयः
युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगः दुःखहा भवति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये सप्तदशः श्लोकः । भगवान् श्रीकृष्णः युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगः दुःखहा भवति । एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

योगः + भवति - विसर्गउकारः

▶समासः

आहारः च विहारः च आहारविहारौ- इतरेतरद्वन्द्वसमासः

युक्तौ आहारविहारौ येन सः - युक्ताहारविहारः - समानाधिकरणबहुव्रीहिसमासः - तस्य

युक्ता चेष्टा येन सः युक्तचेष्टः - समानाधिकरणबहुव्रीहिसमासः तस्य

स्वप्नः च अवबोधः च - स्वप्नावबोधौ - इतरेतरद्वन्द्वसमासः

युक्तौ स्वप्नावबोधौ येन सः - युक्तस्वप्नावबोधः  समानाधिकरणबहुव्रीहिसमासः तस्य

दुःखं हन्ति इति दुः खहा - उपपदसमासः

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ ६.१८॥

पदच्छेदः

यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते निःस्पृहः सर्वकामेभ्यः युक्तः इति उच्यते तदा

पदपरिचयः

यदा - अव्ययम्

विनियतं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

चित्तम् - अकार नपु प्र एक
आत्मनि - नकार पु स एक
एव - अव्ययम्
अवतिष्ठते - लट् प्रपु एक
निःस्पृहः - अकार पु प्र एक
सर्वकामेभ्यः - अकार पु प बहु
युक्तः - अकार पु प्र एक
इति - अव्ययम्
उच्यते लट् कर्मणि प्रपु एक
तदा - अव्ययम्

पदार्थः
यदा - यस्मिन् समये
विनियतं - विशेषेण निरुद्धम्
चित्तम् - मनः
आत्मनि - ब्रह्मस्वरूपे
एव - एव
अवतिष्ठते - स्थितिं लभते
निःस्पृहः - निरीहः
सर्वकामेभ्यः - दृष्टादृष्टविषयेभ्यः
युक्तः - योगी
इति - इति
उच्यते - कथ्यते
तदा - तदा

अन्वयः
यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते सर्वकामेभ्यः निःस्पृहः तदा युक्तः इति उच्यते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये अष्टादशः श्लोकः । भगवान् श्रीकृष्णः "यदा विनियतम् चित्तम् आत्मनि एव अवतिष्ठते (यदा) सर्वकामेभ्यः निःस्पृहः तदा युक्तः इति उच्यते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
आत्मनि + एव - यण्सन्धिः
एव + अवतिष्ठते - सवर्णदीर्घसन्धिः
सर्वकामेभ्यः + युक्तः -विसर्गउकारः
युक्तः + इति - विसर्गलोपः
इति + उच्यते - यण्सन्धिः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥६.१९॥

पदच्छेदः
यथा दीपः निवातस्थः न इङ्गते सा उपमा स्मृता योगिनः यतचित्तस्य युञ्जतः योगमात्मनः

Downloaded from www.omkaravidya.com

पदपरिचयः
यथा - अव्ययम्
दीपः - अकार पु प्र एक
निवातस्थः - अकार पु प्र एक
न - अव्ययम्
इङ्गते - तकार पु च एक
सा - दकार स्त्री प्र एक
उपमा - आकार स्त्री प्र एक
स्मृता - आकार स्त्री प्र एक
योगिनः - नकार पु ष एक
यतचित्तस्य - अकार नपु ष एक
युञ्जतः - तकार पु ष एक
योगम् - अकार पु द्वि एक
आत्मनः - नकार पु ष एक

पदार्थः
यथा- यथा
दीपः - प्रदीपः
निवातस्थः - निवाते देशे स्थितः
न - न
इङ्गते - चलति
सा - सा
उपमा - दृष्टान्तः
स्मृता - चिन्तिता
योगिनः - युक्तस्य
यतचित्तस्य - यतचित्तस्य
युञ्जतः - अनुतिष्ठतः
योगम् - ध्यानम् आत्मनः - स्वस्य

Downloaded from www.omkaravidya.com

अन्वयः
यथा निवातस्थः दीपः न इङ्गते (तथा) आत्मनः योगम् युञ्जतः योगिनः
यतचित्तस्य सा उपमा स्मृता ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये नवदशः श्लोकः । भगवान् श्रीकृष्णः
“यथा निवातस्थः दीपः न इङ्गते (तथा) आत्मनः योगम् युञ्जतः योगिनः
यतचित्तस्य सा उपमा स्मृता ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
दीपः + निवातस्थः- विसर्गउकारः
निवातस्थः + न - विसर्गउकारः
न + इङ्गते - गुणसन्धिः
सा + उपमा - गुणसन्धिः
योगिनः + यतचित्तस्य - विसर्गउकारः
युञ्जतः + योगम् - विसर्गउकारः

▶समासः
यतम् च तत् चित्तम् च  - यतचित्तः विशेषणपूर्वपदकर्मधारयसमासः

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ ६.२०॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यत्र उपरमते चित्तं निरुद्धं योगसेवया यत्र च एव आत्मना आत्मानं पश्यन् आत्मनि तुष्यति

पदपरिचयः
यत्र - अव्ययम्
उपरमते - लट् प्रपु एक
चित्तं - अकार नपु प्र एक
निरुद्धं - अकार नपु प्र एक
योगसेवया - आकार स्त्री तृ एक
यत्र - अव्ययम्
च - अव्ययम्
एव - अव्ययम्
आत्मना - नकार पु तृ एक
आत्मानं नकार पु द्वि एक
पश्यन् - तकार पु प्र एक
आत्मनि - नकार पु स एक
तुष्यति - लट् प्रपु एक

पदार्थः
यत्र - यस्मिन् काले
उपरमते - विरमति
चित्तं - अन्तः करणम्
निरुद्धं - निवारितप्रचारम्
योगसेवया - योगानुष्ठाणेन
यत्र -यस्मिन् काले
च - च
एव - एव

Downloaded from www.omkaravidya.com

आत्मना - अन्तः करणेन
आत्मानं - अात्मस्वरूपम्
पश्यन् - अवलोकयन्
आत्मनि - स्वस्मिन्
तुष्यति - तुष्टिं भजते

अन्वयः
यत्र योगसेवया निरुद्धम् चित्तम् उपरमते यत्र च आत्मना आत्मानं एव पश्यन् आत्मनि तुष्यति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये विंशतितमः श्लोकः । भगवान् श्रीकृष्णः "यत्र योगसेवया निरुद्धम् चित्तम् उपरमते यत्र च आत्मना आत्मानं एव पश्यन् आत्मनि तुष्यति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
यत्र + उपरमते - गुणसन्धिः
च + एव - वृद्धिसन्धिः
एव + आत्मना - सवर्णदीर्घसन्धिः
आत्मना + आत्मानं - सवर्णदीर्घसन्धिः
पश्यन् + आत्मनि - ङमुडागमनसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वत: ॥ ६.२१॥

पदच्छेदः
सुखम् आत्यन्तिकं यत् तत् बुद्धिग्राह्यम् अतीन्द्रियम् वेत्ति यत्र न च एव अयं स्थित: चलति तत्त्वत:

पदपरिचय:
सुखम् - अकार नपु द्वि एक
आत्यन्तिकं - अकार नपु द्वि एक
यत् - दकार नपु द्वि एक
तत् - दकार नपु द्वि एक
बुद्धिग्राह्यम् -अकार नपु द्वि एक
अतीन्द्रियम् - अकार नपु द्वि एक
वेत्ति - लट् प्रपु एक
यत्र - अव्ययम्
न -अव्ययम्
च - अव्ययम्
एव - अव्ययम्
अयं - मकार पु प्र एक
स्थित: - अकार पु प्र एक
चलति - लट् प्रपु एक
तत्त्वत: - अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः

सुखम् - आनन्दम्

आत्यन्तिकं - अनन्तम्

यत् - यत्

तत्  - तत्

बुद्धिग्राह्यम् - मतिबोध्यम्

अतीन्द्रियम्  - इन्द्रियागोचरम्

वेत्ति - जानाति

यत्र - यत्र

न - न

च - च

एव - एव

अयं - पुरुषः

स्थितः - आत्मस्वरूपे स्थितः

चलति - विचलति

तत्त्वतः - तत्त्वस्वरूपात्

अन्वयः

यत् तत्  आत्यन्तिकम् अतीन्द्रियम् बुद्धिग्राह्यम् सुखं यत्र वेत्ति (तत्र)  च अयं स्थितः   तत्त्वतः न एव चलति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये एकविंशतितमः श्लोकः । भगवान् श्रीकृष्णः “यत् तत्  आत्यन्तिकम् अतीन्द्रियम् बुद्धिग्राह्यम्सुखं यत्र वेत्ति (तत्र)  च अयं स्थितः   तत्त्वतः न एव चलति  ।“ एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

तत् + बुद्धिग्राह्यम् - जश्त्वसन्धि:

च + एव - वृद्धिसन्धि:

एव + अयं - सवर्णदीर्घसन्तधि:

स्थित: + चलति - विसर्गसकार:

▶समास:

बुद्धया ग्राह्यम् बुद्धिग्राह्यम् - तृतीयातत्पुरुष:

श्रीमद्भगवद्गीता - षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं तत: ।
यस्मिन्स्थितो न दु: खेन गुरुणापि विचाल्यते ॥ ६.२२॥

पदच्छेदः

यं लब्ध्वा च अपरं लाभं मन्यते न अधिकं तत: यस्मिन् स्थित: न दु: खेन गुरुणा अपि विचाल्यते

पदपरिचय:

यं - दकार पु द्वि एक

लब्ध्वा - क्त्वान्तम्

च - अव्ययम्

अपरं - अकार पु द्वि एक

लाभं - अकार पु द्वि एक

मन्यते - लट् प्रपु एक

न - अव्ययम्

Downloaded from www.omkaravidya.com

अधिकं - अकार पु द्वि एक
ततः - अव्ययम्
यस्मिन् - दकार पु स एक
स्थितः - अकार पु प्र एक
न - अव्ययम्
दुः खेन - अकार नपु तृ एक
गुरुणा - उकार नपु तृ एक
अपि - अव्ययम्
विचाल्यते - लट् कर्मणि णिच् प्रपु एक

पदार्थः
यं - यम्
लब्ध्वा - प्राप्य
च - च
अपरं - अन्यत्
लाभं - प्रयोजनम्
मन्यते - चिन्तयति
न - न
अधिकं - उत्कृष्टम्
ततः - ततः
यस्मिन् - आत्मतत्त्वे
स्थितः - स्थितः
न - न
दुः खेन - क्लेशेन
गुरुणा - महता
अपि - अपि
विचाल्यते - अपसार्यते

Downloaded from www.omkaravidya.com

अन्वयः
यं लब्ध्वा ततः अपरं अधिकं लाभं न  मन्यते यस्मिन् स्थितः गुरुणा दुः खेन अपि न विचाल्यते (तं योगसंज्ञितं विद्यात्)।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठोध्याये द्वाविंशतितमःश्लोकः । भगवान् श्रीकृष्णः "यं लब्ध्वा ततः अपरं अधिकं लाभं न  मन्यते  यस्मिन् स्थितः गुरुणा  दुः खेन अपि न विचाल्यते । तं योगसंज्ञितं विद्यात्)।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
च + अपरम् - सवर्णदीर्घसन्धिः
न + अधिकम् - सवर्णदीर्घसन्धिः
स्थितः + न - विसर्गउकारः
गुरुणा + अपि - सवर्णदीर्घसन्धिः

▶ कृदन्ताः
लब्ध्वा - लभ् + क्त्वा प्रत्ययः
स्थितः - स्था + क्त प्रत्ययः

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ ६.२४॥

Downloaded from www.omkaravidya.com

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ ६.२५॥

पदच्छेदः
सङ्कल्पप्रभवान् कामान् त्यक्त्वा सर्वान् अशेषतः मनसा एव इन्द्रियग्रामं विनियम्य समन्ततः शनैः शनैः उपरमेत् बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किञ्चित् अपि चिन्तयेत्

पदपरिचयः
सङ्कल्पप्रभवान् - अकार पु द्वि बहु
कामान् - अकार पु द्वि बहु
त्यक्त्वा - क्त्वान्तम्
सर्वान् - अकार पु द्वि बहु
अशेषतः - अकार पु प्र एक
मनसा - सकार नपु तृ एक
एव - अव्ययम्
इन्द्रियग्रामं - अकार पु द्वि एक
विनियम्य - ल्यबन्तम्
समन्ततः - अव्ययम्
शनैः - अव्ययम्
शनैः - अव्ययम्
उपरमेत् - उप + रम् विधि प्रपु एक
बुद्ध्या - इकार स्त्री तृ एक
धृतिगृहीतया - आकार स्त्री तृ एक
आत्मसंस्थं - अकार नपु द्वि बहु
मनः - सकार नपु द्वि एक
कृत्वा - क्त्वान्तम्
न - अव्ययम्

Downloaded from www.omkaravidya.com

किञ्चित् - अव्ययम्
अपि - अव्ययम्
चिन्तयेत् - विधि प्रपु एक

पदार्थः
सङ्कल्पप्रभवान् - सङ्कल्पात् उद्भवान्
कामान् - अभिलाषान्
त्यक्त्वा - परित्यज्य
सर्वान् - अखिलान्
अशेषतः - शेषरहितः
मनसा - चित्तेन
एव - एव
इन्द्रियग्रामं - इन्द्रियसमुदायम्
विनियम्य - नियमनं कृत्वा
समन्ततः - समन्तात्
शनैः - मन्दम्
शनैः- मन्दम्
उपरमेत् - उपरतिं कुर्यात्
बुद्ध्या - मत्या
धृतिगृहीतया - धैर्येण युक्तया
आत्मसंस्थं - आत्मनि संस्थितम्
मनः - चित्तम्
कृत्वा - निधाय
न - न
किञ्चित् - किञ्चित्
अपि - अपि
चिन्तयेत् - चिन्तयेत्

Downloaded from www.omkaravidya.com

अन्वयः
सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा मनसा एव
इन्द्रियग्रामं  समन्ततः विनियम्य धृतिगृहीतया बुद्ध्या मनः आत्मसंस्थं कृत्वा
शनैः शनैः उपरमेत्  किञ्चित् अपि न चिन्तयेत् ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां षष्ठे अध्याये चतुर्विंशतितमः च पञ्चविंशतितमः च श्लोकौ । भगवान् श्रीकृष्णः *सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा मनसा एव इन्द्रियग्रामं समन्ततः विनियम्य धृतिगृहीतया बुद्ध्या मनः आत्मसंस्थं कृत्वा शनैः शनैः उपरमेत्  किञ्चित् अपि न चिन्तयेत् ।* एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
कामान् + त्यक्त्वा -सत्वसन्धिः
मनसा + एव - वृद्धिसन्धिः
एव +  इन्द्रियग्रामं - गुणसन्धिः
शनैः + उपरमेत् - विसर्गरेफः
उपरमेत् +बुद्ध्या - जश्त्वसन्धिः

▶समासः
सङ्कल्पात् प्रभवः - पञ्चमीतत्पुरुषः
न शेषतः अशेषतः - नञ्तत्पुरुषः
इन्द्रियाणाम् ग्रामम् - इन्द्रियग्रामं - षष्ठीतत्पुरुषः
धृत्या गृहीता - धृतिगृहीता - तृतीया तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥६.२६॥

पदच्छेदः
यतः यतः निश्चरति मनः चञ्चलम् अस्थिरम् ततः ततः नियम्य एतत् आत्मनि एव वशं नयेत्

पदपरिचयः
यतः - अव्ययम्
यतः - अव्ययम्
निश्चरति - लट् प्रपु एक
मनः - सकार नपु प्र एक
चञ्चलम् - अकार नपु प्र एक
अस्थिरम् - अकार नपु प्र एक
ततः - अव्ययम्
ततः - अव्ययम्
नियम्य - ल्यबन्तम्
एतत् - दकार नपु द्वि एक
आत्मनि - नकार पु स एक
एव - अव्ययम्
वशं - अकार पु द्वि एक
नयेत् - विधि प्रपु एक

पदार्थः

Downloaded from www.omkaravidya.com

यतः - यस्मात्
यतः - यस्मात्
निश्चरति - निर्गच्छति
मनः - अन्तःकरणम्
चञ्चलम् -चञ्चलम्
अस्थिरम् - अदृढम्
ततः - तस्मात्
ततः - तस्मात्
नियम्य - निरुध्य
एतत् - एतत्
आत्मनि - आत्मस्वरूपे
एव - एव
वशं - वशम्
नयेत् - आपादयेत्

अन्वयः
अस्थिरम् चञ्चलम् मनः यतः यतः निश्चरति ततः ततः एतत् नियम्य आत्मनि एव वशं नयेत् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये षड्विंशतितमः श्लोकः । भगवान् श्रीकृष्णः “अस्थिरम् चञ्चलम् मनः यतः यतः निश्चरति ततः ततः एतत् नियम्य आत्मनि एव वशं नयेत् ।“ एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

यत: + यत: - विसर्गउकार:

यत: + निश्चरति - विसर्गउकार:

मन: + चञ्चलम् विसर्गसकार:

तत: + तत: - विसर्गसकार:

तत: + नियम्य - विसर्गउकार:

नियम्य + एतत् - वृद्धिसन्धि:

एतत् + आत्मनि - जश्त्वसन्धि:

आत्मनि +एव - यण्सन्धि:

वशं + नयेत् - अनुस्वारसन्धि:

▶समास:

न स्थिरम् - अस्थिरम् - नञ्तत्पुरुष:

▶कृदन्ता:

नियम्य - नि + यम् + ल्यप् प्रत्यय:

श्रीमद्भगवद्गीता - षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ ६.२७॥

पदच्छेदः

प्रशान्तमनसं हि एनं योगिनं सुखम् उत्तमम् उपैति शान्तरजसं ब्रह्मभूतम् अकल्मषम्

Downloaded from www.omkaravidya.com

पदपरिचयः
प्रशान्तमनसं - अकार पु द्वि एक
एनं - दकार पु द्वि एक
योगिनं - नकार पु द्वि एक
सुखम् - अकार नपु प्र एक
उत्तमम् - अकार नपु प्र एक
उपैति - लट् प्रपु एक
शान्तरजसं - अकार पु द्वि एक
ब्रह्मभूतम् - अकार पु द्वि एक
अकल्मषम् - अकार पु द्वि एक

पदार्थः
प्रशान्तमनसं - शान्तचित्तम्
हि - हि
एनं -एतम्
योगिनं - योगिनम्
सुखम् - आनन्दम्
उत्तमम् - निरतिशयम्
उपैति - उपगच्छति
शान्तरजसं - प्रक्षीणमोहादिक्लेशरजसम्
ब्रह्मभूतम् - जीवन्मुक्तम्
अकल्मषम् -अधर्मादिवर्जितम्

अन्वयः

उत्तमम् सुखम् प्रशान्तमनसं शान्तरजसं ब्रह्मभूतम् अकल्मषम् एनं योगिनं हि उपैति ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये सप्तविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "उत्तमम् सुखम् प्रशान्तमनसं शान्तरजसं ब्रह्मभूतम् अकल्मषम् एनं योगिनं हि उपैति ।" एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

हि + एनम् - यण्सन्धिः

▶समासः

प्रशान्तं मनः यस्य सः -प्रशान्तमनसः - समानाधिकरणबहुव्रीहिसमासः - तम्

शान्तं रजः यस्य सः - शान्तरजसः -समानाधिकरणबहुव्रीहिसमासः

न कल्मषम् - अकल्मषम् - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।

सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ ६.२८॥

पदच्छेदः

युञ्जन् एवं सदा आत्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते

Downloaded from www.omkaravidya.com

पदपरिचय:

युञ्जन् - तकार पु प्र एक

एवं - अव्ययम्

सदा - अव्ययम्

आत्मानं - नकार पु द्वि एक

योगी - नकार पु प्र एक

विगतकल्मष: - अकार पु प्र एक

सुखेन - अकार नपु तृ एक

ब्रह्मसंस्पर्शम् - अकार नपु द्वि एक

अत्यन्तं - अकार नपु द्वि एक

सुखम् - अकार नपु द्वि एक

अश्नुते - लट् प्रपु एक

पदार्थः

युञ्जन् - स्वाधीनं कुर्वन्

एवं - अनेन प्रकारणेन

सदा - सर्वदा

आत्मानं - मन:

योगी - योगी

विगतकल्मष: - विगतपाप:

सुखेन - अनायासेन

ब्रह्मसंस्पर्शम् -परमात्मसंपर्कम्

अत्यन्तं - अन्तम अतीत्य

सुखम् - आनन्दम्     अश्नुते -प्राप्नोति

अन्वयः

विगतकल्मष: योगी एवम् आत्मानं सदा युञ्जन् सुखेन अत्यन्तं ब्रह्मसंस्पर्शम् सुखम् अश्नुते ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये अष्ठाविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "विगतकल्मषः योगी  एवम् आत्मानं सदा युञ्जन् सुखेन अत्यन्तं ब्रह्मसंस्पर्शम्  सुखम् अश्नुते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
युञ्जन् + एवं - ङमुडागमनसन्धिः
सदा + आत्मानं - सवर्णदीर्घसन्धिः

▶समासः
विगतः कल्मषः यस्मात् सः विगतकल्मषः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥६.३०॥

पदच्छेदः

यः मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्य अहं न प्रणश्यामि सः च मे न प्रणश्यति

पदपरिचयः
यः - दकार पु प्र एक

Downloaded from www.omkaravidya.com

मां  - दकार त्रिषु द्वि एक
पश्यति - लट् प्रपु एक
सर्वत्र - अव्ययम्
सर्वं  - अकार पु द्वि एक
च - अव्ययम्
मयि - दकार त्रिषु स. एक
पश्यति - लट् प्रपु एक
तस्य - दकार पु ष. एक
अहं - दकार त्रि प्र एक
न - अव्ययम्
प्रणश्यामि - लट् उपु एक
सः - दकार पु प्र एक
च - अव्ययम्
मे - दकार पु च एक
न - अव्ययम्
प्रणश्यति - लट् प्रपु एक

पदार्थः
यः - यः
मां - माम्
पश्यति - पश्यति
सर्वत्र - सर्वेषु भूतेषु
सर्वं - अखिलम्
च - च
मयि - परमात्मनि
पश्यति - ईक्षते
तस्य - तस्य
अहं - ब्रह्मरूपः अहम्

Downloaded from www.omkaravidya.com

न - न
प्रणश्यामि - परोक्षतां गमिष्यामि
सः - सः
च - च
मे - मह्यम्
न - न
प्रणश्यति - परोक्षीभवति

अन्वयः
यः सर्वत्र मां पश्यति  सर्वं च मयि पश्यति तस्य अहं न प्रणश्यामि । सः च मे न प्रणश्यति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये त्रिशत्तमः श्लोकः । भगवान् श्रीकृष्णः "यः सर्वत्र मां पश्यति  सर्वं च मयि पश्यति तस्य अहं न प्रणश्यामि । सः च मे न प्रणश्यति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
यः + माम् - विसर्गउकारः
तस्य + अहं - सवर्णदीर्घसन्धिः
सः + च - विसर्गलोपः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ६.३१॥

पदच्छेदः
सर्वभूतस्थितं यः मां भजति एकत्वम् आस्थितः सर्वथा वर्तमानः अपि सः योगी मयि वर्तते

पदपरिचयः
सर्वभूतस्थितं -अकार पु द्वि एक
यः - दकार पु प्र एक
मां अकार त्रि द्वि एक
भजति - लट् प्रपु एक
एकत्वम् - अकार नपु द्वि एक
आस्थितः - अकार पु प्र एक
सर्वथा - अव्ययम्
वर्तमानः - अकार पु प्र एक
अपि - अव्ययम्
सः - दकार पु प्र एक
योगी - नकार पु प्र एक
मयि - दकार त्रि स एक
वर्तते - लट् प्रपु एक

पदार्थः
सर्वभूतस्थितं - सर्वप्राणिस्थितम्

Downloaded from www.omkaravidya.com

यः - यः
मां  - मा
भजति - सेवते
एकत्वम् - अभेदत्वम्
आस्थितः - आश्रितः
सर्वथा - सर्वप्रकारैः
वर्तमानः - स्थितः
अपि - अपि
सः - सः
मयि – परमात्मनि
योगी - संयक्दर्शी
वर्तते - तिष्ठति

अन्वयः
एकत्वम् आस्थितः  यः सर्वभूतस्थितं मां  भजति सः सर्वथा वर्तमानः अपि (सः ) योगी मयि वर्तते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये एकत्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः “एकत्वम् आस्थितः  यः सर्वभूतस्थितं मां  भजति सः सर्वथा वर्तमानः अपि (सः ) योगी मयि वर्तते ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
यः + माम् - विसर्गउकारः
भजति + एकत्वम् - यण्सन्धिः
वर्तमानः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
सः + योगी - विसर्गलोपः
▶समासः
सर्वभूतेषु स्थितः सर्वभूतस्थितः - सप्तमी तत्पुरुषः - तम्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दु:खं स योगी परमो मत: ॥६.३२॥

पदच्छेदः
आत्मौपम्येन सर्वत्र समं पश्यति य: अर्जुन सुखं वा यदि वा दु:खं स: योगी परम: मत:

पदपरिचय:
आत्मौपम्येन - अकार पु तृ एक
सर्वत्र - अव्ययम्
समं -अकार नपु द्वि एक
पश्यति - लट् प्रपु  एक
य: - य:
अर्जुन - अकार पु सं प्र
सुखं - अकार नपु द्वि एक
वा - अव्ययम्
यदि -  अव्ययम्
वा -  अव्ययम्
दु:खं - अकार नपु द्वि एक
स: - दकार पु प्र एक
योगी - नकार पु प्र एक
परम: - अकार पु प्र एक
मत: - अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
आत्मौपम्येन - स्वसादृशेन
सर्वत्र - सर्वभूतेषु
समं - तुल्यम्
पश्यति - वीक्षते
यः - यः
अर्जुन - पाण्डव
सुखं - आनन्दम्
वा - वा
यदि - यदि
वा - वा
दुःखं - खेदम्
सः - सः
योगी - सम्यक्दर्शननिष्ठः
परमः - उत्कृष्टः
मतः - अभिप्रेतः

अन्वयः
हे अर्जुन! सर्वत्र यदि सुखं वा दुःखं वा आत्मौपम्येन समं यः पश्यति सः योगी परमः मतः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये द्वात्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "हे अर्जुन! सर्वत्र यदि सुखं वा दुःखं वा आत्मौपम्येन समं यः पश्यति सः योगी परमः मतः ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः

Downloaded from www.omkaravidya.com

यः + अर्जुन - विसर्गउकारः पूर्वरूपसन्धिः
सः + योगी - विसर्गलोपः
परमः + मतः - विसर्गउकारः

▶समासः
आत्मनः औपम्यम् - आत्मौपम्यम् - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

अर्जुन उवाच
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ६.३३॥

पदच्छेदः
यः अयं योगः त्वया प्रोक्तः साम्येन मधुसूदन एतस्य अहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्

पदपरिचयः
यः - दकार पु प्र एक
अयं - मकार पु प्र एक
योगः - अकार पु प्र एक
त्वया - दकार त्रिषु तृ एक
प्रोक्तः क्तान्तम्
साम्येन - अकार पु तृ एक
मधुसूदन - अकार पु सं प्र
एतस्य - दकार पु ष एक

Downloaded from www.omkaravidya.com

अहं - दकार पु प्र एक
न - अव्ययम्
पश्यामि - लट् उपु एक
चञ्चलत्वात् - अकार नपु प एक
स्थितिं - इकार स्त्री द्वि एक
स्थिराम् - आकार स्त्री द्वि एक

पदार्थः
यः - यः
अयं - एषः
योगः - ध्यानयोगः
त्वया - भवता
प्रोक्तः - उपदिष्टः
साम्येन - समत्वेन
मधुसूदन - कृष्ण
एतस्य - अस्य
अहं - अहम्
न - न
पश्यामि - उपलभे
चञ्चलत्वात् -अस्थिरत्वात्
स्थितिं - अवस्थाम्
स्थिराम् - अचलाम्

अन्वयः
हे मधुसूदन! यः अयं योगः त्वया साम्येन प्रोक्तः एतस्य स्थिराम् स्थितिं चञ्चलत्वात् अहं न पश्यामि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये त्रयस्त्रिंशत्तमः श्लोकः । अर्जुनः “हे मधुसूदन! यः अयं योगः त्वया साम्येन प्रोक्तः एतस्य स्थिराम् स्थितिं चञ्चलत्वात् अहं न पश्यामि ।“ एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

यः + अयम् - विसर्गउकारः पूर्वरूपसन्धिः

योगः + त्वया - विसर्गसकारः

एतस्य + अयम् - सवर्णदीर्घसन्धिः

▶ कृदन्ताः

प्रोक्तः - प्र + वच् + क्त प्रत्ययः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ६.३४॥

पदच्छेदः

चञ्चलं हि मनः कृष्ण प्रमाथि बलवत् दृढम् तस्य अहं निग्रहं मन्ये वायोः इव सुदुष्करम्

Downloaded from www.omkaravidya.com

पदपरिचयः
चञ्चलं - अकार नपु प्र एक
हि - अव्ययम्
मनः - सकार नपु प्र एक
कृष्ण - अकार पु सं प्र
प्रमाथि - नकार नपु प्र एक
बलवत् - तकार नपु प्र एक
दृढम् - अकार नपु प्र एक
तस्य - दकार पु ष एक
अहं - दकार त्रि प्र एक
निग्रहं - अकार नपु द्वि एक
मन्ये - लट् उपु एक
वायोः - उकार पु ष. एक
इव - अव्ययम्
सुदुष्करम् - अकार नपु द्वि एक

पदार्थः

चञ्चलं - अस्थिरम्
हि - हि
मनः - अन्तः करणम्
कृष्ण - भक्तजनपापादिदोषाकर्षणः
प्रमाथि - प्रमथनशीलम्
बलवत् - शक्तिमत्
तस्य - तस्य
अहं - अहम्
निग्रहं - निरोधम्
मन्ये - चिन्तयामि

Downloaded from www.omkaravidya.com

वायोः - मरुतः
इव - इव
सुदुष्करम् - असाध्यम्

अन्वयः
हे कृष्ण! मनः चञ्चलं प्रमाथि बलवत् दृढम् हि । अहं तस्य निग्रहं वायोः इव सुदुष्करम् (इति) मन्ये ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये चतुस्त्रिंशत्तमः श्लोकः । अर्जनः "हे कृष्ण! मम मनः चञ्चलं प्रमाथि च । तत् बलवत् दृढम् च । यथा वायोः निग्रहं दुष्करं तथा मनसः निग्रहमपि सुदुष्करम् इति मम अभिप्रायः ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
बलवत् + दृढम् - जश्त्वसन्धिः
तस्य + अहम - सवर्णदीर्घसन्धिः
वायोः + इव - विसर्गरेफः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

श्री भगवानुवाच
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ६.३५॥

Downloaded from www.omkaravidya.com

पदच्छेदः
असंशयं महाबाहो मनः  दुर्निग्रहं चलम् अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते

पदपरिचयः
असंशयं - अकार पु. द्वि एक
महाबाहो - उकार पु सं प्र एक
मनः  - सकार नपु प्र एक
दुर्निग्रहं  - अकार नपु प्र एक
चलम्  - अकार नपु प्र एक
अभ्यासेन  - अकार पु तृ एक
तु - अव्ययम्
कौन्तेय -अकार पु सं प्र एक
वैराग्येण - अकार नपु तृ एक
च - अव्ययम्
गृह्यते - ग्रह् प्रपु एक

पदार्थः
असंशयं - निस्सन्देहम्
महाबाहो - अर्जुन
मनः  - अन्तः करणम्
दुर्निग्रहं - दुर्निरोधम्
चलम् - चञ्चलम्
अभ्यासेन - अ◌ावृत्त्या
तु - परन्तु
कौन्तेय - अर्जुन
वैराग्येण -  वैराग्येण

Downloaded from www.omkaravidya.com

च - च
गृह्यते - निरुध्यते

अन्वयः
हे महाबाहो! मनः  दुर्निग्रहं चलम् (इत्यत्र) असंशयम् तु कौन्तेय ! अभ्यासेन तु  वैराग्येण च (मनः) गृह्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये पञ्चत्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः “हे महाबाहो! मनः  दुर्निग्रहं चलम् च । एतस्मिन् विषये संशयम् नास्ति  । परन्तु हे कौन्तेय ! अभ्यासेन च वैराग्येण च मनः गृह्यते ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
मनः + दुर्निरंग्रहम - विसर्गउकारः

▶समासः
असंशयम् - न संशयम् - नञ् तत्पुरुषः

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥६.३६॥

Downloaded from www.omkaravidya.com

पदच्छेदः
असंयतात्मना योगः दुष्प्रापः इति मे मतिः वश्यात्मना तु यतता शक्यः अवाप्तुम् उपायतः

पदपरिचयः
असंयतात्मना - नकार पु तृ एक
योगः - अकार पु प्र एक
दुष्प्रापः -अकार पु प्र एक
इति - अव्ययम्
मे - दकार त्रिषु ष. एक
मतिः - इकार स्त्री प्र एक
वश्यात्मना - नकार पु तृ एक
तु - अव्ययम्
यतता - तकार पु तृ एक
शक्यः - अकार पु प्र एक
अवाप्तुम् - तुमुनन्तम्
उपायतः - अव्ययम्

पदार्थः
असंयतात्मना - अनिरुद्धचित्तेन
योगः - योगः
दुष्प्रापः दुर्लभः
इति - एवम्
मे - मम
मतिः - अभिप्रायः
वश्यात्मना - निगृहीतचित्तेन
तु - परन्तु
यतता -प्रयत्नेन

Downloaded from www.omkaravidya.com

शक्यः - साध्यः
अवाप्तुम् - प्राप्तुम्
उपायतः - उपायतः

अन्वयः
असंयतात्मना योगः दुष्प्रापः इति मे मतिः । वश्यात्मना यतता तु उपायतः अवाप्तुम् शक्यः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये षड्त्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "असंयतात्मना योगः दुष्प्रापः इति मे मतिः । वश्यात्मना यतता तु उपायतः अवाप्तुम् शक्यः ।" एवम अवदत् ।

व्याकरणम्
▶सन्धिः
योगः + दुष्प्रापः - विसर्गउकारः
दुष्प्रापः + इति - विसर्गलोपः
शक्यः + अवाप्तुम् - विसर्गउकारः पूर्वरूपसन्धिः

▶समासः
सम्यतः आत्मा यस्य सः सम्यतात्मा - समानाधिकरणबहुव्रीहिसमासः
न सम्यतात्मा - असम्यतात्मा - नञ्तत्पुरुषः - तेन
वश्यः आत्मा यस्य सः - वश्यात्मा - समानाधिकरणबहुव्रीहिसमासः - तेन

Downloaded from www.omkaravidya.com

मूलश्लोक:

अर्जुन उवाच
अयति: श्रद्धयोपेतो योगाच्चलितमानस: ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ६.३७॥

पदच्छेद:
अयति: श्रद्धया उपेत: योगात् चलितमानस: अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति

पदपरिचय:
अयति: - इकार पु प्र एक
श्रद्धया - आकार स्त्री तृ एक
उपेत: - अकार पु प्र एक
योगात् - अकार पु प एक
चलितमानस: - अकार पु प्र एक
अप्राप्य - ल्यबन्तम्
योगसंसिद्धिं - ईकार स्त्री द्वि एक
कां - मकार स्त्री द्वि एक
गतिं - इकार स्त्री द्वि एक
कृष्ण - अकार पु सं प्र
गच्छति - लट् प्रपु एक

पदार्थ:
अयति: - अप्रयत्नवान्
श्रद्धया - आस्तिकबुद्ध्या

Downloaded from www.omkaravidya.com

उपेतः - युक्तः
योगात् - योगमार्गात्
चलितमानसः - भ्रष्टचित्तः
अप्राप्य - अलब्ध्वा
योगसंसिद्धिं - योगफलम्
कां – काम् गतिं - स्थितिम्
कृष्ण – कृष्ण गच्छति - प्राप्नोति

अन्वयः
हे कृष्ण ! श्रद्धया उपेतः अयतिः योगात् चलितमानसः योगसंसिद्धिं अप्राप्य कां गतिं गच्छति ?

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये सप्तत्रिंशत्तमः श्लोकः । अर्जुनः “हे कृष्ण! यः श्रद्धया आस्तिक्यबुद्ध्या उपेतः अप्रयत्नवान् चलितमानसः योगफलम् अप्राप्य सः कां गतिं गच्छति ?” एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
श्रद्धया + उपेतः - गुणन्धिः
योगात् + चलितमानसः - श्चुत्वसन्धिः

▶समासः
चलितं मानसं यस्य सः - चलितमानासः - समानाधिकरणबहुव्रीहिसमासः
योगस्य संसिद्धिम् - योगसंसिद्धिः - षष्ठीतत्पुरुषः - तम्
अप्राप्य - न प्राप्य - नञ् तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोक:

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मण: पथि ॥ ६.३८॥

पदच्छेदः
कच्चित् न उभयविभ्रष्ट: छिन्नाभ्रम् इव नश्यति अप्रतिष्ठ: महाबाहो विमूढ: ब्रह्मण: पथि

पदपरिचय:
कच्चित् - अव्ययम्
न - अव्ययम्
उभयविभ्रष्ट: - अकार पु प्र एक
छिन्नाभ्रम् - अकार नपु प्र एक
इव - अव्ययम्
नश्यति - लट् प्रपु एक
अप्रतिष्ठ: - अकार पु प्र एक
महाबाहो - उकार पु सं प्र
विमूढ: - अकार पु प्र एक
ब्रह्मण: - नकार नपु ष एक
पथि - नकार पु स एक

पदार्थः
कच्चित् - कच्चित्
न - न
उभयविभ्रष्ट: कर्ममार्गात् योगमार्गात् विभ्रष्ट:

Downloaded from www.omkaravidya.com

छिन्नाभ्रम् - भिन्नमेघः
इव - इव
नश्यति - नश्यति
अप्रतिष्ठः - निराश्रयः
महाबाहो – अर्जुन विमूढः - संमूढः
ब्रह्मणः - परमात्मनः पथि - ब्रह्मप्राप्तिमार्गे

अन्वयः
हे महाबाहो ! उभयविभ्रष्टः अप्रतिष्ठः ब्रह्मणः पथि विमूढः छिन्नाभ्रम् इव न नश्यति कच्चित् ?

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये अष्टात्रिंशत्तमः श्लोकः । अर्जुनः “हे महाबाहो ! उभयविभ्रष्टः अप्रतिष्ठः ब्रह्मणः पथि विमूढः छिन्नाभ्रम् इव न नश्यति कच्चित् ?” एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
कच्चित् + न - अनुनासिकासन्धिः
न + उभयविभ्रष्टः - गुणसन्धिः
उभयविभ्रष्टः + छिन्नाभ्रम् - विसर्गसकारः
अप्रतिष्ठः + महाबाहो - विसर्गउकारः
विमूढः + ब्रह्मणः - विसर्गउकारः

▶समासः
उभयतः विभ्रष्टः - पञ्चमीतत्पुरुषः
छिन्नम् च अभ्रम् च - छिन्नाभ्रम् - विशेषणपूर्वपदकर्मधारयसमासः
अप्रतिष्ठः - न प्रतिष्ठः - नञ् तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ६.३९॥

पदच्छेदः
एतत् मे संशयं कृष्ण छेत्तुम् अर्हसि अशेषतः त्वदन्यः संशयस्य अस्य छेत्ता न हि उपपद्यते

पदपरिचयः
एतत् - दकार नपु द्वि एक
मे - दकार त्रि ष एक
संशयं - अकार पु द्वि एक
कृष्ण - अकार पु सं प्र
छेत्तुम् - तुमुनन्तम्
अर्हसि - लट् मपु एक
अशेषतः - अव्ययम्
त्वदन्यः - अकार पु प्र एक
संशयस्य - अकार पु ष एक
अस्य - मकार पु ष एक
छेत्ता - ऋकार पु प्र एक
न - अव्ययम्
हि - अव्ययम्
उपपद्यते - लट् प्रपु एक

पदार्थः

Downloaded from www.omkaravidya.com

एतत् - एतत्
मे - मम
संशयं - सन्देहम्
कृष्ण - कृष्ण
छेत्तुम् - नाशयितुम्
अर्हसि - योग्य: असि
अशेषत: - शेषरहित:
त्वदन्य: - त्वत्त: अन्य:
संशयस्य - सन्देहस्य
अस्य - अस्य
छेत्ता - नाशयिता
न - न
हि - हि
उपपद्यते - सम्भवति

अन्वयः
हे कृष्ण! मे एतत् संशयं अशेषत: छेत्तुम् अर्हसि अस्य संशयस्य छेत्ता त्वदन्य: न हि उपपद्यते ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां षष्ठे अध्याये नवत्रिंशत्तम: श्लोक: । अर्जुन: “हे कृष्ण! मम एतत् संशयं अशेषत: परिहर्तुं भवान् एव अर्हति । त्वत्त: अन्य: ऋषि: देवो वा अशेषत: नाशयिता संशयस्य छेत्ता : न हि सम्भवति ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
एतत् + मे - अनुनासिकासन्धि:

Downloaded from www.omkaravidya.com

अर्हसि + अशेषत: - यण्सन्धि:
त्वत् + अन्य: - जश्त्वसन्धि:
संशयस्य + अस्य - सवर्णदीर्घसन्धि:

▶समास:
अशेषत: - न शेषत: - नञ् तत्पुरुष:

▶कृदन्ता:
छेत्तुम् - छिद् +तुमुन् प्रत्यय:
छेत्ता - छिद् + तृच् प्रत्यय:
अशेषत: - अ + शिष् + तसिल् प्रत्यय:

श्रीमद्भगवद्गीता - षष्ठोऽध्याय: ध्यानयोग:

मूलश्लोक:

श्री भगवानुवाच
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ६. ४०॥

पदच्छेदः
पार्थ न एव इह न अमुत्र विनाश: तस्य विद्यते न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति

पदपरिचय:
पार्थ - अकार पु सं प्र
न - अव्ययम्
एव - अव्ययम्
इह - अव्ययम्

Downloaded from www.omkaravidya.com

न - अव्ययम्
अमुत्र - अव्ययम्
विनाशः - अकार पु प्र एक
तस्य - दकार पु ष एक
विद्यते - लट् प्रपु एक
न - अव्ययम्
हि - अव्ययम्
कल्याणकृत् - तकार पु प्र एक
कश्चित् - अव्ययम्
दुर्गतिं - इकार स्त्री द्वि एक
तात - अकार पु सं प्र
गच्छति - लट् प्रपु एक

पदार्थः
पार्थ - अर्जुन
न - न
एव - एव
इह - अत्र
न - न
अमुत्र - परस्मिन् लोके
विनाशः - विनाशः
तस्य - योगभ्रष्टस्य
विद्यते - लभते
न - न
हि - हि
कल्याणकृत् - शुभकृत्
कश्चित् - कश्चित्
दुर्गतिं - कुत्सितां गतिम्

Downloaded from www.omkaravidya.com

तात - वत्स
गच्छति - प्राप्नोति

अन्वयः
हे पार्थ तस्य इह विनाशः न एव विद्यते । अमुत्र न (विद्यते) । हे तात! हि कश्चित् कल्याणकृत्  दुर्गतिं न गच्छति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये चत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "हे पार्थ ! अस्मिन् लोके परस्मिन् लोके योगभ्रष्टाय विनाशः न विद्यते । यस्मात् हि तात! शुभकृत् कश्चित् कुत्सितां गतिं न प्राप्नोति ।"  एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
न + एव + वृद्धिसन्धिः
एव + इव - गुणसन्धिः
न + अमुत्र - सवर्णदीर्घसन्धिः
विनाशः + तस्य - विसर्गसकारः
कश्चित् + दुर्गतिम् - जश्त्वसन्धिः

▶समासः
कल्याणं करोति इति कल्याणकृत् - उपपदसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥  ६.४१॥

पदच्छेदः
प्राप्य पुण्यकृतां लोकान् उषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टः अभिजायते

पदपरिचयः
प्राप्य - ल्यबन्तम्
पुण्यकृतां - तकार पु ष बहु
लोकान् - अकार पु द्वि बहु
उषित्वा - क्त्वान्तम्
शाश्वतीः - ईकार स्त्री द्वि बहु
समाः - आकार स्त्री द्वि बहु
शुचीनां - इकार स्त्री ष बहु
श्रीमतां - तकार पु ष बहु
गेहे - अकार नपु स एक
योगभ्रष्टः - अकार पु प्र एक
अभिजायते - लट् प्रपु एक

पदार्थः
प्राप्य - लब्ध्वा / गत्वा
पुण्यकृतां - अश्वमेधादियाजिनाम्
लोकान् - भुवनानि

Downloaded from www.omkaravidya.com

उषित्वा - वासम् अनुभूय
शास्वतीः - नित्याः
समाः - संवस्तरान्
शुचीनां - यथोक्तकारिणाम्
श्रीमतां - विभूतिमताम्
गेहे - गृहे
योगभ्रष्टः - योगात् च्युतः
अभिजायते - उत्पद्यते

अन्वयः
योगभ्रष्टः पुण्यकृतां लोकान् प्राप्य शास्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये एकचत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "योगभ्रष्टः पुण्यकृतां लोकान् गत्वा बहुकालं वासम् अनुभूय तद् भोगक्षये यथोक्तकारिणां विभूतिमतां गृहे अभिजायते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
योगभ्रष्टः + अभिजायते - विसर्गउकारः पूर्वरूपसन्धिः

▶समासः
पुण्यं करोति - पुण्यकृतः - उपपदसमासः

▶कृदन्ताः
प्राप्य - प्र + आप् + ल्यप् प्रत्ययः
उषित्वा - वस् + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ६.४२॥

पदच्छेदः
अथवा योगिनाम् एव कुले भवति धीमताम् एतत् हि दुर्लभतरं लोके जन्म यत् ईदृशम्

पदपरिचयः
अथवा - अव्ययम्
योगिनाम् - नकार पु ष बहु
एव - अव्ययम्
कुले - अकार नपु स एक
भवति - लट् प्रपु एक
धीमताम् - तकार पु ष बहु
एतत् - दकार नपु प्र एक
हि - अव्ययम्
दुर्लभतरं - अकार नपु प्र एक
लोके - अकार पु स एक
जन्म - नकार नपु प्र एक
यत् - दकार नपु प्र एक
ईदृशम् - अकार नपु प्र एक

पदार्थः
अथवा - अथवा

Downloaded from www.omkaravidya.com

योगिनाम् -   युक्तानाम्
एव - एव
कुले - वंशे
भवति - जायते
धीमताम् - बुद्धिमताम्
एतत् -   एतत्
हि - हि
दुर्लभतरं - दुःखलभ्यतरम्
लोके - लोके
जन्म - जन्म
यत् - यत्
ईदृशम् - एवं विधम्

अन्वयः
अथवा धीमताम् योगिनाम्  कुले एव भवति । यत् लोके ईदृशम् एतत् हि जन्म    दुर्लभतरम्  ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये द्विचत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "अथवा धीमताम् योगिनाम्  कुले एव भवति  । लोके ईदृशम् जन्म यत्  एतत् हि दुर्लभतरम्  ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
एतत् + हि - पूर्वसवर्णसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ६.४३॥

पदच्छेदः
तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् यतते च ततः भूयः संसिद्धौ कुरुनन्दन

पदपरिचयः
तत्र - अव्ययम
तं - दकार पु द्वि एक
बुद्धिसंयोगं - अकार पु द्वि एक
लभते - लट् प्रपु एक
पौर्वदेहिकम् - अकार पु द्वि एक
यतते - लट् प्रपु एक
च  - अव्ययम
ततः -  अव्ययम
भूयः -  अव्ययम
संसिद्धौ - इकार स्त्री स एक
कुरुनन्दन - अकार पु सं प्र

पदार्थः
तत्र - योगिनाम् कुले
तं - तम्
बुद्धिसंयोगं - मतिसंबन्धम्
लभते - लभते

Downloaded from www.omkaravidya.com

पौर्वदेहिकम् - पूर्वस्मिन् दहे भवम्
यतते - प्रयत्नं करोति
च - च
ततः - तस्मात्
भूयः - बहुतरम्
संसिद्धौ - संसिद्धिनिमित्तम्
कुरुनन्दन - अर्जुन

अन्वयः
हे कुरुनन्दन! तत्र पौर्वदेहिकम् तं बुद्धिसंयोगं लभते ततः भूयः संसिद्धौ यतते च ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये त्रयस्चत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "हे कुरुनन्दन! योगिनां कुले पौर्वदेहिकम् तं बुद्धिसंयोगं लभते तस्मात् पूरंवकृतातं संस्कारात् भूयः संसिद्धौ यतते च ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
ततः + भूयः विसर्गउकारः

▶समासः
बुद्धया संयोगम् - बुद्धिसंयोगम् - तृतीयातत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ६.४४॥

पदच्छेदः
पूर्वाभ्यासेन तेन एव ह्रियते हि अवशः अपि सः जिज्ञासुः अपि योगस्य शब्दब्रह्म अतिवर्तते

पदपरिचयः
पूर्वाभ्यासेन - अकार पु तृ एक
तेन - दकार पु तृ एक
एव - अव्ययम्
ह्रियते - कर्मणि लट् प्रपु एक
हि - अव्ययम्
अवशः - अकार पु प्र एक
अपि - अव्ययम्
सः - दकार पु प्र एक
जिज्ञासुः - उकार पु प्र एक
अपि - अव्ययम्
योगस्य - अकार पु ष एक
शब्दब्रह्म - नकार नपु द्वि एक
अतिवर्तते - लट् प्रपु एक

पदार्थः
पूर्वाभ्यासेन - पूर्वसंस्कारेण

Downloaded from www.omkaravidya.com

तेन - तेन
एव - एव
ह्रियते - आकृष्यते
हि - हि
अवशः - अनाधीनः
अपि - अपि
सः - सः
जिज्ञासुः - ज्ञातुम् इच्छुः
अपि
योगस्य - योगस्य
शब्दब्रह्म - वेदोक्तकर्म
अतिवर्तते - अतिक्राम्यति

अन्वयः
तेन पूर्वाभ्यासेन एव अवशः अपि सः ह्रियते । योगस्य जिज्ञासुः अपि शब्दब्रह्म अतिवर्तते हि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये चतुस्चत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "पूर्व जन्मनि कृतः अभ्यासः पूर्वाभ्यासः । संस्कारेण अवशः अपि सः संसंकारणे ह्रियते । योगस्य जिज्ञासुः अपि वेदोक्तकर्म अतिक्राम्यति ।" एवम अवदत् ।

व्याकरणम्
▶सन्धिः
तेन + एव - वृद्धिसन्धिः
हि + अवशः - यण्सन्धिः

Downloaded from www.omkaravidya.com

अवशः + अपि -विसर्गउकारः पूर्वरूपसन्धिः
जिज्ञासुः + अपि - विसर्गरेफः
शब्दब्रह्म + अतिवर्तते - सवर्णदीर्घसन्धिः

▶समासः
अवशः - न वशः - नञ् बहुव्रीहिः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंशिद्धस्ततो याति परां गतिम् ॥६.४५॥

पदच्छेदः
प्रयत्नात् यतमानः तु योगी संशुद्धकिल्बिषः अनेकजन्मसंशिद्धः ततः याति परां गतिम्

पदपरिचयः
प्रयत्नात् - अकार पु प. एक
यतमानः - अकार पु प्र एक
तु - अव्ययम्
योगी - नकार पु प्र एक
संशुद्धकिल्बिषः - अकार पु प्र एक
अनेकजन्मसंशिद्धः - अकार पु प्र एक
ततः - अव्ययम्
याति - लट् प्रपु एक

Downloaded from www.omkaravidya.com

परां - आकार स्त्री द्वि एक
गतिम् - इकार स्त्री द्वि एक

पदार्थः
प्रयत्नात् - उद्यमात्
यतमानः - प्रवर्तमानः
तु - तु
योगी - तुक्तः
संशुद्धकिल्बिषः - विनष्टपापः
अनेकजन्मसंशिद्धः -
नानाजन्मसंशिद्धः
ततः - पश्चात्
याति - प्राप्नोति
परां - उत्कृष्टाम्
गतिम् - गतिम्

अन्वयः
प्रयत्नात् यतमानः तु योगी संशुद्धकिल्बिषः अनेकजन्मसंशिद्धः ततः परां गतिं याति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये पञ्चचत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "प्रयत्नात् यतमानः तु योगी संशुद्धकिल्बिषः अनेकजन्मसंशिद्धः ततः परां गतिं याति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
प्रयत्नात् + यतमानः - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

यतमानः + तु - विसर्गसकारः
अनेकजन्मसंशिद्धः + ततः - विसर्गसकारः
ततः + याति - विसर्गउकारः

▶समासः
संशुद्धं किल्बिषं यस्य सः - संशुद्धकिल्बिषः - समनाधिकरणबहुव्रीहिसमासः
अनेकजन्मानि संशिद्धः-अनेकजन्मसंशिद्धः सप्तमीतत्पुरुषः

श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ६.४६॥

पदच्छेदः
तपस्विभ्यः अधिकः योगी ज्ञानिभ्यः अपि मतः अधिकः कर्मिभ्यः च अधिकः योगी तस्मात् योगी भव अर्जुन

पदपरिचयः
तपस्विभ्यः - नकार पु प बहु
अधिकः - अकार पु प्र एक
योगी - नकार पु प्र एक
ज्ञानिभ्यः - नकार पु प बहु
अपि - अव्ययम्
मतः - अकार पु प्र एक
अधिकः अकार पु प्र एक

Downloaded from www.omkaravidya.com

कर्मिभ्यः  नकार पु प बहु
अधिकः - अकार पु प्र एक
योगी - नकार पु प्र एक
तस्मात् - दकार पु प एक
योगी - नकार पु प्र एक
भव - लोट् मपु एक
अर्जुन - अकार पु सं प्र

पदार्थः
तपस्विभ्यः - तपस्विभ्यः
अधिकः - प्रकृष्टः / उत्तमतरः
योगी - योगी
ज्ञानिभ्यः - शास्त्रज्ञानिभ्यः
अपि - अपि
मतः - अभिप्रेतः
अधिकः- प्रकृष्टः / उत्तमतरः
कर्मिभ्यः - कर्मिभ्यः
अधिकः - प्रकृष्टः / उत्तमतरः
योगी - योगी
तस्मात् - तस्मात्
योगी - योगी
भव - भव
अर्जुन - पार्थ

अन्वयः
योगी तपस्विभ्यः अधिकः । (योगी) ज्ञानिभ्यः अपि अधिकः । (योगी) कर्मिभ्यः च अधिकः (इति) मतः । तस्मात् (हे) अर्जुन! योगी भव ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये  षड्चत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "तपस्विभ्यः योगी श्रेष्ठः । शास्त्रज्ञानिभ्यः अपि श्रेष्ठः । योगी कर्मिभ्यः च अधिकः इति मतः । तस्मात् हे अर्जुन! योगी भव ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
तपस्विभ्यः + अधिकः - विसर्गउकारः पूर्वरूपसन्धिः
अधिकः + योगी - विसर्गउकारः
ज्ञानिभ्यः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
मतः + अधिकः - विसर्गउकारः
कर्मिभ्यः + च - विसर्गसकारः
च + अधिकः - सवर्णदीर्घसन्धिः
अधिकः + योगी - विसर्गउकारः
तस्मात् + योगी - जश्त्वसन्धिः
भव + अर्जुन - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता  - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ६.४७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
योगिनाम् अपि सर्वेषां मद्गतेन अन्तरात्मना श्रद्धावान् भजते यः  मां सः मे युक्ततमः मतः

पदपरिचयः
योगिनाम् - नकार पु ष बहु
अपि - अव्ययम्
सर्वेषां - अकार पु ष बहु
मद्गतेन - अकार पु तृ एक
अन्तरात्मना - नकार पु तृ एक
श्रद्धावान् - तकार पु प्र एक
भजते - लट् प्रपु एक
यः  - दकार पु प्र एक
मां - दकार त्रि द्वि एक
सः - दकार पु प्र एक
मे -  दकार त्रि ष एक
युक्ततमः  - अकार पु प्र एक
मतः -  अकार पु प्र एक

पदार्थः
योगिनाम् -  ध्यानयुक्तानाम्
अपि - अपि
सर्वेषां - रुद्रादित्यादिध्यानपराणां मध्ये
मद्गतेन - मयि समाहितेन
अन्तरात्मना - अन्तः करणेन
श्रद्धावान् - श्रद्दधानः
भजते - सेवते
यः  - यः

Downloaded from www.omkaravidya.com

मां - माम्
सः - सः
मे - मम
युक्ततमः - अतिशयने युक्तः
मतः - अभिप्रेतः

अन्वयः
सर्वेषाम्  योगिनाम् अपि यः श्रद्धावान् मद्गतेन अन्तरात्मना मां भजते  सः  युक्ततमः (इति) मे मतः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां षष्ठे अध्याये सप्तचत्वारिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "योगिनामपि ररुद्रादित्यादिध्यानपराणां मध्ये  मयि (वासुदेवे) अन्त:करणेन श्रद्दधानः यः माम् सेवते सः मम अतिशयेन युक्तः इति मम मतः ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
मद्गतेन + अन्तरात्मना - सवर्णदीर्घसन्धिः
यः  + मां - विसर्गलोपः
सः + मे - विसर्गलोपः
युक्ततमः +मतः - विसर्गउकारः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - षष्ठोऽध्यायः ध्यानयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ध्यानयोगः नाम षष्ठः अध्यायः

पदपरिचयः

ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
ध्यानयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
षष्ठः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयो: मध्ये संवादे
ध्यानयोग: - ध्यानयोग:
नाम - नाम
षष्ठ: - षष्ठ:
अध्याय: - अध्याय:

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोग: नाम षष्ठ: अध्याय: (संपूर्णम् भवति) ।

तात्पर्यम्
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोग: नाम षष्ठ: अध्याय: (संपूर्णम् भवति)

व्याकरणम्
▶सन्धिः
सत् + इति - जश्त्वसन्धि:
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धि:

Downloaded from www.omkaravidya.com

योगः + नाम - विसर्ग उकारः
षष्ठः + अध्यायः - विसर्ग उकारः गुणसन्धिः पूर्वरूपसन्धिः

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com